Table of contents

# भक्तिचन्द्रिका

(नारदभक्तिसूत्राणां व्याख्या)

प्रकाशनस्थानम्

अध्यात्मप्रकाशकार्यालयः

होळेनरसीपुरम्

१९९९

# भक्तिचन्द्रिका

(नारदभक्तिसूत्राणां व्याख्या)

कन्नड मूलग्रन्थ रचयितारः

*श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनः*

संस्कृतानुवादकः

*विद्वान्. हो.ना. वेङ्कटेश शर्मा शास्त्री*

क्रमाङ्कः - २१२

प्रकाशनस्थानम्

अध्यात्मप्रकाशकार्यालयः

होळेनरसीपुरम्

१९९९

First Edition - 1000 Copies - 1999

Published by :
**ADHYATMA PRAKASHA KARYALAYA**
Holenarsipur, Hassan - 573 211

Typeset by :

**L.M. GRAPHICS**
1752/3, "Akshaya Mansion"
Opp. Malleswaram Rly. Stn.,
Maruthi Extn., Bangalore - 21
Ph. : 332 1182

Printed by :

**PRAGNA PRINTERS**
# 222, Main Road, Gowdanapalya,
Bangalore - 61 Ph. : 666 2232

# प्रस्तावना

सहृदयेषु वाचकवरेण्येषु सविनय विज्ञाप्यते । परमपूज्यैः सच्चिदानन्देन्द्रसरस्वतीस्वामिभिः संस्थापितस्य अध्यात्मप्रकाशकार्यालयस्य परमं लक्ष्यम् एतदेव, यत् सर्वत्र अध्यात्मविद्यायाः प्रसारः । तदर्थं श्रीस्वामिपादैः देशभाषया अनूदितानां श्रीशङ्कराचार्याणां भाष्य-प्रकरणग्रन्थानां मुद्रापणं कृतमस्ति । प्रतिसंवत्सरं होलेनरसीपुरे, विभिन्नस्थलेषु च वेदान्तसप्ताह-महोत्सवस्य प्रवर्तनम्, सुप्रसिद्धानां विदुषां गोष्ठीमायोज्य भाष्यप्रवचनम्, **'अध्यात्मप्रकाश'** नाम्ना प्रतिमासं पत्रिकाप्रकटनं, विद्यालये विद्यार्थिभ्यो भाष्यपाठः इत्यादीनि प्रवर्त्यमानानि सन्ति ।

इतः पंचविंशतौ वत्सरेषु श्रीचरणैः भक्तिचन्द्रिकानाम्नी नारदभक्तिसूत्राणां व्याख्या कन्नडभाषया प्रणीतास्ति । साहित्यविद्वान् इत्यादि बिरुदाङ्किता हो.ना.वेङ्कटेशशर्माणः शास्त्रिणः तमिमं ग्रन्थमामूलचूडमवलोक्य, श्री शाङ्करसूत्रभाष्यशैलीमनुकरोत्येतद्विवरणम् - इत्यतः अस्य प्रयोजनं समग्रेऽपि देशे भवेत् इति निश्चित्य संस्कृतभाषया तामिमां कृतिमन्ववादिषुः ।

अस्याः कृतेः यावान् मुद्रापणव्ययः तत्सर्वं शिवमोग्गनगरवासी श्री जे.आर. **अनन्तरामन् (अवधानी)** कार्त्स्न्येन अभरत् । स्मार्ताग्निधारी सोमप्रदोषे शिवार्चनरतश्च अयं स्वभावत एव अध्यात्मविद्यारसिकश्च । अध्यात्मप्रकाशकार्यालये मुद्रितानां नैकेषां ग्रन्थानां मुद्रापणे धनसाहाय्यमनेन दत्तमस्ति । एतादृशानां श्रीमतां प्रोत्साहेनैव अध्यात्मग्रन्थानां प्रकटनं भविता ।

अस्य ग्रन्थस्य अक्षरविन्यासः *"L.M. Graphics"* द्वारा अभूत् । *"Pragna Printers"* द्वारा मुद्रणं कृतम् । अस्मिन् पवित्रतमे उद्यमे अनुवाद रूपेण, धनसहाय्यरूपेण, मुद्रणरूपेण, ग्रन्थशोधनरूपेण च उपकुर्वतां सर्वेषां सद्गुरोरनुग्रहेण आयुरारोग्यैश्वर्यादिकं ज्ञानवैराग्यादिकं च निरन्तरं भूयात् इति आशास्महे । यथापूर्वं जना इममपि ग्रन्थं प्रेम्णा आद्रियेयु. इति सद्गुरु रूपिणं भगवन्तं प्रार्थयामहे ।।

***अरकलगूडु ताण्डवेश्वरः***
***अध्यक्षः, कार्यकारिणी समितिः***

# अनुवादग्रन्थकृता विनीतेन क्रियमाणा प्राग्विज्ञप्तिः

भक्तियोगो मनुष्यस्य परमपुरुषार्थसाधनमिति शास्त्रेषु यद्यपि उपदिष्टमस्ति । अथापि स उपदेशः प्रायेण मुग्धानां जनानां हृदये न सम्यग् लगतीतीदमालक्ष्य भगवान् भक्त्याचार्यः श्रीनारदः तद् भक्तितत्त्वं साङ्गपरिकरं सूत्रैः सङ्गृह्य लोकायोपादिशत् ।

परमहंसपरिव्राजकाचार्याः श्रीश्री सच्चिदानन्देन्द्र सरस्वती स्वामिनः संस्कृतभाषास्थानां तेषां सूत्राणामर्थविवरणं कर्णाटभाषायां विरचितवन्तः । भक्तिचन्द्रिका नामैषो ग्रन्थः इतरदेशस्थानामपि भक्तजिज्ञासूनां साधकानां तत्त्वार्थबोधको भवत्विति मनीषया तं ग्रन्थं संस्कृतभाषयाऽनूध्य भारतीयार्यजनेभ्यः समर्पयितुमहमुद्युक्तोऽस्मि । तदिदं कार्यं न सुशकमित्यहं जानामि । यतश्चात्र तद्ग्रन्थस्थानि सर्वाणि वाक्यानि याथातथ्येन परिवर्तयितुमहं न प्राभवम् । अथापि एषोऽनुवादः भक्तितत्त्वस्य श्रीश्री स्वामिकृतविवरणस्य च अनुगुणोऽस्तीत्यहं विश्वसिमि । परं त्वत्र विज्ञप्राज्ञाभिप्राय एवान्त्यं प्रमाणम् ।

लोके तावत् - यत्र तत्र प्रचलितानि क्रैस्तमुसल्मानेत्यादीनि मतान्यपि आस्तिकभावनोपेतानीति भगवद्भक्तिपराणीति च विभाव्यन्ते । किं तु तन्मतग्रन्थेषु तेषामुपदेशेषु च - मूलाधारवचनं, दृढं प्रमाणं, न्यायोपेता विचारसरणिः, युक्ता दृष्टान्ताः, अनुभवसिद्धानां संवादाः, संप्रदायशुद्धिः, इत्यादीनामस्पष्टत्वात् दुर्लभत्वाच्च श्रोतॄणां जिज्ञासूनां तद्वचनेषु विश्वासो वा तैः तत्त्वनिश्चयो वा दुर्लभ एव । परं त्वत्र सूत्रार्थविवरणग्रन्थे अनूचानार्षेयाणां विचारप्रक्रियायां तद्भक्तितत्त्वं साङ्गं समग्रं सपरिकरं च सुष्ठु निरूपितमस्तीत्यतः जिज्ञासूनां तत्त्वार्थनिश्चयः, तथा साधकानां फलसिद्धिविषये दृढो विस्रम्भश्च सम्भाव्यत इति ।

एषां सूत्राणां विवरणग्रन्थाः लोके यद्यपि बहवः उपलभ्यमानाः स्युः । किं तु अस्मिन् ग्रन्थे अप्रकृतान् प्रस्तावानपाकृत्य केवलं भक्तिसंबद्धा एव विषयाः विवृताः । ते हृदयङ्गमाश्च विद्यन्ते । यथा - प्रबलं प्रमाणम्, न्यायोपबृंहिता विचारसरणिः, अनुभवानुगुणा युक्तयः, युक्ता दृष्टान्ताः, सम्प्रदायशुद्धिः, भक्तसंवादाश्च । इत्येवं सर्वं भक्तितत्त्वव्युत्पत्तये तथा सिद्धान्तसमर्थनाय च पुष्कलसामग्रीपूगमस्ति ।

किं च भक्त्याविनाकृतेन कर्मानुष्ठानेन न चित्तशुद्धिरिति, तथा केवलेन तत्त्वविचारेण न पुरुषार्थसिद्धिरिति च शिष्टाः अभियुक्ताः प्रबोधयन्ति । यतश्च भगवद्भक्त्या केवलयैव परमपुरुषार्थलाभो भविष्यतीति हितैषिजनकृतोपदेशो वरीवर्ति, अतश्च भक्तसाधकानामुपयोगार्थमिति तद् ग्रन्थानुवादं कृत्वा इमं भक्तिचन्द्रिकाग्रन्थं भवतां करकमले समर्पित-वानस्मि ।।

*दि-२०.४.१९९९*
*प्रमाथि सं श्रीशङ्करजयन्ती*
*बेङ्गलूरु*

*एवं विज्ञापयति सज्जनानुचरो*
*हो.ना. वेङ्कटेश शर्मा शास्त्री*

*नं, १० शततारा,*
*टेलिकां विस्तरणम्, ईईई प्रधानवीथी*
*टिंबर यार्ड. बेङ्गलूर - २६*

# पीठिका

तदेतत् नारदीयं भक्तिसूत्रं प्रसन्नगम्भीरम् अल्पकायो ग्रन्थः । अस्य आशयः हिन्दी-आङ्ग्लप्रभृतिभिः अनेकाभिः भाषाभिः बहुधा विवृतोऽस्ति । तथापि अत्र निगूढस्य सिद्धान्तस्य प्रक्रियायाश्च गहनं स्वरूपं निर्धारयितुम् अधुनापि दुःशकमेव ।।

सोऽयम् अनुभवप्रधानः अध्यात्मग्रन्थ इति सुस्पष्टं द्योतते यद्यपि, तथापि बहवोऽन्यान्यान् स्वाभिमतान् सिद्धान्तान् सूत्राक्षराधारेणैव आविष्कर्तुं समीहन्तो दृश्यन्ते । वेदान्तप्रस्थानत्रयम् इति यत् प्रसिद्धम्-उपनिषदः, भगवद्गीताः, बादरायणसूत्राणि च तदवलोकनेन, ततः भक्तिप्रधानग्रन्थानां श्रीमद्भागवतविष्णुपुराणादीनां समीक्षणेन च इतोऽर्धशतमानात् प्राक् अस्मिन् ग्रन्थविषये यो मम अभिप्रायः, स एव सूत्रसन्दर्भेण च उपपन्नतर इत्ययं निर्णयो दृढतरोऽभूत् । या भगवद्गीतासूपदिष्टा परा भक्तिः अथवा ज्ञाननिष्ठा, सैव नारदभक्ति सूत्राणां परमं लक्ष्यम् इत्येष मम अभिप्रायः । तमेव अर्थम् अस्मिन् ग्रन्थे विशदयितुम् अपेक्षितान् आधारग्रन्थान् युक्तिम् अनुभवं च सूत्रार्थ-प्रतिपादनाय घटयितुम् अस्मिन् संस्करणे आविष्कृतवानस्मि ।

भक्तिज्ञानयोगानां परस्परं सम्बन्धविवेचनसन्दर्भे नारदसिद्धान्ते एषु त्रिषु कतमत् साधनम् ? कतमत् फलम् ? इत्यस्मिन् विषये नानादर्शनवासितान्तःकरणा जना भिन्नं भिन्नम् अभिप्रयन्तो विवादस्य स्थानं कल्पयन्ति । परं तु सैषा विप्रतिपत्तिः गौणभक्त्यादीनां परभक्त्यादीनां च तत्त्वस्य च अज्ञानादेव समुद्भूता ; न तु वस्तुस्वरूपेणैव एषां विभागमाश्रित्य इति । तदिदं रहस्यम् अस्यामेव भक्तिचन्द्रिकायां यावच्छक्यं स्फुटीकृतवानस्मि । अपि च सद्य एव *"गीताशास्त्रोपदेश-सोपानपङ्क्तिः"* इत्येतन्नाम्ना मया आविष्क्रियमाणं संस्कृतग्रन्थो इतोऽपि स्फुटतरो भविष्यति इति श्रद्धास्ये ।।

नूत्नस्यास्य संस्करणस्य प्रणयनावसरे न केवलं मदीया पूर्वतना विवृतिराश्रिता । रामकृष्णमिषन्संस्थायाः ***श्रीत्यागीशानन्दैः*** रचिताम् आङ्ग्लव्याख्याम्, गोलोकवासिना हनूमान् प्रसाद पोद्दार् महाशयेन रचितं ***प्रेमदर्शनम्*** नाम विवरणं च अवलोक्य, तत्र तत्र लेशतः काश्चन सूचना अपि उद्धृतगनस्मि । तथापि अस्या व्याख्याया विचारसरणेः अहमेव कार्त्स्न्येन प्रतिभूरस्मि । अस्याः कृतेरवलोकनात् संभावितान् भाषादोषान् विचारसरणिदोषान्-इत्यादीन् वाचकमहाशया अवश्यं दर्शयेयुः ; येन आगामिनि संस्करणे सकार्तज्ञं प्रकाशका तान् सस्कुर्युः इति विश्वसिमि ।

अल्पीयस्या अनया सेवया सर्वात्मा भगवान् सुप्रीयेत, तेनैव धन्यं मन्येय आत्मानम्

विरोधिकृत् संवत्सरे
आषाढ. बहुल. दशमी

ग्रन्थकर्ता,
**श्री सच्चिदानन्देन्द्रसरस्वतीभिक्षुः**

# सङ्केताक्षरविवरणम्

| | |
|---|---|
| अध्या. रामा. | अध्यात्मरामायणम् |
| गी. | भगवद्गीता |
| चं. भाग. | चम्पूभागवतम् |
| मनु. | मनुस्मृतिः |
| मु.मा. | मुकुन्दमालास्तोत्रम् |
| मो.ध. | महाभारतम् - मोक्षधर्मपर्वः |
| वि.चू. | विवेकचूडामणिः |
| वि.पु. | विष्णुपुराणम् |
| म.भा. | महाभारतम् - शान्तिपर्वः |
| भाग. | श्रीमद्भागवतपुराणं |

# विषयानुक्रमणिका


| | | |
|---|---|---|
| १. | अवतरणिका | १ |
| २. | शास्त्रारम्भप्रतिज्ञा | २ |
| ३. | भक्तेः स्वरूपलक्षणम् | ५ |
| ४. | भक्तेः फलम् | १६ |
| ५. | भक्तेः कामस्य च वैलक्षण्यम् | ३० |
| ६. | भक्तस्य कर्मानुष्ठानक्रमः | ४० |
| ७. | स्पष्टानि भक्तिलिङ्गानि | ४६ |
| ८. | नारदस्य सिद्धान्तः | ५० |
| ९. | भक्त्याचार्येषु वैमत्यमस्ति किम् ? | ५३ |
| १०. | भक्तिकर्मादीनां तारतम्यम् | ६५ |
| ११. | अथ साधनभागः प्रस्तूयते | ७७ |
| १२. | मायायाः सन्तरणं कथम् ? | ९६ |
| १३. | प्रेम्णो महिमा | ११२ |
| १४. | अथ गौभक्तिविचारः | १२२ |
| १५. | गौणभक्तेः सौलभ्यम् | १२७ |
| १६. | साधकव्यवहारविधिः | १३४ |
| १७. | मुख्यभक्ताः | १४८ |
| १८. | साधकाः कथं वर्तेरन् ? | १६० |
| १९. | भक्तेरेकादशप्रकाराः | १७२ |
| २०. | भक्त्याचार्याणां ऐकमत्यम् | १९९ |
| २१. | परिशिष्टम् | २०२ |

।। श्री गणाधिपतये नमः ।।

।। ॐ नमो भगवते परमानन्दस्वरूपाय, भक्तवराय नारदाय च ।।

# ।। भक्तिचन्द्रिका ।।

## ।। अथ मङ्गलाचरणम् ।।

*अदृश्योऽपि स्वभक्तानां दृश्यो भवति यः सदा ।*
*अचिन्त्यमहिमानं तमाश्रयेऽभीष्टसिद्धये ।*
*स्वात्मन्येवाप्रतिमपरमप्रेमसूत्रेण बध्दः*
*सर्वव्यापी प्रभुरपि सदा येन क्लृप्तिं गतोऽसौ ।।*
*वीणागानप्रकटितपरप्रेमसारं मुनीन्द्रं*
*भक्त्याचार्यं भवभयनुदं नौम्यहं नारदाख्यम् ।।*

## १. अवतरणिका

इह हि सर्वो जनः स्वात्मनः परमानन्दमभिलषति । परं तु तदनुकूलं प्रयत्नं नाचरति । प्रायेण लोकव्यवहारस्थाः सर्वे अहं ममेत्यभिमानग्रहग्रस्ताः अनात्मानमेवाऽऽत्मानं मन्यमाना कामक्रोध-लोभाविष्टाः भवन्ति । अत एव ते मदमात्सर्यादिदोषैः कलुषितान्तःकरणा भूत्वा स्वकृतधर्माधर्मवशेन लोके उच्चावचं जन्म सम्प्राप्य तत्र च स्वकर्मफलत्वेन प्राप्तं प्रियमप्रियं वा मुहुर्मुहुरनुभवन्तो हृष्टाः दीनाः वा 'अनिशं' विकारभावमापद्यमानाः दुःसहे संसारचक्रे सम्पिष्यन्ते । तथा परवशानां दीनानां जीवानां अपार दुःखार्णवसन्तरणाय भगवद्भक्तिं विना नान्य इह सुकर उपायो विद्यत इति शास्त्रपर्यालोचनया स्वानुभवेन च

परिपश्यन्, तान् जीवानुध्दर्तुकामः परमकारुणिकः श्रीनारद आचार्यः तद्भक्तितत्त्वं संक्षेपेणोपन्यसितुं भक्तिसूत्राण्यनुक्रममाणः शास्त्रारम्भं प्रतिजानीते -

# २. शास्त्रारम्भप्रतिज्ञा

## अथातो भक्तिं व्याख्यास्यामः ।।१।।

## अथ शब्दार्थविवरणम्

१. अथेति शब्दः शास्त्रारम्भं सूचयितुं मङ्गलमन्वाख्यातुं चेत्युभय प्रयोजनः । सूत्रारम्भे अथात इतीमौ शब्दौ प्रयोक्तव्यौ इति अभियुक्तानां समाचारः । तत्र भक्तिं व्याख्यास्याम इति प्रतिज्ञयैव शास्त्रारम्भः सूचित इति मङ्गलप्रयोजन एवाऽथशब्दो भविष्यति । शंखवीणेत्यादिमङ्गलवाद्यध्वनिश्रवणमात्रेण शुभंयुर्जनःस्यात् इत्यास्तिकजनानां विश्वासः । एवं चाऽर्थान्तरे प्रयुक्तोऽपि अथशब्दः ग्रन्थादौ मङ्गलार्थः इति ।

*ॐ कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।*
*कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ।।*

इति स्मृतिवचनेन अथशब्दस्य मङ्गलसूचकत्वमुक्तमिति अभियुक्ताः मन्यन्ते । अत एव ग्रन्थस्य निष्प्रत्यूहेन परिसमाप्त्यर्थं आदावस्य प्रयोगः सम्प्रदायसिद्धः । यद्यपीदृशस्य भक्तिशास्त्रस्य विघ्न एव असम्भावितो नितरां श्रीनारदस्य । यतः -

*सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।*
*येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ।।*

इति पुराणवचनप्रामाण्येन भगवद्भक्तानां अमङ्गलवार्तैव नास्ति ।

अथापि ग्रन्थादौ मङ्गलमाचरणीयमिति शिष्टसम्प्रदायमनुसृत्य स्वहृदये नित्यमावाहितश्रीहरिणा नारदेन ग्रन्थादौ अथशब्द उपात्तः ।

## अतः शब्दार्थविवरणम्

२. अतःशब्दः शास्त्रप्रयोजनं सूचयति । यतः सप्रयोजने एव विषये प्रेक्षावतां प्रवृत्तिर्दृश्यते । इदं प्रयोजनवत् शास्त्रमित्यर्थः । लोके जनानां परमानन्दस्याऽप्राप्तौ अहङ्कार एव अन्तरायः । अहमित्यभिमानः सर्वस्याऽपि नैसर्गिको वर्तते । सोऽहङ्कारो देहादिषु प्रवृत्तोऽन्वारूढश्च । एषोऽहमभिमानो व्यवहारकाले उच्छूनो भूत्वा बलदर्पकामक्रोधादिरूपेण विपरिणमते । एनं अहङ्कारमुत्पाटयितुं भगवद्भक्तिमेकां मुक्त्वा नान्यत्साधनमञ्जसा प्रभवति । व्यवहारप्रवृत्तिस्तावत् पुरुषस्य कामेन प्रवर्तते । कामस्य अविद्या कारणम् । सैव अहङ्कारस्याऽपि निदानम् । यस्य तु भगवति भक्तिरुत्पन्ना तस्य पुरुषस्य विषयेषु सुविरक्तिर्जायते । तदन्वेव तस्य देहादिष्वहङ्कारो विहन्यते । तथा हि

***भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ।***
***प्रपद्यमानस्य यथाऽश्नतः स्युस्तुष्टिः पुष्टिःक्षुदपायोऽनुघासम् ।***

(भा ११-२-४२)

इति भागवते उक्तम् । भुञ्जानस्य यथा प्रतिग्रासं क्षुन्निवृत्तिः तुष्टिः पुष्टिश्च भवति तथैव भगवन्तं प्रेम्णा शरणागतस्य भक्तिः स्वात्मानुभवो विषयवैराग्यं चेति त्रिकमप्येककाले सम्पत्स्यते । तदात्व एव अहङ्कारः समूलो विशीर्यते । परमानन्दसिद्धिश्च भवति । अतः संसारिणां जीवानां भगवद्भक्त्या परमपुरुषार्थः बह्वर्थप्रयोजनं च सेत्स्यतीत्यतः इदानीं भक्तिशास्त्रमारभामह इत्यर्थः ।

३. परमानन्दलाभो हि सर्वेषां वाञ्छितोऽर्थः । किंतु स आनन्दः कः ? स च कीदृशः ? इतीदमविदित्वा जनाः प्रायेण विषयभोगेनैव आनन्दो

लभ्यत इति मन्यमानाः विषयसङ्ग्रहतत्पराः सन्तः मोमुह्यन्ते । वस्तुतस्तु परमानन्दो ब्रह्मतत्त्वमिति नार्थान्तरम् । भगवानेवेह परमार्थः । स एवानन्दरूपः सर्वस्याऽऽत्मा भवति । न ततोऽर्थान्तरमिह किञ्चिदस्ति । मातृरूपा श्रुतिरेवमुपदिशति -

*आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभि संविशन्ति । इति (तै. उप. ३-६).*

भृगुर्नाम विद्यार्थी गुरुं वरुणं ब्रह्म उपदेष्टुं प्रार्थयामास । तस्मै गुरुर्वरुण एवमुपदिदेश - यस्मादिमानि भूतान्युत्पद्यन्ते, अथ च जातानि तानि यं उपजीवन्ति, अन्तेऽपि यस्मिन् अपियन्ति, तद् ब्रह्मेति जानीहीति । मेधावी भृगुरेवमुपदेशं श्रुत्वा स्वात्मन्येव मुहुर्मुहुः विचार्य अन्ते चैवं निरणैषीत् - अस्य जगतः आनन्द एवाऽऽत्मा । चराचराः प्राणिनः सर्वे आनन्दादुत्पद्यन्ते आनन्दमनुजीवन्ति आनन्दमेवाऽन्ते संविशन्ति । आनन्द एकीभावमाप्नुवन्ति । अतः स आनन्दो नूत्नतया न सम्पादनीयः । यतः स्वात्मैव परमानन्दोऽस्ति इति । एतदुत्तमं सत्यमविदित्वा मनुष्यस्याऽनादिकालात् अभ्यस्तेन अहङ्कारेण आच्छन्नं स्वस्वरूपम् अविविक्तं च । येन पुरुषेण चेह भृगुणेव स्वप्रयत्नतः तदहङ्कारावरणम् अपसार्य दृश्यते, तेन स्वस्वरूपमेव परमानन्दो भगवानिति प्रत्यभिज्ञायते । परं त्वीदृशं ज्ञानं न सुलभम् । न सुगमम् । बाह्यविषयेषु आसक्तिं त्यक्त्वा भगवति रतिरभ्यस्यते चेत्, तया भक्त्या क्रमशः स्वाहङ्कारः खण्ड्यते चेत्, तदा पुरुषस्याऽस्याऽल्पत्वं स्फुटीभवति । तदा लौकिकैर्विषयैः लभ्यमानं सुखं न वस्तुतः सुखं, किंतु सुखाभास एवेति परिज्ञायते । भगवतः स्वरूपमेव वास्तवं नित्यं परमानन्दरूपमिति च सुविदितं भवति ।

*यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ*

*यत्राऽन्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम् ॥* *(छां. उप.)*

इत्युपनिषदुक्तप्रकारेण यो भूमनामा स भगवान् सर्वत्र सर्वदा वर्तते । संसारिणस्तु क्षुद्रान् विषयान् सम्पाद्य परिच्छिन्नदृष्ट्या तेषां विषयाणां भोगमेव सुखं मन्यमानाः सुखाभासे संसारे निमज्जन्ति । जगद्विषयाः सर्वे सर्वथाऽनित्या दुःखानुबन्धिनो वर्तन्ते । यदा तु साधकः विवेकं प्राप्य स्वात्मरूपं सन्तं सत्यानन्दं भगवन्तं साक्षात्करोति तदा "सकलमिदमहं च वासुदेव" इति स्वयमेवाऽवगच्छति । ईदृश-ज्ञानानुत्पत्तौ पुरुषस्याऽहङ्कार एव कारणम् । एवं च सम्यग्ज्ञानं प्रति प्रतिबन्धकस्याऽहङ्कारस्याऽपाकरणमेव भक्तेः परमं प्रयोजनम् । तत्प्रयोजनमेवाऽत्र सूत्रकारोऽतश्शब्देन सूचयति ।

### व्याख्यास्याम इत्यस्याऽर्थविवरणम्

४. व्याख्यास्याम इत्यत्र वि आ ख्यास्याम इति त्रयोंऽशा विद्यन्ते । वि विस्पष्टं, आ सर्वैः प्रकारैः, ख्यास्याम विभज्य कथयिष्याम इत्यर्थः । का नाम भक्तिरिति विभज्याऽकथने साऽपि लौकिकप्रीतिवत् काचन मनोभाव इति अन्यथाग्रहणं स्यात् । अतो विस्पष्टकथनमावश्यकम् । भक्तेः लक्षणं किम् ? सा केन केन प्रकारेण विज्ञायते ? तदभिव्यक्तेः साधनानि कानि ? तस्याः फलं कथं अनुभूयते ? भक्तलक्षणं च किम् ? इत्येतान् सर्वान् विषयान् सम्यग् विचार्य प्रदर्शयिष्याम इत्येषोऽर्थः आ इत्यनेन सङ्गृहीतः । एवं प्रतिज्ञासूत्रे शास्त्रविषया भक्तिः तल्लभ्यं प्रयोजनं चेति द्वयमपि स्पष्टं सूचितम् ।

## ३. भक्तेः स्वरूपलक्षणम्

५. भक्तिं व्याख्यास्याम इति ह्युक्तम् । भक्तिलक्षणं किमितीदानीमुच्यते ।

# सा त्वस्मिन् परमप्रेमरूपा ।।२।।

## सूत्रस्थसर्वनामार्थं विवरणम्

६. सा तु भक्तिस्तु । प्रकृतपरामर्शकत्वमितीदमेकं सर्वनामकृत्यम् । प्रतिज्ञासूत्रे भक्तिं व्याख्यास्याम इत्यत्र भक्तिरेव प्रकृता । अतः सेति सर्वनाम्ना भक्तिरेव परामृष्टा । किं तु अस्मिन्निति सर्वनाम्नः न तथात्वं सम्भवति । न हि अयमिति कश्चन पुरुषः पूर्वत्रोपात्तः । प्रायेणेदंशब्दः सन्निकृष्टवाची । तच्छब्दो विप्रकृष्टवाची । यद्यपि अत्र दूरस्थं किञ्चिद्वस्तु न निर्दिष्टमथापि अस्मिन्नितीदंशब्दोऽत्र प्रसिद्धार्थबोधकत्वेन प्रयुक्त इति विभावनीयम् । परमात्मा खलु सर्वव्यापी सर्वान्तरोऽपरोक्षो निरतिशयतत्त्वरूपः परमार्थ इति श्रुतिस्मृतिषु प्रसिद्धः । तथा विदुषां भक्तानां च प्रसिद्धः । तथा हि श्रुतिः-

**"यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः । (बृ. ३-४-१)"** अत्र श्रुतिवाक्ये ब्रह्मशब्दस्य यो मुख्योऽर्थः सः देशकालव्यवधान-रहितो नित्यमपरोक्षः परमार्थो भगवानिति निर्णीतः । किंच यो भगवान् स एवाऽस्माकं सर्वेषामपरोक्षः प्रत्यगात्मेति व्युत्पादितः । यत आत्मा नाम स्वरूपमेव । स्वस्य आत्मनः स्वरूपं अपरोक्षमेवेति सुप्रसिद्धमस्ति । यद्यपि केचिदज्ञा जनाः भार्यापुत्रधनादिषु गृहक्षेत्रपश्वादिषु च मोहातिशयेन अहमित्यभिमानं कुर्वन्ति । अन्ये विवेकिनोऽपि लौकिकाः देहेन्द्रियप्राणमनोबुद्धिषु अहमित्यभिमानेन तत्रतत्राऽऽत्मबुद्धिं कुर्वन्ति । अहमागतः । अहं पश्यामि । अहं जीवामि । अहं क्षुधितोऽहं तृषितः । अहं मन्ये । अहं निश्चिनोमि । इत्येवं व्यवहारेण स्वस्मादन्यस्मिन् वस्तुनि आत्मबुद्धिः अहंशब्द प्रयोगः प्रत्ययश्च दृश्यते । एवं लोकदृष्ट्या व्यवहारे सत्यपि परमार्थदृष्ट्या भगवानेव परात्परः कर्तृत्वभोक्तृत्वविशिष्टजीवादन्तरात्मा सन् कल्पितबाह्यात्मभ्यो व्यतिरिक्तः प्रत्यक् सर्वात्मा भवति यतोऽतस्तमेव प्रसिद्धं मत्वा सूत्रे

अस्मिन्निति तमेव सूत्रकारो निर्दिशति । उपनिषदपि सर्वान्तरं तमेवाऽऽत्मशब्देन व्यपदिशति "अयमात्मा सर्वान्तर" इति ।

एवमेवाऽऽपस्तम्बादिस्मृतिषु भगवानेवाऽस्माकं सर्वेषामात्मेति वर्ण्यते । तथा हि - "पूः प्राणिनः सर्व एव गुहाशयस्य (आप.ध.सू. १-२२-४) सर्वे प्राणिनो गुहाशयस्य परमात्मनो वासस्थानपुराणि भवन्तीति । किंच - आत्मलाभान्न परं विद्यते । (आप.ध.सू १-२२-२) आत्मप्राप्तेरधिकोऽन्यो लाभो न विद्यत इत्युक्त्या भगवानेवाऽऽत्मत्वेनाऽभिहितः । एवमेव -

*आत्मा क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर्गुणैः ।*
*तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः ॥*

इति च पुराणे प्रकृतिगुणैः युक्तमात्मानं क्षेत्रज्ञं वदन्ति, गुणरहितं तमेव परमात्मानं कथयन्तीत्युक्तम् । किं च - ममाऽन्तरात्मा तव च ये चाऽन्ये देहसंस्थिताः । (मो.ध. ३५१-४) मम च तव च देहिनां सर्वेषां चाऽन्तरात्मा परमात्मैवेति महाभारतेऽभिहितम् । एवं विष्णुपुराणेऽपि -

*विस्तारः सर्वभूतस्य विष्णोः सर्वमिदं जगत् ।*
*द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥* *(वि.पु. १-१७-८४)*

सर्वमिदं जगत् सर्वभूतमयस्य विष्णोर्विभूतिमात्रम् । अतो विवेकिनः इदं सर्वं आत्मनोऽभेदेन पश्यन्तु इति प्रह्लादो वदति ।

*एकः समस्तं यदिहाऽस्ति किञ्चित्*
*तदच्युतो नास्ति परं ततोऽन्यत् ।*
*सोऽहं स च त्वं स च सर्वमेत-*
*दात्मस्वरूपं त्यज भेदमोहम् ॥* *(वि.पु. २-१६-२३)*

यद्यदिहाऽस्तीति प्रतीयते तत्सर्वमेक एव परमात्मा स एवाऽच्युतो देवः । तद्व्यतिरिक्तं न किञ्चिदिहाऽस्ति । स एवाऽहम् । स एव त्वम् । तथा स एव सर्वम् । अतो भेदमोहं सन्त्यजेति तत्त्वविदो निदाघस्य उपदेशोपन्यासस्तत्रैव ।

एवं श्रुतिस्मृतिपुराणेषु भगवानेव परमार्थात्मतत्त्वमिति प्रसिद्धत्वेन शास्त्रप्रसिद्धिं मनसि कृत्वा श्रीनारदः सूत्रेऽस्मिन्निति सर्वनाम प्रायुङ्क्तेत्यवगम्यते ।

## 'अस्मिन्' इति सर्वनामैव किमर्थं गृहीतम् ?

७. अस्तु तावच्छास्त्रप्रसिद्धिः । तथापि "परमात्मनि" "ईश्वरे" "भगवति" इत्यन्यतमं शास्त्रीयशब्दमेव कुतो न प्रयुञ्जीत इति चेत् - अत्र सर्वनामोपादानमेव युक्ततरं मन्यामहे । यत्कारणं - सर्वस्याऽपि नाम सर्वनाम भवति । सर्वं हि भगवान् ।

किंच परमात्मनः सगुणं निर्गुणं, साकारं निराकारं चेति पृथक् पृथग्रूपाणि भवन्ति । तत्तद्रूपविशेषप्रत्यभिज्ञानायैव सत्यं ज्ञानमानन्दः नित्यशुद्धबुद्धमुक्तमक्षरं ब्रह्म परमेश्वरो विष्णुः शिवः शक्तिर्महादेवी गणेशः सवितेत्यादीनि नामानि सहस्रशः श्रुतिस्मृति पुराणेषु कल्पितानि सन्ति । तेष्वेकैका संज्ञा एकमेकं विशेषरूपमेव प्रत्याययति । तथा हि - सत्यमित्युक्ते कालत्रयाबाध्यमविक्रियं वस्तु ज्ञाप्यते । एवं ज्ञानमित्युक्तेऽखण्डमविक्रियं चैतन्यम् । आनन्द इत्युक्ते निरतिशयं सुखम् । नित्यशुद्धबुद्धमुक्तमित्युक्ते निर्मलमसङ्गं सर्वज्ञं सर्वोपाधिरहितं वस्तु ज्ञाप्यते । अक्षरमित्यनेन नाशरहितं, ब्रह्मेत्यनेन निरतिशयं महत्, परमेश्वर इत्यनेन सर्वस्वतन्त्रो देवदेवः, विष्णुरित्यनेन सर्वव्याप्तः, शिव इत्यनेन नित्यमङ्गलस्वरूपः, शक्तिरित्यनेन सर्वकार्यसमर्थं मूलकारणं, महादेवीत्यनेन सर्वजगद्धात्री, गणेश इत्यनेन देहेन्द्रियगणस्याऽधिपतिः, सवितेत्यनेन जगत्सूतिः कर्मफलोत्पत्तिकर्ता ।

इत्येवं तत्तन्नाम्ना तत्तदर्थावगतिरेव भवति । सर्वनाम्ना तु सर्वेषां नाम सर्वनामेति निरुक्त्या सर्वार्थोपसङ्ग्रहो भवति । अतोऽत्राऽस्मिन्निति सर्वनामशब्दः सुतरामुपपन्नः ।

किंच सर्वनामान्तरं मुक्त्वा अस्मिन्निति इदंशब्दस्यैव ग्रहणे किंकारणमिति चेत् तत्रापि किञ्चिदाकूतमस्ति । पूर्वोक्तप्रकारेण शास्त्रप्रसिद्धार्थकस्तावदिदंशब्दः । अयमात्मा ब्रह्मेत्यादिवाक्येषु प्रसिद्ध-वाचकत्वेन प्रयुक्तत्वात्, भगवतः सर्वत्र सर्वदाऽन्तर्यामित्वाच्च अत्यन्तसमीपस्थे वस्तुनि अस्मिन्निति निर्देश एव आञ्जस इति । एतेन सर्वस्याऽऽत्मानः सतः तस्य देशान्तरेषु अन्वेषणप्रयासो नास्ति । यतः स स्वान्तरेव समस्तीत्यतः साधकस्य तदन्वेषणे विस्रम्भः स्यात् इत्यपि सूचितम् । इत्थं च प्रसिद्धार्थवाचिनस्तथा सन्निकृष्टार्थबोधकस्य इदंशब्दस्य ग्रहणेऽभिसन्धिः ।

एतेन, उपनिषदि ***"पश्यत्स्विहैव निहितं गुहायाम् (मुं. उ. ३-१-७)"*** इत्यत्रोक्तोऽर्थः, तथा **"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुनतिष्ठति (गी. १८-६१)"** इति भगवदुपदेशश्च स्मारितो भवति ।

## परमप्रेमरूपेत्यस्य विवरणम्

८. गीर्वाणभाषायां भक्तिशब्दस्याऽनेके अर्थाः सम्भवन्ति । कस्यचन सामविशेषस्य भक्तिरितिनाम । शब्दशास्त्रे अर्थान्तरप्रयुक्तस्य शब्दस्य उपचारवृत्त्याऽर्थवर्णनस्थले भक्तिशब्दं प्रयुञ्जते । लोकव्यवहारे गुरुषु महत्तरेषु च पुरुषेण क्रियमाणा प्रीतिः भक्तिरित्यभिलप्यते । सेवार्थकभज्धातोर्निष्पन्नो भक्तिशब्द इति कृत्वा सेवाकर्मणि प्रेम्णः अवश्यं भावित्वेन तस्याऽपि प्रेमवाचित्वं संस्फुरति । मातृभक्तिः पितृभक्तिः गुरुभक्तिः राजभक्तिः राष्ट्रभक्तिरित्यादौ पूज्यभावकृतं प्रेम इत्येवाऽस्य अर्थोऽङ्गीकरणीयः । परं त्वत्रशास्त्रे भगवत्येव प्रवृत्तो रतिभावो भक्तिरित्यन्यादृश एवाऽर्थोऽभिप्रेतः ।

अत्र प्रेम्णः परमेति विशेषणं कृतं ननु । तद्विशेषणं विशेषतो निध्यातव्यम् । मातापितरौ पशुधनादिकं तथा परस्परं जायापतीत्यादयो लौकिकाः पदार्थाः अस्माकमपेक्षिताः उपकुर्वाणाश्च सन्तीति ते प्रियाः भवन्ति । अतस्तेष्वस्माकं प्रेमाऽस्तीति यद्यपि वक्तुं शक्यते । परं तु अत्राऽस्ति विशेषः । अस्माकं वस्तुनि व्यक्तौ वा या प्रीतिर्विद्यते सा अस्माकमात्मार्थैव भवति । अतश्च सा न तदर्था भवति । आत्म-प्रीतिस्तु न तथाऽन्यार्था क्वचित् । अत आत्मनि प्रवृत्ता या प्रीतिः सा निर्निमित्ता निरुपाधिका च । ततश्चाऽन्यप्रीतिः सोपाधिका सापेक्षा । आत्मप्रीतिस्तु निरतिशया भवति । अत एव श्रुतिरुपदिशति -

*तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मेति ।*
*(बृ. आ. १-४-८)*

निरतिशयप्रेमास्पदोऽयमात्मा सर्वस्याऽपि देहान्तरेव विनिहित इति । लौकिकानुभवेनाऽपि एषोऽर्थः स्पष्टः । मनुष्यात्मनः परमात्मैव परमार्थो यतोऽतो यदात्मनि निरूढं प्रेम, तदन्ततोगत्वा सर्वान्तरे परमात्मन्येव प्रवर्तितमित्यवसीयते । प्रेम्ण ईदृशं तत्त्वमविदित्वा कारणानभिज्ञाः मनुष्याः मिथ्याकल्पितात्मनि बाह्यविषयेषु च प्रीतिं निदधते । एतद्विपर्ययेणाऽस्माकं सर्वेषां मुख्ये आत्मनि भगवति प्रीतिः प्रवर्तिता चेत् सा प्रीतिरेव भक्तिरित्यभिधीयते । अत एवाऽस्मिन् सूत्रे परमप्रेमरूपेति स्वरूपलक्षणमभिहितम् ।

## भक्तेः प्रकारद्वयम्

९. पत्रपुष्पफलादीनां श्रद्धया भगवदर्पणे तथाऽर्चने, वेदाध्ययनस्तोत्र पाठादौ च प्रीतिभावो विद्यत एवेति सोऽपि भक्तिशब्देनाऽभिलप्यते । किंतु सोऽस्य शास्त्रस्य न मुख्यो विषयः । या तु सकलेन्द्रियाणि बाह्यविषयेभ्यः परावृत्य भगवत्येव एकस्रोतस्तया मनोवृत्तिर्निधीयते तदेतन्निरवधिकं प्रेम भवति, सा खलु भक्तिरिति अस्य शास्त्रस्य विवक्षितो विषयः । सा खलु

परभक्तिः मुख्यभक्तिरेकान्तभक्तिरिति शब्दैः परिख्यायते । एतत्सूचनायैव परमप्रेमरूपेति लक्षणं विहितम् । पूजास्तोत्रपाठादिभिः भगवति प्रवृत्ताया भक्तेः गौणभक्तिरिति नाम । भक्तिं व्याख्यास्याम इति प्रथमसूत्रोक्ता भक्तिः परमप्रेमरूपत्वेन यद्यपि परभक्तिरेव । तथापि राजासौ आगच्छतीत्युक्ते यथा तत्परिवारोऽप्यागच्छतीत्युक्तमेव भवति तथाऽस्मिन् शास्त्रे मुख्याङ्गभूता गौणभक्तिरपि निरूपिता भवति । किं तु शास्त्रतात्पर्यं न तत्र । विविक्षितं परभक्तावेव तात्पर्यम् । भगवति परप्रेमैव भक्तिशब्दस्य मुख्योऽर्थः । स एवाऽस्य शास्त्रस्य विषयः ॥

## 'तु' शब्दार्थ विवरणम्

१०. सूत्रे सा तु इत्युक्तम् । अत्र तुशब्दस्य क आशय इति चेत् - अस्य शास्त्रस्य मुख्ये विषये भक्तितत्त्वे सम्भाव्यमानानामाक्षेपाणां प्रसक्तिपूर्वकं तदुत्तराणि चाऽभिधीयन्त इति सूचयितुम् । तादृशाक्षेपान् कांश्चन प्रस्तुत्य वयं पूर्वसूत्रस्थपदपदार्थविवरणपरिपाट्या अपानुदाम । पुनरन्यान्याक्षेपाणां तत्र तत्र समाधानान्यभिधास्यामः ।

इत्थं च सात्वस्मिन् परमप्रेमरूपेति चतुर्भिः पदैः यावन्तोऽर्थविशेषा उद्दिष्टा विवृताश्च, तेषां मनसि पुनः पुनर्मननेन जिज्ञासूनां लाभो महान् भविष्यतीति । सूत्रं नाम -

*अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।*
*अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥*

इत्युक्तप्रकारेण १. मितप्रायं वचनम् २. संशयराहित्येनाऽर्थ प्रकाशनम् ३. सारवत्वेन अर्थाभिधानम् ४. एकेन वचसा बहूनामर्थानां संसूचनम् ५. व्यर्थापार्थकशब्दराहित्यम् ६. वाक्ये वाक्यार्थे च दोषराहित्यमिति इयद्गुणविशिष्टं वाक्यं सूत्रं वदन्ति ।

एवं च भगवति प्रवर्तितं परमं प्रेमैव भक्तिः । तया भक्त्या परम

पुरुषार्थलाभो भविष्यतीतीदं सकलपरिकरपुरस्सरं निरूपयाम इत्येषः द्वयोः सूत्रयोः समुदितोऽर्थः ।

## भक्तिविषये कश्चनाक्षेपः

११. यद्यपि प्रेम भगवति प्रवृत्तमिति बाह्यविषयप्रेमवत् न तस्मिन् दोषाः सम्भवेयुः । बाह्यविषयाणामनित्यत्वेन, पुनश्च तेषां सम्पादने, रक्षणे, विनाशशङ्कया च मनःक्लेशस्य प्रसक्तिरस्ति । भगवान् तु "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः" इति गीतोक्तिरीत्या तस्मिन् नित्ये सर्वव्यापिनि अचलप्रतिष्ठे प्रवर्तितं यत् परप्रेम तत् परमानन्दरूपं च सम्भाव्यते । तथापि तत् प्रेम काचन मनोवृत्तिः खलु । मनोवृत्तेश्चैष स्वभावः यत् वृत्त्यन्तरोद्भवपर्यन्तमेव सा तिष्ठति । सा चिरस्थायिनीति प्रत्याशैव नास्ति । ततश्च आद्यन्तवत्या तया प्रेमवृत्त्या नित्यानन्दलाभः कथं स्यात् ? अथ नित्यो न भवति चेत् सः कथं परमपुरुषार्थः ? इति विशयः ।

अस्याऽऽक्षेपस्य उत्तरं पूर्वसूत्रे परमप्रेमरूपेत्यत्र रूपशब्देनैव सूचितमस्ति । कथमिति चेत् - यद्यपि भक्तिः मनोवृत्तिरूपा, तथापि सा न सर्वैरनुभूयमानलौकिकप्रेमरूपा । किं तु अन्यदेव तत्स्वरूपम् । यत्कारणम् -

## अमृतस्वरूपा च ॥३॥

१२. लोकप्रसिद्धप्रेम्णोऽस्या भक्तेश्च किं वैलक्षण्यमिति चेत् - लोके सञ्जायमानं प्रेम विषयेन्द्रियसन्निकर्षेण जाता काचन मनोवृत्तिर्भवति । यद्रूपो विषयस्तद्रूपैव मनसो वृत्तिर्जायते । विषय ज्ञानोत्पत्तिकाले सर्वत्र ईदृशमिदं तत्तादृशमिति विषयविकल्पनं संशीतिः विषयनिश्चयः इत्येवंक्रमेण तत्तद्विषये अहंममेत्यभिमान इत्याद्या विकाररूपा मनोवृत्तयो जायन्ते । अत्र श्रुतिः -

*कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रध्दा धृतिरधृतिर्ह्रीर्धीर्भी-रित्येतत्सर्वं मन एव।* *(बृ.आ.उ. १-५-३)*

कामः सङ्कल्पः संशयः विश्वासोऽविश्वासः दार्ढ्यमदार्ढ्यं लज्जा बुद्धिः भयमित्येतानि मनोवृत्तिरूपाणीति ज्ञापयति । एता वृत्तयो यैर्निमित्तैः सञ्जायन्ते ते बाह्या विषयाः । ते प्रतिक्षणविपरिणामिनो भावाः । मनश्च प्रचलं, न जातु स्थिरम् । अतो न काचन वृत्तिश्चिरस्थायिनी । लौकिक प्रेमवृत्तिरपि तथैव । अत एव लोके कस्मिंश्चिद्विषये प्रेम्णि सञ्जाते स्वप्रेमकारणं वस्तु कदाचिन्नश्येदिति अथवा स्वप्रेमास्पदं वस्तु स्वप्रतिकूलतया कदाचिद्विपरिणम्य रूपान्तरमापद्येतेति अथवा स्वानुकूलं वस्तु क्वचित्कदाचिदन्योऽपहृत्य दूरं नयेदिति अथवा कच्चित् स्वमन एव प्रेमवस्तुनो विरज्येतेति जनाः सदा भीता एव तिष्ठन्ति । एवं च लौकिके प्रेमविषये वास्तवं कल्पितं वा भयमस्त्येव ।

अत्राऽस्माभिर्जिज्ञापयिषिता भक्तिस्तु न तथा । साऽन्यादृश्येव । लोके विषयनिमित्तेन सञ्जातं क्षणिकं यत्सुखं तत् पुण्यवशाद्भवति । तद्वृत्तिसमये तत्र नित्यप्रेम्णोऽंशः पुण्यवशात् प्रकाशते । अतश्चाऽनित्याया अपि सुखवृत्तेः प्रेमेति नाम भवति । यदा पुण्यविपाकेन मनश्चाञ्चल्यं हित्वा क्षणं स्थिरं तिष्ठति तदा तस्मिन्मनसि मनोवृत्तौ च यथार्थः सर्वान्तरः आत्मानन्द अञ्जसा प्रतिफलति । एतत्प्रति-च्छायारूपमेव विषयसुखं सुखं वदति लोकः । अस्य सुखस्य यत्पुण्यं निमित्तं तत्पुण्यमल्पतरं भवति यतोऽ तस्तत्सुखमपि अल्पतरमेव ।

ये तु श्रद्धादिभिः स्वमनो भगवत्येव केन्द्रीकर्तुमभ्यस्यन्ति तेषामेवाऽऽत्मानन्दो भूयसाऽभिव्यज्यते । तदात्वे निर्मलं मनः आत्माकारमेव भवति । तत्र चात्मा प्रतिफलति । तत्समये

मनोवृत्तिस्तथात्मा च ऐकरूप्यमाप्नुतः । ताद्रूप्येण परिणता सा वृत्तिरथवा तद्वृत्त्याधारभूत आत्मानन्द एव भक्तिरिति प्रसिद्धनाम्नाऽभिधीयते । एवं सति आत्मानन्दाकारा वृत्तिः स्वयं क्षणिका इति लयं गताऽपि तत्राऽऽत्मानन्दो नित्यस्थायीत्यतो मनस्युद्भूतप्रेमवृत्तेः प्रकाशः प्रतितिष्ठत्येव । एवमत्र परमप्रेमरूपा भक्तिः तदालम्बनस्तदास्पदं परमात्मा च एकभावमापन्नाविति नात्र भक्तिनाशभयस्य कारणमस्ति । परमभक्तस्य मनस्तु परमानन्दरूपस्याऽऽत्मनः स्वरूपमेव भवतीति तेन रूपेणाऽमृतरूपमेवास्ति यतोऽतः तां मनोवृत्तिं भक्तिममृतस्वरूपा इति च निगदन्ति ।

भक्तस्याऽऽत्मा तत्त्वतः सर्वात्मैव भवति । आत्मनि भेदाभावात् । स च सच्चित्सुखरूपो ब्रह्मात्मा वस्तुतो जन्मरहितः सर्वव्यापकोऽजरोऽमरोऽभयोऽमृतः । यत्कारणम् सभक्त स्वात्मनस्तस्य ब्रह्मणश्च भेदो नास्तीति सम्यग् विजानात्यभेदं साक्षात्पश्यति च । श्रुतिः - ***स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माऽभयं वै ब्रह्माऽभयं हि ब्रह्म भवति य एवं वेद । (बृ.उ. ४-४-२५)*** इति परमार्थतत्त्वं परमपुरुषार्थस्थितिं चोद्घोषयति ।

## प्रेम्णो द्वे रूपे

१३. एवं दीर्घविवरणेन मन्तव्यं किमिति चेत् - ध्यानं चिन्तनमुपासनं भजनं भावनं वेदनमित्यादिशब्दानामर्थरूपा मनोवृत्तीः, तासां फलरूपं प्रेम च भक्तिशब्देनैव व्यपदिशन्ति शास्त्राणि । अस्या मनोवृत्तिरूपाया गौणभक्तेः क्रियारूपत्वेन तत्प्रेम कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम् । एषा भक्तिः उपासकपुरुषस्य इच्छाधीनाऽस्तीत्यतः तां स्थिरीकर्तुं ध्येये भगवति यत्नपुरस्सरमेव मनो निधातव्यं भवति । यदा

चोपासकः तेनैवाऽभ्यासेन साधनदशामतिक्रम्य गौणभक्तेः फलरूपां परप्रेमाख्यां भक्तिमाविर्भावयति तदा तस्य भगवान् भक्तिः भक्त इति रूपत्रयमपि प्रविलीय भगवत्स्वरूपमखण्डमेकमेवाऽवशिष्यते । अत्रोदाहरणार्थम् - परभक्तः प्रह्लादः पित्रा हिरण्यकशिपुना चित्रहिंसासु योजितोऽपि न व्यचलत् । तस्य भक्तिः नालुप्यत । अपि तु स्थिरीभूता स्थितेत्यस्य कारणं, तस्य मनोवृत्तिः प्रेमास्पदेन भगवता अभेदभावमापन्ना इत्येवाऽवगन्तव्यम् । पुनश्च स हिरण्यकशिपुरतीव क्रुद्धः तं प्रह्लादं समुद्रजले मज्जयित्वा तदुपरि शिलाप्रस्तरादिकं निधापयामास यदा, तदापि तस्य बालस्य भगवत्प्रेम निश्चलमेवाऽऽसीत् । सोऽपि अविकल एवाऽऽस्त । इत्यत्र कारणं यत् निरन्तरोपासनतत्परः सः निध्यायन् भगवति ऐकात्म्यं गत आसीदिति । यतश्चैवमुदीरयन्नेवाऽऽसीत्सः -

*ॐ नमो विष्णवे तस्मै नमस्तस्मै पुनः पुनः ।*
*यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः ।।*
*सर्वगत्वादनन्तस्य स एवाऽहमवस्थितः ।*
*मत्तः सर्वमहं सर्वं मयि सर्वं सनातने ।।*
*अहमेवाऽक्षयो नित्यः परमात्माऽऽत्मसंश्रयः ।*
*ब्रह्मसंज्ञोऽहमेवाऽग्रे तथाऽन्ते च परः पुमान् ।।*

(वि.पु. १-१९-८४)

निर्भरमेवं संस्मरन् सः दृढभावेन तन्मयतयाऽवस्थितोऽभवत् ।

यतश्चैवं ततो भक्तस्य प्रेमभावः भक्तप्रियस्य भगवतः परमानन्दभावश्च अभेदरूपमेकमेव भवति । एतदेकीभावरूपं प्रेम न पुरुषेण नूत्नतया प्रयत्नेन सम्पादनीयम् । यतो - "रसो वै स" इत्युक्तरीत्या परमात्मनः स आनन्दभावः न प्रयत्नकृतः । परमानन्दरूपेणैव नित्यं स्थितः सः । एवं च शास्त्रोक्तप्रकारेण क्रियमाणायाः भक्तिवृत्तेः,

भगवत्साक्षात्कारेण प्राप्तस्याऽऽनन्दस्य च प्रेम भक्तिरित्यभिलप्यमानेऽपि साधनरूपमेकं ; अपरं फलरूपमिति न विस्मर्तव्यम् ।

# ४. भक्तेः फलम्

## यल्लब्ध्वा पुमान् सिद्धो भवत्यमृतो भवति तृप्तो भवति ।।४।।

### 'यत्' इत्यस्य विवरणम्

१४. भक्तिशब्दो यद्यपि स्त्रीलिङ्गः । अत्र यत् इति नपुंसकलिङ्गशब्देन कुतः तत्परामर्शः कृत इति चेत् - पूर्वोक्तायाः भक्तेः अमृतस्वरूपेति विशेषणे दार्ढ्यमभिधातुमिति ज्ञेयम् । अपक्षयरहितां परमप्रेमरूपां भक्तिं भगवति यः प्रकरोति, तस्य फलप्राप्तिरनेन सूत्रेणोच्यते । प्रथमसूत्रे भक्तिप्रयोजनम् अतश्शब्देन सामान्यरूपेण सूचितमपि पुनरत्र एतच्छास्त्राध्येतॄणां भक्तानां ईदृशानेकफलानि सिद्ध्यन्तीति शिष्यजनप्रोचनाय विविधं फलमाह सूत्रकारः ।

### लब्ध्वेत्यस्य विवरणम्

१५. भक्तिः परमप्रेमरूपा । साच वस्तुत आत्मानन्दरूपैवेति प्रतिपाद्य पुनरिदानीं प्राप्तव्यार्थकस्य लब्ध्वेति शब्दस्य प्रयोगः कथं युज्यते ? इति कस्यचन आशङ्का स्यात् । तस्य परिहारः क इति चेत् - भक्तिरात्मानन्दरूपेति सत्यम् । अथापि पुरुषस्य व्यवहारावस्थायाम् अहङ्कारेण तत्स्वरूपम् आवृतं भवतीति पूर्वमेव (क्रम सं २) अवादिष्म । तेनैवाऽहङ्कारसम्बन्धेन जनानां परमार्थो न प्रकाशते । अहमिति अल्परूपो जीवाकार एवाऽनुभूयते । एवमयत्नतः प्रतीयमानं मायारूपमेव स्वस्वरूपमिति मत्वा भ्रान्त्यैव जीवाः संसारे परिभ्रमन्ति । एवं

च नित्यसिद्धाऽपि भक्तिः पुरुषेणाऽप्राप्तेवाऽस्ति । वयं देहादिरूपा इति मन्यमानानामज्ञानिनां दृष्ट्या अप्राप्तं स्वपरमार्थामृतस्वरूपं नूतनतया तैः प्राप्तव्यं भवति । सा परमप्रेमरूपा वृत्तिरपि प्रायेण व्यवहारदशायां न सर्वेषां स्वभावतः सम्भवति । तस्या वृत्तेः प्रतिबन्धकाः तिरस्कारकाश्च रागद्वेषादिभावा बहवो विद्यन्ते । अतः प्रयत्नेन तान् प्रतिबन्धकान् अपनुद्य नियतैः साधनोपायैः भगवत्प्रेम सम्पादयितव्यं भवति । एवमुभयथाऽपि भक्तिः प्रयत्नपुरस्सरमेव सम्पादयितव्येति कृत्वा यल्लब्ध्वेति सूत्रकारोक्तिर्युक्तैव ।

## पुमानित्यस्यार्थः

१६. अत्र काचन शङ्का स्यात् । पुमानिति श्रुत्या स्त्रीणां भक्तौ नाधिकार इति ध्वन्यत इति । अस्या आशङ्कायाः परिहारोऽयम् - स्त्रीणामपि भक्तावधिकारोऽस्ति । अयमंशः उत्तरत्र २१ तमे सूत्रे व्रजगोपिकास्त्रीदृष्टान्तोपादानेन स्पष्टो भविष्यति । वस्तुतो भक्तावीदृशा एवाऽधिकारिण इति नियमो नास्ति । सर्वेऽपि स्वस्वोचितमार्गमनुसृत्य भगवद्भक्तिं कृत्वा धन्या भवेयुरिति स्पष्टमग्रे ।

प्रकृते तु प्रयुक्तः पुमान् शब्दः मनुष्यसामान्यवाचीति मन्तव्यम् । "स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः" इति कोशकारोक्तप्रकारेण पुमान् पुरुष इति शब्दौ मनुष्यसामान्यवचनौ भवतः । शास्त्रदृष्ट्या तु आत्मानाम न पुरुषो नापिस्त्री । तथाहि विष्णुपुराणे -

*पुमांस्त्री गौरजा वाजी कुञ्जरो विहगस्तरुः ।*
*देहेषु लोकसंज्ञेयं विज्ञेया कर्महेतुषु ॥*
*पुमान् नदेवो न नरो न पशुर्न च पादपः ।*
*शरीराकृतिभेदास्तु भूपैते कर्मयोनयः ।* (वि. पु. २-१३-९७)

अतः सूत्रकारस्याऽत्र पुंस्शब्दप्रयोगे न पुरुषाभिधाने तात्पर्यं,

किंतु मनुष्यस्यैव शास्त्रोक्तानां साधनानामनुष्ठाने योग्यतावशात् विशेषतो अधिकारो भवतीति ज्ञापनमात्रे तात्पर्यमिति विभावनीयम् ।

तर्हि तस्य शब्दस्य अनुपादानमेव वरमासीन्ननु । अथवा मनुष्यः इति प्रसिद्धं शब्दमेव कुतो न प्रायुङ्क्त ? पुंस्शब्दस्यैव ग्रहणे किंप्रयोजनं इति चेत् सूत्रकारस्याऽत्र किञ्चनेङ्गितं भवति । एवमन्तःकृतपुरुषार्थ-कस्य मनुष्याभिधानशब्दस्य ग्रहणेन पुरुषविषये वक्तव्यांश उरु भवतीति सूचितमेव । तत्किमिति चेत्-लोकस्थित्यन्तरेषु स्त्रीभ्योऽपि पुंरुषस्य योग्यतावशात् अधिकं सौकर्यमस्ति । विद्याध्ययने प्रवृत्तः पुरुषः पठनं लेखनं गणितं शास्त्रमित्यादीनां अभ्यासे एव दीर्घकालं मनो निधाय तत्र च कौशलं सम्पाद्य जनसभासु सर्वकारेषु वा स्वविद्यावैभवं प्रदर्श्य धनपारितोषिककीर्त्यादीन् समार्जयन् यथेष्टमहं स्वकुटुम्बं निर्वहामीति प्रायेण उत्सिक्तो भवेत् । वेदवेदाङ्गानां तत्त्वशास्त्रादी-नामध्ययने स्वात्मनो विशिष्टोऽधिकारोऽस्तीति गर्वं कुर्यात् । कवितादिभिः स्वकलाप्रौढिं प्रदर्श्य सर्वान् वशीकरिष्यामीति निरङ्कुशभावेन दृप्तो भवेत् । योगविधिनिष्णातोऽष्टसिद्धीर्वशीकृत्य अथवा देवतोपासनेन सिद्धिं प्राप्य स्वतन्त्रः कामचारी भवेत् । एते प्रकाराः सर्वेऽपि सन्मार्गपरिपन्थिन एव । ईदृशानर्थापत्तिः प्रायेण पुरुषाणामेव अधिकाधिकतया सम्भविष्यतीति तान् प्रति सूचयित्वा अयि भो मर्त्याः, लोकभाग्यानि न स्थिराणि, वैभवं चञ्चलम्, आयुः क्षणिकम्, अस्मिन् जीवितकाले सम्पत्सु आपत्सु च समः स्थित्वा यो धीरः नित्यानन्दसिद्धिं अधिगच्छति स एवोत्तमः पुरुषः, तस्य जन्म कृतकृत्यमिति अवबोधनं कर्तव्यमित्यभिप्रायेणैव पुमानिति पदमुपात्तमिति ध्येयम् ।

## सिद्धो भवतीत्यस्य विवरणम्

१७. भक्त्या सिद्धो भवतीत्येतत् अन्यसिद्धिवन्न मन्तव्यम् ।

योगसिद्धिः तपस्सिद्धिः मन्त्रसिद्धिरित्यादिषु सिद्धिर्यथा भवति न तथा भक्त्या सिद्धिः । केचन सिद्धिमहिम्ना देवयोनिषु सिद्धाख्यं जन्म प्राप्नुवन्ति । तेषां सिद्धिः अन्तकाले नश्यति । प्रकृते सिद्धिर्नाम भगवन्मयो भूत्वा तत्स्वरूपेणैवाऽवस्थानरूपा नित्यसिद्धिरेव । अस्य सिद्धिमतः पुरुषस्य अन्याः सिद्धयोऽयत्नेनैव स्ववशा भवन्ति । यस्मात् कारणात् - भगवत्यसन्निहिताः सिद्धयः कुतस्तरां स्युः । एवं स्थिते भगवत्स्वरूपेणाऽवस्थितस्य भक्तस्य अन्यासु सिद्धिषु का वा स्पृहा स्यात् ?

जातुचित् श्रीदेवीभक्तः कश्चन निर्धन आसीत् । तं दृष्ट्वा महालक्ष्मीः तस्मिन् अनुकम्पया अष्टसिद्धीरुद्दिश्य तद्भक्तगृहं गच्छत, तदाज्ञां च पालयतेति आदिदेश । तदा ताः सिद्धयः सुन्दरयुवतीरूपाणि धृत्वा तस्य भक्तस्य गृहमागच्छन् । स महात्मा तत्समये गृहेऽसन्निहितः, कुत्रचित् बहिर्गत आसीत् । प्रत्यावृत्तः सः ता युवतीः दृष्ट्वा - भवत्यः काः ? यूयं किमर्थमत्राऽऽगताः ? इत्यपृच्छत् । तदा सिद्ध्यभिमानिन्यो देवतास्ताः तस्मै महालक्ष्मीनिदेशं व्यज्ञापयन् । स पुनः पप्रच्छ - यूयं तर्हि मद्वचनं पालयथ ननु इति । महाप्रसादः । भवदाज्ञापालनायैव वयं सज्जास्तिष्ठाम इति ताः प्रत्यब्रुवन् । तदा स वदति स्म किल - तर्हि यूयमिदानीमेव मम गृहान्निर्गच्छत । पुनः कदापि नेह प्रत्यागच्छत । इति । एवमेकान्तभक्ताः कामपि सिद्धिं नाऽभिलषन्ति । ताः सर्वा सिद्धयः तैः सम्प्राप्तायां परभक्तिरूपमहासिद्धावेव अन्तर्भूता भवन्ति । अत्रविषये भगवान् स्वयमेवं प्राह-

*न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ।*
*न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनाऽन्यत् ॥*

(भाग. ११-१४-१४)

भगवति क्रियमाणं प्रेम (भक्तिः) एतादृशी सिद्धिर्भवति ।

अत्र कश्चन विशेषः । भक्ताः मोक्षमपि न काङ्क्षन्ति इति हि भगवानाह । अत्र कोऽभिप्राय इति चेत् - स्थाने ह्येतत् । यतो राजा कुलशेखरोनाम भक्तो भगवत्येवं प्रार्थयते -

*नाऽहं वन्दे तवचरणयोर्द्वन्द्वमद्वन्द्वहेतोः*
*कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।*
*रम्यारामामृदुतनुलतानन्दने नाऽपि रन्तुं*
*भावे भावे हृदयभवने भावयेयं भवन्तम् ॥ (मुकुन्दमालास्तुतिः)*

एवं भक्तो ह्यनवरतमेव स्वहृदये भगवन्तं निध्यातुमेवाऽभिवाञ्छति । एवं तस्य भगवत्येव लब्धे मोक्षं विना कोऽन्यः पुरुषार्थो भवेत् ? अनिच्छतोऽपि भक्तस्य भगवत्प्राप्तिरूपा नित्यसिद्धिः करफलायते ।

## अमृतो भवतीत्यस्य विवरणम्

१८. अमृतस्वरूपे भगवति यः परिनिष्ठितो भक्तः, सोऽमृतो भवतीत्येतत् स्वाभाविकमेव । परंत्वत्र प्रेमरूपभगवत्प्राप्तिर्नाम दूरप्रयाणं कृत्वा ग्रामप्राप्तिवदिति न विभावनीयम् । स्वाज्ञानापनोदनक्षमं यद्ब्रह्मज्ञानं, तद्विषयो भगवानेव ममाऽऽत्मेत्यनुभव एव भगवत्प्राप्तिरिति मन्तव्यम् । एवमेव श्रुतिस्मृत्यादय उद्घोषयन्ति ।

*स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति । नाऽस्याऽब्रह्मवित् कुले भवति । तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ (मुं ३-२-९)*

इति मुण्डकश्रुतिरुपदिशति ।

*पूः प्राणिनः सर्व एव गुहाशयस्याऽहन्यमानस्य विकल्मषस्य ।*
*अचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः । (आप.ध.सू. १-२-२४)*

चलेषु देहेषु प्रतिष्ठितमचलमात्मानं ये ज्ञात्वा ध्यायन्ति ते

अमृता भवन्ति इत्यापस्तम्बः प्रतिबोधयति । एवं विदिततत्त्वो भक्तोऽमृतो भवति ।

## तृप्तो भवतीत्यस्य विवरणम्

१९. एतां भक्तिं प्राप्य तृप्तश्च भवति । अत्र तृप्तिर्नाम न लौकिकी तृप्तिः । लोके हि जनाः सुखं प्राप्तुं इष्टविषयाणां योगक्षेमवार्तासु निरता भवन्ति । तथाऽनिष्टान् विषयान् दूरीकर्तुं दुःखपरिहाराय प्रयतन्ते च । एवं कर्माधिकृताः कर्मिणोऽपि परत्र प्रतिकूलं नरकं परिहृत्याऽनुकूलस्वर्गप्राप्तिरस्त्विति श्रमनिर्वर्त्यमानानि कर्माणि कुर्वन्ति । अन्ये केचित् समाधिसुखकामाः योगसिद्धिप्राप्तिमनीषया योगाभ्यासेषु परिश्राम्यन्ति । परं तु तत्राऽन्यतमस्याऽपि पुरुषस्य आत्यन्तिकत्वेन प्राप्तव्यं प्राप्तमिति वा, परिहार्यं परिहृतमिति वा ज्ञातव्यं सर्वं ज्ञातमिति वा, कर्तव्यं सर्वं कृतमिति वा, तृप्तिबुद्धिर्न जायते । किंतु यो भगवत्स्वरूपे सुनिष्ठितो भक्तः, सः कर्म कुर्वन्वाऽकुर्वन्वा समस्तिष्ठति । तस्य मनः सर्वदाऽनाकुलं वर्तते । सम्भ्रमो व्याकुलता चिन्ता उत्कण्ठेत्यादयो विकाराः तस्य समीपमपि नोपसर्पन्ति । सः भगवति निष्ठां गतोऽतः बाह्ये कर्मणि न प्रवर्तते । नैष्कर्म्यसिद्धिं गतस्य तस्याऽऽप्तकामस्य -

***नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।*** *(गी. ३-१८)*

इत्येवं नित्यतृप्तिर्भवति । अत एव

***त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ॥*** *(गी. ४-२०)*

इति गीतोक्तप्रकारेण भक्तः आत्मना क्रियमाणानि सर्वाणि कर्माणि भगवत्येवाऽर्पयति यतोऽतस्तस्य न फलेष्वासक्तिर्विद्यते । एवं नित्यतृप्ता भक्ताः ऐहिकमामुष्मिकं न किमपि कांक्षन्ति । स्वाभीष्टसिद्ध्यर्थं वा न कञ्चन समाश्रयन्ति । ईदृशी हि आप्तकामता, सैव भक्तस्य तृप्तिः ।

# यत्प्राप्य न किञ्चिद् वाञ्छति न शोचति न द्वेष्टि न रमते नोत्साहीभवति ॥५॥

## न किञ्चिद् वाञ्छति न शोचति इत्यस्य विवरणम्

२०. परभक्तो भक्तिं लब्ध्वा तृप्तो भवतीति विधिमुखेनोक्तमेव व्यतिरेकमुखेन वक्तुमिदानीं प्रक्रमते । देशान्तरं प्रस्थितो मनुष्यः प्रयाणेन गम्यस्थानप्राप्त्यनन्तरं पूर्वक्रान्तमार्गविषये अथवा स्वोपयुक्त-यानवाहनादिषु कामप्यास्थामकुर्वन् स्वोद्दिष्टस्थानप्राप्तिरभूत्किलेति तृप्तस्तिष्ठति । यानवाहनादिसाधनेषु उदासीनो भवति । एतन्निदर्शनेन विवक्षितं विवृणोति ।

नदीं तीर्त्वा परं पारंगतः, "तरणसमये आरूढाया नावो वर्णः मनोज्ञ आसीत् । अतः पुनस्तां नावमारुह्य पर्यटामीति" नामूढः कश्चनेच्छति । तथैव भक्तः पूर्वं शरीरस्थित्यर्थं यान् यान् विषयानभुङ्क्त, तेषु विषयेषु पुनः न मनः प्रसञ्जयति । गृहस्थः कश्चन आपणं गत्वा अपेक्षितं वस्तु क्रीत्वा गृहमागतः स्वाभिमतपदार्थो लब्ध इति तृप्तो भवति, स्वहस्तस्थं रूप्यकनाणकमतीव उज्ज्वलमासीत्, बहुश्रमेणाऽऽर्जितमासीत्, तन्मया नाशितमिति न शोचति । तथैव भक्तः भक्तिलाभात्प्राक् यत् देहेन्द्रियादि जगद्विषयजातमनर्घममन्यत, तदुत्तरं तन्नाशेऽपि न संतप्यते ।

## न द्वेष्टि न रमते इत्यस्य विवरणम्

२१. एवमेव भक्तिप्राप्तेः पूर्वं शोभनबुध्द्या केचन पदार्थाः प्रायेण प्रिया भवेयुः । अथवा अशोभनबुद्ध्या अन्ये पदार्थाः प्रायेणाऽप्रिया भवेयुः । वस्तुषु गुणबुद्धिः दोषबुद्धिश्च व्यवहारभेदहेतुर्भवति । गुणसहितत्वभावनया प्रिया इति, दोषसहितत्वभावनया अप्रिया इति व्यवहारवैषम्यं सञ्जायते । परंतु सर्वव्यवहारातीतानां भगवत्येव

 

सम्प्राप्तप्रेम्णां महात्मनां बाह्यविषयेषु न गुणबुद्धिर्नाऽपि दोषबुद्धिरुदेति । यथा हि भगवान् उद्धवं भक्तं प्रति उपदिदेश -

*किं वर्णितेन बहुना लक्षणं गुणदोषयोः ।*
*गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ॥ (भाग. ११-१९-४५)*

गुणः कः ? दोषः कः ? इति बहुना वर्णितेन किं प्रयोजनम् ? एकेनैव वचनेन यदि ब्रवीमि, तर्हि गुणो दोष इति भेददर्शनमेव दोषः । ईदृशभेदबुद्धिराहित्यमेव गुण इति जानीहीति । ईदृशी भक्तदृष्टिः । एवं गुणदोषपरिधिसीमातिक्रान्ते भगवत्प्रेम्णि तादात्म्येन स्थितो भक्तः किं वा कं वा द्वेष्टि ? तं भगवन्तं मुक्त्वा क्व वाऽन्यत्र रमेत !

## नोत्साहीभवतीत्यस्य विवरणम्

२२. उत्साहोनाम कस्मिंश्चिदपि कार्ये प्रवृत्तिरथवोद्यमः । व्यवहार काले रजोगुणप्राबल्यात् मनुष्यः इदं करिष्ये तत् करिष्यामीति उत्साहं वहति । एवं कार्यप्रवृत्तौ अनेन कार्येण ईदृशं फलं भवत्विति इच्छैव कारणं भवति । परंतु परभक्तः परमपुरुषार्थरूपां भगवत्प्राप्तिमुपलभ्य कृतकृत्यो यतोऽतस्तस्य कार्यमेव नावशिष्यते । फलेच्छाऽपि न । अत उत्साहस्य कारणमेव न भवति । स सर्वथा व्यवहारादुपरतो भूत्वा भगवत्येव सुनिष्ठित आस्ते । धन्यः स महात्मा इति ।

## गीतासु परिवर्णितानि भक्त लक्षणानि

२३. एतावन्मात्रमेव परभक्तलक्षणमिति न मन्तव्यम् । भगवद्-गीतासु द्वादशाध्यायोक्तान्यपि मनस्यालोडनेन भवति लाभो महान् । श्रीमच्छङ्करभगवत्पादाः भक्तियोगाध्यायस्य अवतरणिकायामेवं लिखन्ति -

"अक्षरोपासकानां सम्यग्दर्शननिष्ठानां संन्यासिनां त्यक्तसर्वैषणानां अद्वेष्टा सर्वभूतानामित्यादि" धर्मपूगं साक्षादमृतत्वसाधनं वक्ष्यामीति प्रवर्तते -

*अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।*
*निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ।।*
*सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।*
*मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ।।*
*यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।*
*हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ।।*
*अनपेक्षःशुचिर्दक्ष उदासीनो गतव्यथः ।*
*सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ।।*
*यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।*
*शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ।।*
*समः शत्रौ च मित्रे च तथा मानापमानयोः ।*
*शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ।।*
*तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।*
*अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ।।*
*ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।*
*श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ।।* *(गी. १२-१२)*

एषां श्लोकानां कण्ठपाठेन तथा तदर्थानुसन्धानेन च परभक्तेः महिमा सम्यगवगतो भवति । एतेषां श्लोकानामभिप्रायस्त्वेवम् - भक्तः सर्वत्र भगवन्तमेव पश्यति यतोऽतः सः यं कञ्चिदपि आत्मनोऽपकार कर्तारमपि न द्वेष्टि । स्वान्तिकमागन्तृन् सर्वानपि मित्रबुद्ध्याऽऽद्रियते । सुहृदो यथा परस्परं समभावेन पश्यन्तो मिथः प्रणयपुरस्सरं व्यवहरन्ति यथा वा योगक्षेमवार्तादिकं संल्लपन्ति तथैव भक्तः सर्वैर्जनैः समं संव्यवहरति । स्वयमन्योभ्यो श्रेष्ठ इति भावना तस्य मनसि कदापि नोद्भवति । संसारदुःखपतितानन्यान् दृष्ट्वा सोऽनुकम्पते ।

देहाद्यनात्मवस्तुषु अहंममाभिमानरहितस्तिष्ठति । सुखे दुःखे वा समापतिते हर्षामर्षभावं न प्रतिपद्यते । कदाचिद्बलाढ्यैस्ताडितोऽपि सहिष्णुः सः न मनोविकारं प्राप्नोति । देहधारणार्थं आहारपानीयादिकस्य लाभेऽलाभे वा समः सः यदृच्छालाभेनैव निरन्तरं समाहितमना भूत्वा शरीरेन्द्रियादि सकलं वशीकृत्य परमार्थ एकस्मिन् दृढनिश्चयः सन् स्वमनोबुद्धी भगवति अर्पयति । सः न कञ्चिदपि उद्वेजयति । तथाऽन्यनिमित्तेन नोद्विग्नो भवति । बाह्यैर्निमित्तैः हर्षं वा विषादं वा अन्यविषयेऽमर्षं वा भयं वा मनस्तापं वा नाप्नोति । देहेन्द्रियेषु तथा इन्द्रियार्थेषु यत्रकुत्रचिदपि निरीहः सन् निःस्पृहस्तिष्ठति । काये मनसि च सर्वदा शुचिर्वर्तते । यदृच्छया समापतितेषु कर्तव्यकर्मसु किं प्रतिपत्तव्यमित्यत्र झटिति निश्चेतुं सः शक्तो भवति । उदासीनः अर्थात् कस्यचन पक्षं न संश्रयते । न कुतश्चन बिभेति । इहामुत्रफलानपेक्षः सः सर्वाणि कर्माणि संन्यस्यति । इष्टप्राप्त्या न हृष्यति । अनिष्टापत्त्या न व्यथते । न किमपि शोचति, न काङ्क्षति । शुभान्यशुभानि वा कर्माणि इष्टापत्त्यर्थं न समाचरति । शत्रुमित्रयोः मानापमानयोः शीतोष्णयोः सुखदुःखयोः इत्यादिद्वन्द्वरूपयोः सम्मर्दे समभावेन वर्तयन् सर्वत्र अनासक्त्या तिष्ठति । निन्दास्तुतीत्यादि व्यर्थालापमकुर्वन् प्रायेण मौनव्रतं समाश्रयते । यदृच्छालाभसन्तुष्टः स नियतवासस्थानमपरिकल्प्य यत्र कुत्रापि तिष्ठन् परमार्थविषय एकस्मिन् स्थिरमतिर्भवति ।

एवं लक्षणानां विस्तरेण वर्णनकारणं चाऽन्त्ये श्लोके निजगाद भगवान् । इमानि भक्तलक्षणानि श्रुत्वा जातश्रद्धाः अधुनातनाः ये मुमुक्षवो जनाः निवृत्तिधर्माभिरुचिं वहन्ति, वयमपि तथैव भविष्याम इति मनीषया भगवत्येव यत्नेन मनो निधाय साधनान्यनुतिष्ठन्ति, तेऽपि भगवत्प्रियाः भविष्यन्तीति उपसंहारवाक्यतात्पर्यम् । अत्र च यो मद्भक्तः स मे प्रिय इति श्लोकान्तेषु ध्रुवपदयोजनेन भगवान् भक्त्यैव

तुष्यति नाऽन्यत्किञ्चिदपेक्षते इत्यभिज्ञाप्यते । उद्धवं प्रति भगवद्वचनेनाऽप्येषोऽर्थः स्फुटीकृतः -

*न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ।*
*न च सङ्कर्षणो न श्रीर्नैवाऽऽत्मा च यथा भवान् ॥*

*(भाग. ११-१४-१५)*

एतेनाऽर्थवादेन भगवतो भक्तादन्यः प्रियतरो न सम्भाव्यत इति मनसि लगति ।

## ज्ञानभक्त्योः सम्बन्धः

२४. अत्र काचन शङ्का । अहङ्कारं अपनुद्य परमपुरुषार्थ सिद्धिं प्रति ज्ञानमेकमावश्यकम् । तेन विना भक्तिमात्रेण तत्फलं नैव सेत्स्यति । यत्कारणम् - व्यवधानात्मक आवरणरूपो योऽहङ्कारः सः वास्तवश्चेत् न कथञ्चिदपि निवर्तेतैव । अतः रज्जौ प्रतीयमानसर्पवत् भ्रममात्रं अहमिति प्रतीतिः । तत्प्रतीत्यात्मकं मिथ्याज्ञानरूपमेव तमः । तन्निरसनसमर्थं तु सम्यग्ज्ञानमेकमेव । न तु भक्तिरिति केषाञ्चिदाक्षेपः ।

अस्य समाधानं कथमिति चेत् - परभक्तिर्नाम आत्माकारा वृत्तिः । आत्मा ज्ञानानन्दरूप इति श्रुत्यादयो ज्ञापयन्ति । तादृशात्मानुभवार्थं प्रेममयवृत्तिरेव आवश्यकी भवति । अन्यथा आनन्दोल्लास एव न स्यात् । परप्रेम तु अलौकिकम् । लोके तावत् वस्तुज्ञानोद्भवे तत्र प्रेमैव भवतीति न नियमः । यथा हि रज्जौ सर्पाकारा वृत्तिर्यदा जायते तत्राऽनुपदमेव भयवृत्तिर्जायते । न तु प्रेमवृत्तिः । आत्मविषये तु नैवम् । अलौकिकस्याऽऽत्मनः प्रतिबोधे अलौकिकप्रेमाकारा वृत्तिरपि अवश्यमुद्भवेदेव । न तावन्मात्रम् । आत्मावगतयेऽपि (तत्त्वज्ञानार्थम्) प्रेममयी वृत्तिरावश्यकी । अन्यथा तत्त्वज्ञानमेव न जायते । अत एव गीतासु भगवानाह -

*ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।*
*समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥*
*भक्त्या मामभिजानाति यावान् यश्चाऽस्मि तत्त्वतः ।*
*ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥* (गी. १८-५४, ५५)

ब्रह्मभूतः पुरुषः यदा स्वान्तःकरणे प्रसन्नो भूत्वा शोककांक्षादिकं परित्यजति, सर्वभूतेषु समभावं चाप्नोति, तदा मयि वासुदेवे परभक्त्याख्यं प्रेम लभते । तया भक्त्या "अहं वासुदेव आत्मा यावन्महिमा यत्स्वरूपश्चेतीदं" अपरोक्षेणैव सम्पश्यन् तेनैव तत्त्वज्ञानेन मयि लीयते । इति ।

## यज्ज्ञात्वा मत्तो भवति स्तब्धो भवत्याऽऽत्मारामो भवति ॥६॥

अवगतभक्तितत्त्वो भक्तः आत्मारामो भवति ।

### मत्तो भवतीत्यस्य विवरणम्

२५. एतत्प्रेमामृतमनुभवन् भक्तः स्वदेहं विस्मरति । पीतमद्यो मत्तो यथा वर्तते तथैवाऽस्याऽपि लोके वर्तनं भवति । तदुक्तं भागवते

*देहं च नश्वरमवस्थितमुत्थितं वा*
*सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम् ।*
*दैवादपेतमुत दैववशादुपेतं वासो*
*यथा परिकृतं मदिरामदान्धः ॥* (भाग. ११.१३.३६.)

एवं ह्यस्य स्थितिर्भवति ।

### स्तब्धो भवतीत्यस्य विवरणम्

२६. एवं स्वशरीरसंज्ञारहितो भक्तो भगवत्येव मनो निधाय यत्र

क्काऽप्याऽऽसितः जड इव तिष्ठति । तस्य देहयात्रा कथं प्रचलतीति चेत् श्रुतावस्य कश्चन दृष्टान्तो दत्तः -

*नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त एवमेवाऽयमस्मिन् शरीरे प्राणो युक्तः । (छां. ८-१२-३)*

ज्ञानी भक्तः स्वशरीरं किञ्चिदपि न स्मरन् तिष्ठत्यथापि यथा सुशिक्षितो वृषभ अश्वो वा अढौकितोऽपि नियन्तरि तूष्णीं स्थितेऽपि पूर्वसञ्चारिताभ्यासेन स्वयं पुरश्चलित्वा शकटं गम्यस्थानं प्रापयति तथैव प्रारब्धकर्मवशात् तस्य देहव्यापाराः देहान्तरङ्गव्यापाराश्च प्राणशक्तिवशात् स्वयं प्रचलन्ति । अतस्तज्जीवननिर्वाहस्य न काऽप्यनुपपत्तिर्भवति । इति ।

२७. एवं स्थितोऽपि सः सत्यमेव प्रज्ञाहीन इति वा प्रमत्त इति वा न मन्तव्यः । लोके इतरे जनाः व्यवहारविषये यथा जागरूका भवन्ति तथा बाह्यविषये भक्तः न जागरूक इति तु सत्यम् । लौकिकाः व्यवहारे स्वयं जागरूका इति मन्यमाना अपि परमार्थतः ते स्वप्नदृश्यदर्शनवत् मुधा पश्यन्ति । विचार्यमाणे स्वप्नदृश्यस्य जाग्रद्दृश्यस्य च न कोऽपि भेदोऽस्ति । एतद् वास्तवस्थितिं लोको न जानाति । प्राज्ञस्तु विजानाति । सः जाग्रद्विषयः सत्य इति न मन्यते । अत उदासीनवत्तिष्ठति । लौकिकास्तु परमार्थविषये न जागरूकाः, अत एव ते तत् सत्यस्वरूपं न पश्यन्ति । भक्तस्तत्र जागरूको यतोऽतः तत्सत्यं वस्तु सम्यक् पश्यति । यथोक्तं गीतासु भगवता -

*या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।*
*यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।। (गी. २-६९)*

यस्मिन् परमार्थवस्तुनि अन्येषां प्राणिनां कृष्णरात्राविव तम आवृणोति तस्मिन् विषये जितेन्द्रियो ज्ञानी भक्तः जागर्ति, अर्थात् जागरावस्थायामिव प्रकाशमानं तत्त्वं परिपश्यति । अन्ये यस्मिन्स्वप्ने

जागरवत् विषयोपभोगव्यवहारे जाग्रति, अर्थात् प्रकाशकाले वस्तूनि पश्यन्ति यथा, तथा तस्मिन् मोहमयव्यवहारे प्राज्ञः न पश्यति, अर्थात् निशातमसीव नाऽवलोकनकर्ता भवति । कुतः ? यतः स महात्मा सर्वमिदं जगत् स्वप्नमायोपममिति निश्चित्य बाह्यव्यवहारे न प्रसज्जते । (निशायामिव उपरतस्तिष्ठति) । उद्धवं प्रति भगवानवर्णयदेवम् -

*विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते ।*
*मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥*
*तस्मादसदभिध्यानं यथा स्वप्नमनोरथम् ।*
*हित्वा मयि समाधत्स्व मनो मद्भावभावितम् ॥*

*(भाग. ११.१४.२७)*

हे उद्धव, विषयचिन्तानिरतानां चित्तं विषयेषु रमते, तेष्वासक्तं भवति । मामनुस्मरतः चित्तं मय्येव निमज्ज्य विलीनं भवति । (अर्थात् अमनस्कतासिद्धिः) तस्मात् त्वं स्वप्नमनोरथादिष्विव मिथ्याप्रतीयमानानां लौकिकविषयाणां चिन्तां त्यक्त्वा भक्त्या मनो मन्मयमापाद्य मय्येव सन्निधापयेति । भक्तः लौकिकैः उन्मत्तवत् दृश्यमानोऽपि न स उन्मत्तः । किं तु तस्याऽशयः अन्यथैव भवति । अत्र श्रुतिः -

*अव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः (जा. उ. ६) इति ।*

उपनिषदुक्तप्रकारेण वेषाचारादिना केनचिदपि प्रकारेण भक्तान् अभिज्ञातुं न शक्यते । ते अनुन्मत्ता अपि जनदृष्ट्या तेषामाचारः उन्मत्तानामिव परिदृश्यते ।

## आत्मारामो भवतीत्यस्य विवरणम्

२८. कस्याञ्चिच्चिन्तायां मग्नः पुरुषः तूष्णीं स्थित इव लक्ष्यमाणोऽपि सः यथा परमार्थतः न तूष्णीं स्थितः, यथा वा सारथिः

खलीनाकर्षणबलेन अश्वमचलं स्थापयत्यपि प्रेक्षकदृष्ट्या अश्वः स्वयमेव निश्चलः तिष्ठतीति प्रतीयते, तथैव भक्तः तूष्णीं स्थित इव दृश्यमानोऽपि सोऽलसवत् नैवाऽऽस्ते । अत्र श्रुतिः -

*स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्*
*आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः*
*स स्वराड् भवति । (छां ७-२५-२) इत्यवगमयति ।*

अत्रोक्तरीत्या ज्ञानीभक्तः सर्वत्राऽऽत्मानमेव पश्यन् सन् आत्मन्येव रत्या आत्मना क्रीडन् आत्मन्येव सङ्गम्य निर्निमित्तमेव आत्मानन्द मनुभवन् सर्वस्वतन्त्रः स्वाराज्यसुखं निर्विशति इति ।

# ५. भक्तेः कामस्य च वैलक्षण्यम्

## सा न कामयमाना निरोधरूपत्वात् ।।७।।

अनेन सूत्रेण भक्तेः कामस्य च वैलक्षण्यं प्रतिपादयति । यतश्च शब्देन अर्थेन लक्षणेन प्रतीत्या व्यवहारेण इति पञ्चभिः प्रकारैः भिद्यते ।

### न कामयमाना इत्यस्य विवरणम्

२९. अत्र कश्चन सन्देह उद्भवेत् - भक्तिः भगवति परमप्रेमेत्युक्तं खलु । इदमपि प्रेम कामरूपमेव स्यात् । इच्छायाः प्रार्थनारूपत्वात् । इच्छारूपः स काम एव संसारबन्धनस्य कारणमिति शास्त्राण्यावेदयन्ति । एवं च परमात्मन्यपि कृता भक्तिः कामरूपा यतोऽतः सा कथं परम पुरुषार्थसाधनं भवेत् ? इति । किंच मनुष्योऽनिच्छन्नपि केन प्रयुक्तः पापकर्माऽऽचरतीति अर्जुनेन सम्पृष्टः श्रीकृष्णः प्रत्युवाच -

*काम एष क्रोध एष रजोगुणसमुद्भवः ।*
*महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।।　　(गी. ३-३७)*

वैरी सन् काम एव मनुष्येण कुकृत्यानि कारयतीति । किं च

*यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।*
*तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ।। (मो.ध. १७५-४६)*

इह लोके कामोपभोगकृतं सुखं, यच्च परत्र स्वर्गे पुण्यकर्ममहिम्ना **लभ्यं** महत्सुखम् इति द्वयमपि त्यक्तकामेन योगिनाऽनुभूयमानस्य आनन्दाख्यस्य सुखस्य पादार्धार्धांशमात्रसुखेनाऽपि न समं स्यादिति स्मृतिकाराः समामनन्ति । कामान् कामयमानस्य युक्तितोऽपि शान्तिः कुतः ? क्वा सुखम् ? यतः -

*कामबन्धनमेवेदं नान्यदस्तीह बन्धनम् ।*
*कामबन्धनमुक्तो हि ब्रह्मभूयाय कल्पते ।। (मो.ध. २५१-७)*

एष संसारक्लेशः सर्वोऽपि कामबन्धनकृत एव । नान्यद् बन्धनं नाम किञ्चित् । यस्तु कामबन्धनान्मुक्तः सः पुनर्जन्मरहितं मोक्षपदमश्नुते । इति इच्छारूपं कामं बहुधा निन्दन्ति महत्तराः । एवं च कामरूपमेतत्प्रेम भगवत्प्राप्तये साधनं कथं स्यादिति सन्देहः ।

अयमाक्षेपः कामप्रेम्णोर्वैलक्षण्यज्ञानाभावादुद्गतोऽस्ति । एतत्सन्देह परिहारायैव सूत्रकारः प्राह - निरोधरूपत्वादिति ।

३०. एतद् भगवत्प्रेम तु सर्वकामानामवसानरूपं भवति इति । अत्रश्रुतिः -

*प्राप्याऽन्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुन-रेत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माऽप्येति । (बृ.आ.उप. ४-४-६) तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात् सर्वस्मात् ।*
*(बृ.आ.उप. १-४-८)*

कामी पुरुषः कामवशः सन् कर्माणि कृत्वा प्रेत्य परलोके कृतकर्मफलानि भोगेन क्षपयित्वा पुनरस्मिन् लोके प्राप्तजन्मा पुनः पुनः

कर्मस्वेवाऽभिप्रवर्तते । एवं च संसारचक्रे परिवर्तते । परं तु कामरहितो ज्ञानीभक्तः न पुनरावर्तते । यस्मात्कारणात्-तस्य कामा एव न सन्ति, भगवत्प्राप्त्यैव लब्धाः कामाः, अत एव स आप्तकामः । स एवाऽकामो भवति । तस्य पुनर्जन्मैव नास्ति । न किमपि बन्धनं वर्तते । सः भगवद्रूपः सन् भगवत्येव संविशति । अप्राप्तवस्तुप्राप्तीच्छा खलु कामो नाम । आत्मा तु सर्वस्याऽपि नित्यप्राप्त एव भवति । अतो भक्तिः न कामात्मिका ।

एष आत्मा नाम पुत्रवित्तादिभ्योऽपि प्रेयानितिश्रुतिः कामस्य भगवत्प्रेम्णश्च महद्वैलक्षण्यमुद्घोषयति । अतो भक्तिः न कामात्मिका ।

३१. निरोधोनाम सकलकामानां त्यागः इति । इत्युक्तं श्रुत्वा लौकिकाः केचनाऽत्र प्रत्यवतिष्ठन्ते । सकलकामत्यागः जीवतः कस्य वा सम्भवति ? लोके जीवन् पुरुषः यद्यत्कर्म करोति तत्सर्वं काममूलकमेव भवति । मनुस्मृतौ- ''यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितमिति'' समर्थितमस्ति । एवं ह्येतत् । यद्यपि केषाञ्चित्कर्मणां यथा- उच्छ्वासनिःश्वासौ, हृदयनाडीस्पन्द इत्यादिकर्मणां पुरुषेच्छा न कारणमित्यापाततः प्रतिभाति । तत्रापि मूलपरीक्षणे तेषामपि कर्मणां पुरुषेच्छैव कारणमित्यभ्युपगन्तव्यं भवति । कथमिति चेत् - कदाचिदिच्छया प्रयत्नेन श्वासं निरोध्दुं शक्नोत्येव । अतो जीवनेच्छयैव पुरुषः श्वसिति । किं च योगसिद्धाः कतिचित्कालपर्यन्तं स्वहृदय स्पन्दनमपि संस्तम्भयितुं प्रभवन्ति । एवं च प्राणिनां सकलकर्माणि इच्छामूलकान्येवेति निश्चेतुं शक्यते । ननु केचित् समाजसेवकाः परोपकारे निर्भराः सन्ति, तेषां कतमः काम इति चेत् - तेषामपि स्वचित्तानन्दे अथवा तत्कारणे यशसि कामो भवत्येव । एवं तर्हि भक्ताः कामान् त्यजन्तीति जयन्तीति च कथं उच्यत इति चेत् उत्तरमाह सूत्रकारः -

## निरोधस्तु लोकवेदव्यापारन्यासः ।।८।।

३२. निरोधो नाम लौकिकानां वैदिकानां च सर्वेषां कर्मणां त्यागः । तत्र कर्माणि द्विविधानि भवन्ति । कानिचित् लौकिकानि इहलोकव्यवहारावश्यकानि । अन्यान्यपि परलोकसुखसम्बन्धीनि वैदिकानि कर्माणि । एतयोर्द्वयोरपि तत्तल्लोकभोगोद्देश्यकाः कामा एव कारणम् । एतद्रहस्यं विजानतः त्यक्तोभयलोककामस्य भगवदभिमुखस्य सतः भक्तस्य वस्तुतः कर्मापेक्षैव नास्ति । यतः -

*इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ।*
*भवन्ति वै भागवतस्य राजन् ततः परां शान्तिमुपैति साक्षात् ।।*

(भाग. ११-२-४३)

इति राजानं निमिं प्रति कविनाम्ना योगिना उक्तप्रकारेण भागवतोत्तमस्य भक्तिः विरक्तिः भगवत्तत्त्वज्ञानं च सममेव सञ्जायत इत्यतः सः किमर्थं कर्माणि कुर्वीत । अपरं च -

*देहस्थोऽपि न देहस्थो विद्वान् स्वप्नाद्यथोत्थितः ।*
*अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग् यथा ।।*
*इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च ।*
*गृह्यमाणेष्वहङ्कुर्यान्न विद्वान् यस्त्वविक्रियः ।।*
*दैवाधीने शरीरेऽस्मिन् गुणभाव्येन कर्मणा ।*
*वर्तमानोऽबुधस्तत्र कर्ताऽस्मीति निबद्ध्यते ।।*
*एवं विरक्तः शयने आसनाटनमज्जने ।*
*दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ।।*
*न तथा बध्यते विद्वांस्तत्र तत्रादयन् गुणान् ।*
*प्रकृतिस्थोऽ प्यसंसक्तो यथा खं सविताऽनिलः ।।*

(भाग ११-८-१२)

इति भागवतोक्तरीत्या यो भगवत्तत्त्ववित् सः देहे वर्तमानोऽपि स्वप्नादुत्थितः पुरुषः स्वप्नदेहे यथा निरभिमानो वर्तते, तथैव ज्ञानी देहादिव्यवहारे निरभिमानो वर्तते । अज्ञपुरुषस्तु वस्तुतोऽविद्यमानेऽपि देहे स्वप्नदर्शीव देहाभिमान्येव तिष्ठति । गुणात्मकानीन्द्रियाणि गुणमयेषु विषयेषु प्रसक्तान्यपि ज्ञानी भक्तः तेषु कर्मसु निरभिमानी यतोऽतः इमानि कर्माणि मम इत्यभिमानं न करोति । सुप्तो वा आसीनो वा सञ्चरन् वा स्नानमाचरन्वा पश्यन् वा स्पृशन् वा जिघ्रन् वा भुञ्जानो वा शृण्वन् वा सर्वथा गुणमयेष्विन्द्रियेषु तत्तत्कर्माणि कुर्वत्सु ज्ञानी स्वयमसक्तो यतोऽतः सः बन्धनरहित एव तिष्ठति । यथा सूर्यो वा वायुर्वा आकाशसम्पर्करहितावेव तिष्ठतः तथैव ज्ञानी देहादिप्रकृतिँस्थ इव प्रतीयमानोऽपि वस्तुतः तदसंसक्त एव । सर्वत्राऽवस्थितोऽप्याकाशो न केनचिदपि वस्तुना सम्बद्धोभवति, यथा वा सूर्यः सर्ववस्तूनि प्रकाशयन्नपि प्रकाश्यवस्तुगतैः गुणैर्दोषैर्वा न लिप्यते, यथा वा वायुः गन्धधूल्यादीनि स्थानात् स्थानान्तरं संनयन्नपि स्वयं गन्धधूल्यादिभिर्न लिप्यते, तथैव विवेकी पुरुषः कर्माणि कुर्वाणोऽपि न कस्यचित् कर्मणः कर्ता भवति । इत्थं च कामानुबन्धिनां लौकिकवैदिककर्मणां संन्यासेन तत्सम्बन्धाभावात् भक्तस्य भक्तिः सर्वकामानां निरोधरूपा भवतीति ।

## त्यागसंन्यासशब्दार्थ विवेकः

३३. अत्र केचित् - लोकवेदव्यापारसंन्यासो नाम कर्माणि कृत्वा तत्फलस्य त्याग इति अर्थं कल्पयन्ति । तेषां "सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः" (गी. १८-२) इति वचनमेवाधारः । गीतासु अष्टादशाध्याये कृते संवादे त्यागसंन्यासशब्दार्थविवेकः कृत इति तु सत्यम् । किंतु तत्रैकांशमङ्गीकृत्य प्रकृते लोकवेदव्यापारन्यासशब्दस्य अर्थनिर्णयो न युक्तः । सर्वान् ग्रन्थसन्दर्भान् परिशीलयैव अर्थनिर्णयो न्याय्यः । संन्यासस्य त्यागस्य च विविक्तं तत्त्वं ब्रूहीति कृतस्य

अर्जुनप्रश्नस्य केचित्पक्षे काम्यकर्मणां त्यागः संन्यासवचनः, सर्वकर्मफलत्याग एव त्यागशब्दाभिधेय इति वक्तव्यं स्यात् । एतदुत्तरानन्तरमपि पक्षभेद उपन्यस्तः "कर्माणि त्यक्तव्यानीति केचित्, यज्ञदानतपःकर्म न त्याज्यमित्यन्ये" इति । एवं मतभेदे स्थिते नित्यानि कर्माणि न त्यक्तव्यानि, सङ्गत्यागफलत्यागपूर्वकं कर्तव्यान्येवेति भगवान् स्वसिद्धान्तमुद्ग्राहयामास । एवं "यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयत" इति पर्यन्तस्य ग्रन्थस्य एषः निश्चितोऽर्थः । परं त्वस्मिन् ग्रन्थभागे त्यागशब्दस्य प्रहाणमित्येवाऽर्थः स्पष्टः । यस्मात् कारणात् - कर्माणि कर्तव्यानि वा त्याज्यानि वा इत्येव प्रश्नस्वरूपम् । न तु कर्मफलं त्याज्यं वा न वेति । यतः न विचारणार्होऽयं प्रश्नः । परं तदुत्तरश्लोके कृत्स्नकर्मत्यागिनां संन्यासिनामेव प्रशंसा श्रूयते । यथा -

***अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।***
***भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥*** *(गी. १८-१२)*

अत्र च कर्मिणां परत्र कर्मानुगुणानि इष्टानिष्टमिश्ररूपाणि फलानि भवन्ति । त्यक्तसर्वकर्मणां परमार्थसंन्यासिनां कामाभावेन न किमपि फलं भवतीति परमसिद्धान्तमेव भगवान् प्रादर्शयत् । एवं च संन्यासत्यागशब्दयोरुभयोरपि प्रहाणमित्येवाऽर्थ इति पर्यवस्यति । तदुत्तरं च -

***तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।***
***पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥*** *(गी. १८-१६)*

इत्यत्र शरीरं कर्तृ करणं प्राणचेष्टाः तथा दैवमिति पञ्चाऽपि कर्मकारणानीति उपदिश्य केवलस्य शुद्धस्याऽऽत्मनः कर्तृत्वमेव न सम्भवति, यस्तु कर्तृत्वमस्तीति मन्यते सोऽज्ञानी दुर्मतिरिति सन्दूष्य परमात्मन्येव सुनिष्ठितस्य कर्तव्यं किमपि नास्तीति सिद्धान्तमेव

प्रोद्बलयति । इत्थं चाऽत्र को निर्णय इति चेत् - मुमुक्षुरज्ञानी पुरुषः कर्माणि कुर्वीत सङ्गं फलं च त्यजेत् । भक्तस्य ज्ञानिनः न्यायतो न किमपि कर्माऽस्तीति सः सर्वं कर्म परित्यजति । भागवतवाक्यप्रमाणेन च भक्तस्य कर्तृत्वं न सम्भवतीत्येतत् पूर्वमेव प्रदर्शितमस्ति । तत्र भागवते -

*नैष्कर्म्यमप्यच्युतभाववर्जितं*
*न शोभते ज्ञानमलं निरञ्जनम् ॥* *(भाग. १-५-१२)*

भगवद्भक्तिं विनाकृतः केवलबाह्यसंन्यासो न शोभत इति निन्दित एव । अतः त्यागसंन्यासशब्दयोरेकार्थतैव युक्ता । एवं च सूत्रस्थन्यासशब्दस्य लोकवेदव्यापाराणां त्याग इत्येवाऽर्थ आञ्जसः । ततश्च फलत्याग एव संन्यास इति वदतां मतं न पेशलमिति । किं च काम्यानां कर्मणां न्यासं संन्यासं विदुरित्यस्मिन्नेव श्लोके न्यासो नाम काम्यकर्मत्याग इत्युक्तत्वेन एतत्सूत्रस्थन्यासशब्दस्यापि काम्य-कर्मत्याग इत्येवाऽर्थो वक्तव्यः स्यात् । सोऽर्थस्तेषामपि नेष्ट एव । अतः परभक्तः व्यवहारदृष्ट्याऽपि वीक्षमाणे स्वार्थाय न किञ्चन कर्म करोति । तस्याऽस्मिन् लोके परलोके वा प्राप्तव्यफलकामनाभावेन सः सर्वाणि कर्माणि सन्त्यजति । अयमेवाऽऽशयः गीतासु समर्थितः -

*यस्त्वाऽऽत्मरतिरेव स्यादात्मतृप्तश्च मानवः ।*
*आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥* *(गी. ३-१७) इति ।*

परमार्थदृष्ट्या तु आत्मनि कर्तृत्वमेव नास्तीत्यतः भक्तः कर्म कुर्वन्निव बहिः प्रतीयमानोऽपि वस्तुतः न किमपि करोति । एष एव लोकवेदव्यापारन्यासः ।

## तस्मिन्ननन्यता तद्विरोधिषूदासीनता ॥९॥

## अन्याश्रयाणां त्यागोऽनन्यता ।।१०।।

## लोकवेदेषु तदनुकूलाचरणं तद्विरोधिषूदासीनता ।।११।।

## अनन्यता इत्यस्य विवरणम्

३४. लोकवेदव्यापारन्यास इत्युक्त्या सर्वात्मना कर्मत्याग एव उक्तः स्यात् । एवं चेत् - नास्तिकास्तावत् शास्त्रीयकर्माणि न कुर्वन्त्येव । न तावन्मात्रेण तेषां कर्मसंन्यासः सम्भवति । तर्हि किं नाम कर्मसंन्यास इति चेत् स एष विधिः पुनरत्र विव्रियते । भक्तस्य कर्मनिरोधः न केवलं कर्मत्यागेन सिद्ध्यति । यत्कारणम् - तस्मिन्निरोधे द्वावंशौ भवतः । तत्र अनन्यता एकोंऽशः । अपरोंऽशः औदासीन्यम् । भगवति अनन्यता तावद्दशम सूत्रेणोक्ता । अन्याश्रयत्यागपूर्वकं भगवदाश्रयणमेव अनन्यतेति ।

लोके सर्वे संसारिणः यत्किञ्चिद्वस्तु वा यं कञ्चित्पुरुषं वा यां काञ्चिद्देवतां वा समाश्रित्य तदाश्रयणेन स्वसमीहितार्थं सम्पादयाम इति प्रयतमाना दृश्यन्ते । दरिद्राः धनार्थं धनिनः समाश्रयन्ते । रोगार्ताः वैद्यान् प्रति धावन्ति । केचन विवादव्यवहारकारणात् तत्परिहारार्थं न्यायवादिनां शरणं प्रपन्नाः । अन्ये स्वजीवनमनुकूलयितुकामाः सर्वकारं तदधिकारिणो वा अवलम्बन्ते । पुनरपरे पारलौकिकेष्टसिद्धये देवताः समाश्रयन्ति । इत्थमेव लोकस्थितिः । भक्तस्तु -

*नैव तस्य कृतेनाऽर्थो नाऽकृतेनेह कश्चन ।*
*न चाऽस्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ।।* (गी. ३-१८)

इति भगवदुक्तरीत्या इष्टप्राप्त्यर्थं तत्त्वज्ञानार्थं भक्तिनिष्ठासिद्ध्यर्थं वा न कञ्चित् समाश्रयति, न वा किञ्चित्कर्म करोति । अथवा प्रातिकूल्यनिवारणार्थं न किञ्चन कर्म जिहासति । ब्रह्मादिस्थावरान्तेषु न

कमप्याश्रयते । परं भगवन्तमेव भजते । एवं हि भक्तस्य अन्याश्रयत्यागोऽनन्यता च ।

## तद्विरोधिषूदासीनता इत्यस्य विवरणम्

३५. इदानीं नवमसूत्रोक्तं तद्विरोधिषूदासीनतापदार्थं परिचिनुमः । तद्विरोधिष्विति पदे विगृहीते तस्य भगवतः विरोधीनि प्रतिकूलानि यानि, तेष्विति, अथवा तदनन्यतायाः प्रतिकूलानि यानि तेष्विति च वक्तुं शक्यते । किं तु अनयोर्विकल्पयोः प्रथमोऽर्थः नाऽऽञ्जसः । यत्कारणम्-भगवतः अनुकूलं न किञ्चनास्ति, प्रतिकूलं च न सम्भवति । भगवता एवमुक्तम् -

*समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।*
*ये भजन्ति तु मां भक्त्या मयि ते तेषु चाऽप्यहम् ।।* (गी. ९-२९)

अतो द्वितीयार्थमाश्रित्य आशयो वर्णनीयः । भगवदनन्यतायाः परिपन्थिरूपान् स्थावरजङ्गमात्मकान् पदार्थान् स्वेष्टानिष्टप्राप्ति परिहाराय न कदापि समाश्रयेत । लौकिकवैदिककर्मसु तदनन्यतायाः अनुकूलान्येव कर्माणि समाचरन् तदन्यकर्माणि सर्वथा परिवर्जयन् वर्तेत । इदमेव हि तद्विरोधिषु औदासीन्यम् ।

*यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।*
*यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।।* (गी ९-२७)

इति गीतासु भगवता अर्जुनं प्रति लौकिकमेव कर्मोद्दिश्य कथितम् । एवं च लौकिककर्मानुष्ठानसमये इदं कर्म करिष्य इति सङ्कल्प-मकुर्वन्, अवश्यकर्तव्यत्वेनाऽऽपतितं कर्म अनासक्त्या निर्वर्तयन्, तत्र कर्मफलत्वेन प्राप्तं सुखं वा दुःखं वा अप्रतीकारपूर्वकमनुभवेत् । तत्र च सम्भावितं कर्तृत्वं भोक्तृत्वं च आत्मनि आत्मसंबन्धित्वेन अगणयन् सर्वं कर्म भगवति समर्पयेत् ।/एवं लौकिकशास्त्रीयकर्मसु अनुष्ठितेषु -

*शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।*
*संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥* (गी. ९-२८)

एवं गीतोक्तरीत्या कर्मयोगोपायेन कर्माण्यनुतिष्ठन् साधकः कर्मबन्धं विहाय भगवत्समर्पणरूपेण कर्मसंन्यासयोगमहिम्ना देहान्ते भगवन्तमेव समुपैष्यति । इतीदं साधकदृष्ट्या अभिहितम् । प्रकृतं तु यो भगवद्भक्तः सः -

*सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।*
*अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥* (गी. १८-२०)
*मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।*
*सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥* (गी. १८-२६)

इति गीतोक्तरीत्या सात्त्विकज्ञानवान् सात्त्विककर्तृत्ववान् च भूत्वा भगवति अनन्यतानुगुणान्येव लौकिककर्माणि करोति । प्रतिकूलानि वर्जयति । इदमेव तद्विरोधिषूदासीनता इत्यभिधीयते । अत एव भक्तस्य भक्तिः कामानां निरोधरूपेत्युक्तं युक्तमेव ।

३६. अत्र काचन शङ्का । पूर्वमष्टमसूत्रे लोकवेदव्यापारत्यागः निरोधः इत्युक्त्वा, अत्र अनन्यतानुकूलकर्मानुष्ठानमेव निरोध इति प्रतिपादनं कथं सङ्गच्छत इति चेत् । नैष दोषः । यस्माद् भक्तो निरन्तरं भगवच्चिन्तननिरतो भगवत्तत्त्वविच्च भवति, वस्तुतस्तस्य कर्तृत्वं भोक्तृत्वं वा न सम्भवत्येव । अतः परमार्थदृष्ट्या लोकवेदव्यापारत्याग इत्युक्तम् । इदानीं बाह्यदृष्ट्या भक्तः अनुगुणानि स्ववर्णाश्रमकर्माणि करोतीत्युक्तम् । भावसमाधिस्थो भक्तो यर्हि बहिर्मुखस्तदा लोकजनतायाः प्रमाणनिदर्शनार्थं वर्णाश्रमोचितकर्माणि कुर्वाणो वर्तत इत्यविरोधः । एवमपि तत्त्वज्ञस्य कर्तृत्वाभिमानाभावेन तत्कृतानि कर्माणि -

*ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।*
*ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।।* (गी. ४-२४)

इत्युक्तरीत्या यदि तत्त्वज्ञो गृहस्थस्तर्हि तस्य यज्ञादिसकलकर्माणि ससाधनफलानि भगवन्मयान्येव सम्पद्यन्ते । एवमेव ब्रह्मचर्ये वानप्रस्थे यत्याश्रमे वा तिष्ठन् तत्त्वज्ञः शास्त्राविरोधीनि स्वधर्मप्राप्तकर्माणि कुर्वन् न विरुद्ध्यते । व्यवहारदृष्ट्या कर्मकुर्वाणस्य तस्य कर्माणि न कामप्रयुक्तानि, नापि कर्तृत्वबुद्ध्या कृतानीत्यतो न कोऽपि विरोधः इति ।

## ६. भक्तस्य कर्मानुष्ठानक्रमः

### भवतु निश्चयदार्ढ्यादूर्ध्वं शास्त्ररक्षणम् ।।१२।।

विचारपूर्वकं संशयराहित्येन दृढप्रत्ययानन्तरं निर्ज्ञातभक्तितत्त्वो भक्तः ध्रियमाणश्चेत् तदा शास्त्रविधीन् अनुसरन् एव वर्तेत ।

३७. अस्मत्परिहतायाः उपर्युक्तशङ्कायाः न कोऽप्यवकाशः इतीदं इत आरभ्य त्रिभिः सूत्रैः स्फुटीक्रियते । गौणभक्ताः स्वयं भगवतो भिन्ना इति मन्यमानाः स्वकृतसेवादिभिः सन्तुष्टेन, तेन स्वेष्टप्राप्तिरनिष्टनिवृत्तिश्च भवेदिति कामेन तत्प्रीत्यर्थं लौकिकवैदिक कर्माण्यनुतिष्ठन्ति । परभक्तस्तु न तथा । सः भगवत्येव परिनिष्ठितो यतोऽतः तत्फलत्वेन भगवत्स्वरूप एव सम्पद्यते । "ज्ञानी त्वाऽऽत्मैव मे मतम् ।" आस्थितः स हि युक्तात्मा मामेवाऽनुत्तमां गतिम् । (गी. ७-१८) इति भगवदुक्तिरीत्या सः "वासुदेवभगवानहं, न ततोऽन्य" इति परिनिश्चयेन परमार्थमपरोक्षीकृत्य तिष्ठति । किं च

*बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।*
*वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।।* (गी. ७-१९)

इति भगवद्वचनानुरोधेन यो हि अनेकेषु जन्मसु भूयोभ्यासेन

शुभसंस्कारेण भक्तिं वर्धयित्वा, अन्ते च वासुदेवः सर्वं, न तद्व्यतिरिक्तं किञ्चिदस्तीति सिद्धान्तपारङ्गतः सः महात्मा भवति । तस्य धर्मकर्मानुष्ठानेन प्राप्तव्यः पुरुषार्थो न कश्चन परिशिष्यते ।

*स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।*
*सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ।।*

इत्युक्तप्रकारेण विष्णुं भगवन्तं सर्वदा ध्यायेत्, तं न कदापि विस्मरेदिति एतयोरुपदेशयोरेव सर्वे विधिनिषेधाः अन्तर्गता भवन्ति । ये तु सत्त्वरजस्तमोगुणानां संमिश्रणादुद्भूते संसारे परिवर्तन्ते, ते शास्त्र विधिनिषेधयोः किङ्कराः एव विद्यन्ते । ये तु परं "निस्त्रैगुण्याः शुद्धसत्त्वाश्च तेषां भक्तानां क्व वा विधिः क्व वा निषेधः ? निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेध" इति ह्युक्तम् । (एवं च कतमदपि शास्त्रशासनं भक्तं न बध्नाति ।) अथापि शुभकर्मपरतैव भक्तस्वभावो भवति । तेषां कर्माचरणं केवलं शास्त्रमर्यादापालनार्थमेव । तदनुवर्तनेन अन्ये मानवा अपि शास्त्रोक्तकर्मकारिणो भवेयुरिति ।

*न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।*
*जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ।। (गी. ३-२६)*

इत्युक्तदिशा विद्वत्कर्माणि अज्ञजनप्रबोधनार्थमेव । कर्तव्यं कर्म, कर्म करणीयमेवेति आस्तिकानां कर्मसङ्गिनां दृढविश्वासो भवति । अतस्तत्प्रोत्साहनमुचितमेव । इत्थं च परभक्ताः कर्माणि त्यजन्तीत्यस्य न कोऽपि विरोधः इति ।

## अन्यथा पातित्यशङ्कया ।।१३।।

### अज्ञजनप्रोत्साहनेन प्रयोजनम्

३८. सत्कर्ममार्गे अज्ञजनप्रवर्तनेन भक्तानां प्राप्तव्यं प्रयोजनं न

किञ्चित् । अथवा लोकः प्रशंसत्विति कीर्तिकांक्षापि न सम्भाव्यते । अथापि सर्वत्र सर्वदा आत्मानन्दं यथा स्वयं अनुभवन्ति तथैव सर्वेऽपि सम्यग्दर्शनं लभन्तामिति सर्वजनहितकांक्षयैव सन्तः सत्कर्माण्याचरन्ति । एषः तेषां स्वभावः । यथा च भगवान् लोककल्याणाय आत्मना स्वीकृतेष्ववतारेषु लोकशिक्षणार्थं स्वयं कर्माण्याचरति स्म, तथैव भक्तानामपि परिपाटीति मन्तव्यम् । अत्र पार्थसारथिर्यथाऽब्रवीत्तस्य संस्मरणेन महान् लाभः ।

*न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।*
*नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥*
*यदि ह्यहं न वर्तेय जातु कर्मण्यतन्द्रितः ।*
*मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥*
*उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।*
*सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥*
*सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।*
*कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥* (गी ३-२२ -२५)

अस्मिन् विषये भगवन्तमेवाऽनुकुर्वन्ति भक्ताः । कर्माचरणेन प्राप्तव्यं फलं नास्तीति ते कर्म त्यजन्ति चेत्, तादृशान् दृष्ट्वा आस्तिकाः तान् कर्मचाण्डालान् मन्येरन् । तथा पतितान् मत्वा साधका जनाः तान् नोपसर्पेयुः । तदुपदेशेन अध्यात्मसाधनानि परमार्थतत्त्वं च न गृण्हीयुः । तथा तत्त्वावगमाय यत्नमपि न कुर्वीरन् । तत्रापि अतीवाऽज्ञाः "एते विद्वांस एव कर्माणि नाचरन्ति अतः कर्मानुष्ठानेन किमपि प्रयोजनं नास्तीति" विभावयन्तः स्वयमपि कर्माणि त्यक्त्वा भ्रष्टा भवेयुः । तथाविधानर्थपरिहारायैव सन्तः सङ्गं त्यक्त्वा कर्माणि विधिवत् कुर्वन्तो जनान् आस्तिकमार्गे जोषयितुं प्रयतन्त इति मन्तव्यम् ।

*शान्ता महान्तो निवसन्ति सन्तो*
*वसन्तवल्लोकहितं चरन्तः ।*
*तीर्णाः स्वयं भीमभवार्णवं जनान्*
*अहेतुनाऽन्यानपि तारयन्तः ॥* (विवेकचूडामणि ३७)

इत्युक्तरीत्या भयङ्करात् संसारार्णवात् स्वयं तीर्णा महात्मानः अकृत्वा कामपि प्रत्याशां अन्यानपि तारयन्तो भवन्ति ।

३९. एतत्सूत्रव्याख्यां कुर्वन्तः केचन वदन्ति - भक्ता अपि शास्त्रविधिमुल्लङ्घ्य कर्म त्यजन्ति चेत् तेषामपि पतनभयमस्त्येव इति । किं तु तथाऽभिप्रायवर्णनं न समीचीनम् । यत्कारणम् - आरोहावरोहरहितं उपचयापचयरहितं परमपदमारूढा भवन्ति भक्ताः । तेषां दुष्कर्म कृत्वा भ्रश्याम इति भयं वा, साधु कर्म कृत्वा इतोऽप्युत्तमां गतिं प्राप्स्याम इति आशा वा, अन्यानुद्धृत्य कमपि लाभं करिष्याम इति कल्पनं वा नोपपद्यते । अतः यथाऽस्माभिः पूर्वं विवृतं, यथा वा गीताद्वादशाध्याये वर्णितं तथाविधं एव साधूनां स्थित्यन्तरमिति विभावनीयम् । तथाहि लिखन्ति तत्रभवन्तः सुरेश्वराचार्याः नैष्कर्म्यसिद्धौ -

***उत्पन्नात्मप्रबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।***
***अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥*** (नै.सि. ४-६९)

उत्पन्नात्मविज्ञानस्य अधिकारिणः अद्वेषादयो गुणाः प्रयत्नं विना स्वयमेव समुल्लसन्ति । तदर्थं सः पृथग्यत्नं न करोति । ये तु स्वर्गादिसुखकामाः कर्मठा -

***ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।***
***एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥*** (गी. ९-२१)

इत्युक्तरीत्या अमुत्र कर्मफलानि स्वर्गसुखानि भुक्त्वा पुण्यक्षये पुनः मर्त्यलोकं प्रत्यागमिष्यन्ति । तस्मात् कर्मिणां पतनभयमस्त्येव ।

किंतु भक्तेः कामनिरोधरूपत्वेन भक्तानां अधःपतनशङ्का नास्ति । यच्च शास्त्रोल्लङ्घनेन प्रत्यवायदोषभयं, यच्च पापकर्मप्रयुक्तनरकपतनभयं चेति आशङ्क्यते तत्तेषां नितरामसम्भावितमेव । यस्मात्ते कर्तृत्वभोक्तृत्व रहितं परमात्मानमेव सम्प्राप्ता इति पूर्वमेव प्रदर्शितम् । तेषां दृष्ट्या "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" (ऋ. १-५-२२-२०) इति श्रुत्युक्तरीत्या सर्वत्र सर्वदा विष्णुपरमपददर्शनेन धन्यतैव । अतस्ते कुतः क्व पतेयुः ? तेषां अहङ्कार एव नास्ति यतोऽतः केनचिदपि कर्मणः फलं न सम्भवत्येव ।

शास्त्रेषु निषिध्दैरपि कर्मभिः न ज्ञानिनां सद्गतिप्रतिबन्ध इति प्रशंसा दृश्यते । निदर्शनाय कौषीतक्युपनिषदि प्रतर्दनाय इन्द्रः -

*स यो मां विजानीयान्नाऽस्य केन च कर्मणा लोको मीयते ।*
*न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यया ....* (कौ. ३-१)

यस्तु मां आत्मानं ज्ञात्वोपास्ते तस्य केनचिदपि कर्मणा-मातृहत्या पितृहत्या चौर्यं भ्रूणहत्येत्यादिना कारणान्तरेण प्राप्तव्यो लोकः न प्रतिबद्ध्यते इति प्राह । गीतास्वपि

*यस्य नाऽहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।*
*हत्वाऽपि स इमांल्लोकान् न हन्ति न निबध्यते ।* (गी. १८-१७)

भगवानप्येवमाह । एतच्च ज्ञानिना सम्पादितस्य तत्त्वज्ञानस्य प्रशंसार्थमुक्तम् । न तु तथ्यत एव सः तादृशं पापं कर्म करोतीति विवक्षया । यश्च शास्त्रोक्तमपि कर्म स्वात्मार्थं नाचरति, सः कथङ्कारं पापं कर्म कर्तुं व्यवस्येत सहसा ।

एवं च भक्तः शास्त्रोक्तविधिनिषेधनियमान् पालयन्नेव वर्तते । तेन तस्य प्रयोजनाभवेऽपि अज्ञजनमार्गदर्शनार्थमेव सत्कर्माणि करोति लोकोपकारार्थं चेति । एष एवानयोः सूत्रयोर्निर्मथितोऽभिप्रायः । पातित्याशङ्का इत्युक्तिरपि त्यक्तकर्माणमिमं दृष्ट्वा पतितबुद्ध्या

दूरीकृत्य लौकिकाजनाः कदाचन तदुपदेशश्रवणे पराङ्मुखा भवेयुरिति शङ्कया अभिहितमिति मन्तव्यम् । न तु तथ्यतः । पातित्यं तु कथञ्चिदपि भगवद्भक्तं न स्पृशेदिति राद्धान्तः ।

## लोकोऽपि तावदेव, भोजनादि व्यापारस्तु आशरीरधारणावधि ॥१४॥

४०. भक्तः लोकसङ्ग्रहार्थं शास्त्रीयकर्माण्याचरन् वर्तत इत्युक्तम् । स कुतो वा लौकिकव्यापारेषु प्रवर्तेत इति चेत् तस्य उत्तरमिदम् - भक्तः स्वयमात्मार्थं किञ्चिदपि लौकिकव्यापारं न प्रकरोतीति पूर्वं अष्टम-सूत्रव्याख्यानावसरेऽभिहितमेव । कदाचित् कर्म कर्तुमागतमपि तत् प्रारब्धवशतां स्मरन् निरभिमानः फलाशारहितश्च सन् अनुतिष्ठति । सार्वभौमोऽपि जनकः कर्मयोगी सन्

*अनन्तं बत मे वित्तं यस्य मे नास्ति किञ्चन ।*
*मिथिलायां प्रदीप्तायां न मे दह्यति किञ्चन ॥* (म.भा.शां १७-१९)

इति वदति स्म किल । तथैव भक्तः कर्माणि निरभिमानेन निर्वर्तयन् निर्बाधं वर्तते । स जातुचित् आश्रमकर्माणि संन्यस्य भिक्षुर्भवति चेत् तदा-"शारीरं केवलं कर्म कुर्वन्नाऽऽप्नोति किल्बिषम्" (गी. ४-२१) इति गीतोक्तरीत्या शरीरस्थित्यर्थमात्रमेव भिक्षाटनादिकं कर्म प्रारब्धकर्मवशेन करोति । तदा अपि -

*येन केनचिदाच्छन्नो येन केनचिदाशितः ।*
*यत्र क्वचन शायी स्यात्तं देवा ब्राह्मणं विदुः ॥* (मो.ध २४५-१२)

इत्युक्तिरीत्या यदृच्छाप्राप्तेन वस्त्रेणाच्छन्नः, यदृच्छालब्धेनाऽन्नेन तृप्तः सन्, यत्र क्वचन जीर्णकुट्यां अवसुप्तो देहयात्रां निर्वर्तयति । इदमपि व्यवहारदृष्ट्याऽभिहितम् । परमार्थदृष्या तु सः सर्वं विष्णुमयमित्येव पश्यन् उपशाम्यति इति ।

# ७. स्पष्टानि भक्तिलिङ्गानि

## तल्लक्षणानि वाच्यन्ते नानामतभेदात् ॥१५॥

४१. इदानीम् अन्यान्याचार्यमतान्युदाहृत्य भक्तिलक्षणानि व्याख्यातुं प्रक्रमते । लक्षणं नाम अव्याप्त्यतिव्याप्त्यसम्भवाख्यदोषरहितः असाधारणो धर्म इति तार्किका वदन्ति । गवां लक्षणे वक्तव्ये कपिलात्वं गोलक्षणमित्युक्ते श्वेतादिष्वव्याप्तिः । शृङ्गित्वं लक्षणमित्युक्ते महिष्यादिष्वतिव्याप्तिः । पक्षवत्त्वं लक्षणमित्युक्ते असम्भवो गवां पक्षरहितत्वात् । अतः अन्यूनानतिरिक्तः तज्जातिमन्निष्ठः असाधारणो धर्मो लक्षणं भवति । यथा सास्नादिमत्त्वं गोः लक्षणमिति प्रतिपादयन्ति । नैतादृशोऽर्थोऽत्र लक्षणशब्देनाऽभिप्रेयते ।

अत्र तादृशान् धर्मान् न निगदति । एकस्य वस्तुनोऽनेक लक्षणाऽसम्भवाच्च । स्वरूपमेव लक्षणं भवतीति कृत्वा भक्तिर्भगवति परमप्रेमरूपेति पूर्वमेव निगदितम् । अतश्चाऽत्र पुनर्लक्षणान्यपि न विधातव्यानि । तर्हि लक्षणानि वाच्यन्त इति किमर्थमभ्यधात् सूत्रकार इति चेत् - अत्र लक्षणानीत्यस्य चिन्हानीत्यर्थो विवक्षित इत्यवधेयम् ।

भक्तानां भगवति वर्तमानः प्रेमभावः स्वयंप्रमाणः स्वानुभवेनैव अवसीयते । अतस्तत्कृते न लक्षणानि विधातव्यानि । अथापि भक्तिमार्गे प्रक्रममाणानां साधकानां निदर्शनार्थं स्वान्तःपरीक्षापूर्वकं निश्चयदार्ढ्यार्थं च भक्तचिन्हानि निर्देष्टव्यानि भवन्ति । प्रायोऽध्यात्मशास्त्रे कृतकृत्यानां यानि लक्षणान्युक्तानि तानि भक्तेषु स्वभावदृढानि भवन्त्येव । तादृशसिद्धिं प्राप्तुं प्रयतमानानामुपदेशार्थं सिद्धानां लक्षणानि वाच्यन्त इति ज्ञेयम् । यदेव सिद्धस्य लक्षणं तदेव साधकस्य साधनमिति कृत्वा ।

## पूजादिष्वनुराग इति पाराशर्यः ॥१६॥

४२. भगवदाराधनादिषु नित्यासक्तिरेव भक्तिरिति व्यासाचार्यो वदति । पूजादिषु इत्यत्र आदिशब्देन पूजायाः पूर्वाङ्गानि उत्तराङ्गानि च परिगृह्य अनुष्ठेयानि भवन्ति । तथा च स्नानादिशुचिकर्माणि, सन्ध्यादि नित्यकर्माणि, पूजावस्तुसङ्ग्रहः, देवालयं गत्वा तत्र सम्मार्जनादिना शुद्धीकरणं, रङ्गवल्यादि-भिरलङ्करणं, भगवद्विग्रहे निश्चलतया मनसः स्थापनं, पूजाविधिभिः समभ्यर्च्य फलादिनिवेदनम्, स्वगृहे च गुरूणां महत्तराणां अतिथीनामभ्यागतानां देवबुद्ध्या सत्कारः, दीनानाथेभ्यः अन्नधनादि दानपूर्वकं प्रीणनं, हरिदिनपर्वदिनाद्याचरणं, व्रतोपवासादिभिः देहदण्डनं, इष्टापूर्तादिकर्मनिर्वर्तनं, नित्यं च देवसेवाबुद्ध्या स्ववर्णाश्रम धर्मकर्माण्याचरन् भगवदर्चनं प्रकुर्वीत । इत्थं च परार्थैकपरत्वलक्षणैः भगवद्भक्तं प्रत्यभिजानीयात् इति । उपासकाश्चैवम्प्रायाणि कर्माणि अविच्छिन्नविधिना समाचरेयुरिति श्रीवेदव्यासमतम् ।

***श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि ।***
***ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम् ॥*** ***(विष्णुरहस्ये)***

## कथादिष्विति गर्गः ॥१७॥

४३. अनुराग इति सम्बध्यते । कथानाम भगवद्गुणकर्म वर्णनपराणि पुराणानि । तेषां पुराणादीनां श्रवणे सङ्कथने च परमासक्तिर्भक्तिरिति गर्गाचार्यो मन्यते । आदिशब्देनाऽत्र गृह्यमाणानि कानीति चेत् - भगवन्नामसङ्कीर्तनम्, कथाकीर्तनश्रवणे तत्परता, गुरुभिः मन्त्रोपदेशं गृहीत्वा तज्जपः, गुरूणां महत्तराणां च वचनपरिपालनम्, प्रीत्या देवनिर्माल्यस्वीकरणम्, देवनिवेदितान्नस्यैव भोजनमित्यादीनि । पूर्वसूत्रोक्ता आचाराः शरीरप्रधानाः । एतत्सूत्रोक्ताः वागादीन्द्रियप्रधाना

आचारा इति विशेषः । देहेन क्रियमाणसेवाकर्मापेक्षया इन्द्रियैः क्रियमाणसेवाकर्मसु तत्परता भक्तेः विशेषरूपं लक्षणमिति गर्गाचार्यो मन्यते इति ।

## आत्मरत्यविरोधेनेति शाण्डिल्यः ॥१८॥

१८. आत्मरतेर्बाधा यथा न भवति तथा पूजासु वा कथासु वा अनुरागो भक्तिरिति शाण्डिल्यमतम् ॥

४४. पूजायामनुरागः पूजार्थो न भवति । तथा कथायामनुरागः कथार्थो न भवति । पूजाकथानुरागः तद्विषयभगवदर्थ एव भवति । अतो यावत्या भगवति प्रेमसिद्धिर्भवति तावत्यैवालं पूजाकथासक्त्या इत्यभिप्रायः । परभक्ताः पूजासक्ता इव दृश्यमाना अपि सर्वत्र सर्वदा ते भगवन्तमेव निरर्गलं पश्यन्ति । यदि पूजादिकं भगवद्रतेर्विघातकं मन्येरन् तदा ते पूजादिकं त्यक्तुमपि न जिह्रियति ।

आत्मरतिर्नाम सर्वात्मानं सन्तं स्वान्तस्थमेव तं नेदिष्ठं मत्वा तस्मिन् मनस्समाधानमेव । तदेव मुख्यं भक्तलक्षणं विजानीयात् । न तु पूजादिषु अनुरक्ता इत्येतावता भक्ता इति वेदितुं युक्तम् । एकत्रैव चित्ताधानं रतिरित्युच्यते । द्वितीयवस्तुना साकं रमणं क्रीडेत्युच्यते । रतिमपि क्रीडानाम्ना क्वचिद् व्यपदिशन्ति । यतो भक्तस्य भगवदात्मनोऽन्यद्वस्तु किञ्चिदपि न प्रेमास्पदमस्ति अतः पूजा वा पूजोपकरणं वा भगवतोऽधिकमिति भावना तस्य मनस्यपि नोदेति । सा भावना सर्वथा न भक्तिसाधिका ।

पूजादयः कर्मेन्द्रियसम्बन्धिनो व्यापाराः । कथाश्रवणादयः ज्ञानेन्द्रिय सम्बन्धिनो व्यापाराः । अतो भक्तिं प्रति पूजादिभ्योऽपि कथाश्रवणादयः अन्तरङ्गसाधनानीति विशेषः । आत्मरतिस्तु केवलमनस्सम्बन्धिनीति कृत्वा ततोऽप्यन्तरङ्गं साधनमिति विवेक्तव्यम् । उक्तं च -

*गङ्गाजले किं न वसन्ति मत्स्याः*
*देवालये पक्षिगणा वसन्ति ।*
*भावोज्झितास्ते न फलं लभन्ते*
*तीर्थाच्च देवायतनाच्च मुख्यम् ॥*

इत्थं च मनसि भक्तिभावो नास्ति चेत् केवलबाह्यसाधनानि न फलदानायाऽलमिति । अत्र कश्चन विशेषः । बाह्यसाधनानि पूजादीनि सर्वैर्दृश्यंन्ते । कथाश्रवणादीनि ज्ञातुं शक्यन्ते । यस्माच्चाऽत्र लिंङ्ग-ज्ञापनमेव दिदर्शयिषितमत एतान्येव वक्तुं युज्यन्ते । आत्मरतिस्तु भक्तानामनुभवमात्रगोचरेति सा न बहिः प्रकाशते । तर्हि साऽऽत्मरतिरत्र किमर्थं कथितेति चेत्, इह केचिद् भक्तंमन्याः केषुचित्साधनेषु व्यापृताः परिदृश्यन्ते । किं तु न ते परमार्थतो भक्ता भवन्ति । परं तु येषां दर्शनमात्रेण साधकानां मनः बाह्यविषयेभ्यो विरज्य अन्तर्मुखं भवति, तथा यत्साहचर्येण भक्तौ अभिरुचिर्वर्धते ते एव परमार्थभक्ताः । तादृशान् महात्मन एव अनुकर्तुं साधकः प्रयतेत । तदुपदेशानेव आकर्णयेत इति सूचनायेति । परभक्ता हि नित्यमात्मरता भवन्ति ।

४५. ननु इमानि कर्मप्रधानानि साधनानि पुराणादिषु तत्र तत्र कुत्स्यमानानि दृश्यन्ते । यथा सूतसंहितायाम् -

*अश्वमेधादयो यज्ञा अशेषा वेददर्शिताः ।*
*मुनीन्द्रा ध्यानयज्ञस्य कलां नार्हन्ति षोडशीम् ॥* (सू.सं.यज्ञ. १-४१)

अस्मिन् विषये भक्ततिलको राजा कुलशेखरः प्राह -

*अम्नायाभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं*
*मेदच्छेदफलानि पूर्तविधयः सर्वं हुतं भस्मनि ।*
*तीर्थानामवगाहनानि च गजस्नानं विना यत्पद -*
*द्वन्द्वाम्भोरुहसंस्मृतिं विजयते देवः स नारायणः ॥* (मु.मा. २५)

इति । अत्र वेदाध्ययनं, यज्ञाद्यनुष्ठानं, स्मार्तकर्माणि तटाकाराम-निर्माणानि पूर्तकर्माणि सर्वाणि यद्यपि निन्दितानीव लक्ष्यन्ते ; अथापि तानि भगवद्ध्यानस्य अङ्गभूतानीति ज्ञापने तात्पर्यवन्ति इति बिभावनीयम् इति शाण्डिल्य मतम् । एवं च भक्तिलिङ्गानीमानि साधनानि बहिरङ्गान्तरङ्गभेदेन केवलं भिन्नानि । तानि भक्तिसाधनानीत्यत्र तु न कस्याऽपि वैमत्यम् ।

# ८. नारदस्य सिद्धान्तः

## नारदस्तु तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति ॥१९॥

### तदर्पिताखिलाचारता इत्यस्य विवरणम्

४३. नारदस्तु स्वमतवर्णनपूर्वकं सिद्धान्तं करोति । शाण्डिल्यमतेन भक्तिलक्षणम् आत्मरतिरित्युक्तं, तद्युक्तमेव । यतो भक्तिर्नाम भगवति प्रेम भवति । अतः तत् मनोधर्म इति समञ्जसमेव । परं तु भक्तस्य मनः सर्वदा बाह्याद् व्यावृत्तं सत् प्रत्यङ्मुखमेव तिष्ठतीति वक्तुं न शक्यते । किं तु मनः यत्र यत्र प्रसरति तत्र तत्र परमात्मदर्शनक्षमं विशालं भवतीति तु युक्तम् । अत एव भक्त्यनुगुणेषु कर्मसु भक्तः व्यापृतस्तिष्ठतीति पूर्वमेकादशसूत्रे कथितम् । अतः पूजाकथा श्रवणध्यानादिषु यत्किमपि कर्म कर्तुं सः शक्नोत्येव । तस्येदमेव लक्षणम् । किं च सः यद्यत्कर्म करोति तत्सर्वं भगवत्येव समर्पयति । भगवत्सेवाकर्मव्यतिरिक्तो व्यापारस्तस्य जीवनप्रबन्ध एव न भवति । परं तु येन केनापि निमित्तेन भगवद्विस्मृतिप्रसक्तिश्चेत् तदा तस्य मनो व्याकुलं भवति । भगवानेव तस्य उच्छ्वासनिःश्वासौ जीवनमिति श्रीनारदस्य मतम् ।

*कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वाऽनुसृतस्वभावात् ।*
*करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ।।*

(भाग ११-२-३६)

इति कविनाम्ना महर्षिणा यथा निमिराजायोपदिष्टं तथैव कृतानां सर्वकर्मणां भगवते नारायणाय समर्पणमेव भागवतधर्मस्य सारः । अतः सर्वेषामाचार्याणां मतान्यस्मिन्नेव मते संविष्टानि भवन्ति ।

४७. अत्र काचन शङ्का-यस्य कस्याऽपि अर्चनकथाश्रवणादि रूपस्य कर्मणः यदनुष्ठानं, तद् भक्तिप्रतिकूलं न भवेदिति शाण्डिल्य आह खलु । तत्र भक्तिसाधनानीत्येव मनीषया अनुष्ठीयमानानि कर्माणि तानि कथं भक्तिप्रतिकूलानि स्युरिति । तदाशङ्कायाः समाधानमिदम्- कर्मानुष्ठानं तावत् कर्मविषये द्विधा सम्भवति । चोदितत्वमात्राभिप्रायेण यथा कर्मठानां कर्मानुष्ठानमिति, यथा भक्तानां भक्त्यर्थं कर्मानुष्ठानं चेति । तत्र भक्त्यर्थमेव कर्मानुष्ठाने भगवत्प्रीतिमात्रमेवोद्देशः न तु फलान्तरोद्देशो भवति । कर्मानुष्ठानकालेऽपि अहं करोमीति कर्तृत्वाभिमानो वा अनेन कर्मणा इदं फलं भवत्विति फलाभिसन्धिर्वा न भवतः । तत्र भगवच्चिन्तनपुरस्सरमेव सङ्गत्यागफलत्यागपूर्वकं कर्म प्रवर्तत इत्यतः तत्कर्माऽपि भक्तावेव अन्तर्भवति । यस्तु कर्मठः कर्मार्थमेव कर्म करोति तस्य कर्माणि भक्तिप्रतिकूलानि भवेयुरेव । अत एव भगवान् पार्थसारथिः अर्जुनं प्रति बहुधा प्रतिबोध्याऽपि पुनरन्ते -

*सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।*
*इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ।।*
*मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।*
*मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ।।* (गी. १८-६४)

इत्युपदिदेश । अत एव श्रीनारदः स्वमते तदर्पिताखिलाचारतेति भक्तिलक्षणं निरणैषीत् । भक्त्यर्थमेव कर्मानुष्ठाने मनसो हर्षविषादौ न

सम्भवतः । उदाहरणार्थं यथा-कश्चन पिता पुत्रं प्रति आपणात् किञ्चन वस्तु क्रीत्वा आनयेति तद्हस्ते धनं दत्वा प्रेषयति । ततः प्रधावितः पुत्रो विपणिं गत्वा निकृष्टं वस्तु वाऽऽनयेत्, अथवा वस्तु न मिलितमिति वा कथयेत् । तदा गेहस्थस्य पितुः परं व्यथा भवेत् । किं तु यातायातं कृतवतः पुत्रस्य कार्यसिध्यसिद्ध्योः न काचिच्चिन्ता, पितृवाक्यं पालितमिति धन्यभाव एक एव समुल्लसति । तथैव फलासक्त्या कर्म कुर्वतः फले असिद्धेऽसमग्रे वा मनस्तापो भवति । भक्त्यर्थं कर्म कुर्वतस्तु फलसिद्ध्यसिद्ध्योर्न मनसःचिन्ता । भगवत्सेवा कृतेति तृप्तिरेकैव भवति ।

## तद्विस्मरणे परमव्याकुलता इत्यस्य विवरणम्

४८. कृतानां कर्मणां भगवदर्पणेन तदेव भक्तियोगो भूत्वा परमानन्दो भवतीत्यत्र रहस्यमेकमस्ति । किं तदिति चेत् - वयं यद्यत्कर्म कुर्मः, तदात्व एव अस्मदवगममन्तरेणैव तत्सर्वं भगवदर्पितं भवति । तद्यथा वयं कस्मिंश्चित्कर्मणि व्यापृता भवामः, अथ च तत्कर्म समाप्य तूष्णीं तिष्ठामः, पुनश्च कर्मान्तरं प्रारभामह इत्यस्मिन् स्थित्यन्तरे अस्मन्मनसो गतिः यादृशी तिष्ठतीत्यस्य परीक्षणेन कश्चन विशेषः सुज्ञातो भवति । कर्मकाले अहमिदं कर्म करोमीति बुद्धिः, अनेन कर्मणा इदं फलं प्राप्स्ये इति मनीषाऽपि विद्यते । एकस्य कर्मणः परिणाममनुभूय पुनस्तस्मिन् कर्मान्तरे वा प्रवृतौ सत्यां तदानीमपि इदं कर्म निर्विघ्नेन परिपूर्णं भवतु, एतेन मम सौख्यमेव स्यादिति विकल्पनयैव पुरुषः तिष्ठति । अत एतत्सर्वमपि अहङ्कारपरिणामरूपमेव । यदा तु कार्यसिद्ध्या सन्तोषो भवति तदा तदनुभवकाले एव तृप्तिर्भवति । एषैव खलु परमानन्द-स्फूर्तिः । असिद्धे कार्ये दुःखं भवदपि तत् पूर्वानुभूतोत्तमफलस्मरणेन तादृशतृप्त्यभावानुसन्धानेन च भवतीति ज्ञेयम् । तृप्तिकाले तु सुख-दुःखवैषम्याभावात् क्षोभरहितं मनः सुशान्तं समं तिष्ठति । तदा

अहमहमित्यनुभवोऽपि विलीन एवेत्येतत् सूक्ष्मेक्षिकया अवलोकमानानामेव परिज्ञायते । लोके कालकर्मप्रवाहपतिता जनाः "इदानीं कर्म कुर्मः, इदानीं तृप्तिमनुभवामः, पुनश्चेदानीं कर्म प्रारभामहे" इति च वदन्तो मध्ये तृप्तिस्तृप्तिरिति शब्दमेव परं व्याहरन्ति । न तु तत्त्वतः तृप्तिशब्दार्थं विजानन्ति । एवमेव इमं पदार्थमनुभूय इदानीं सुख्यहमिति वदन्तो दृश्यन्ते । तेऽपि स्ववचनस्याऽर्थं न परिजानते । कुत इति चेत् - यदा तृप्तिः तदा अहंबुद्धिरेव न तिष्ठति, अहंबुद्धिकाले तृप्तिरेव न स्यात् । एतत्सूक्ष्ममजानन्तः स्वकर्मफलरूपसुखदुःखानुभवकाले अहंबुद्धेः सत्त्वात् मध्ये मनसः उपरमकालेऽपि अहंबुद्धिरस्तीति भ्राम्यन्ति । वस्तुतस्तु सुखदुःख प्रत्ययरहितायां दशायामेव मनसः स्वास्थ्यं तृप्तिश्च समुल्लसतीतीदं सूक्ष्मबुद्ध्या प्रत्येतव्यम् । अस्याऽर्थस्य परिचयाय स्वस्वनिद्रानुभवः परिशील्यते चेत् परमार्थः सुविदितो भवति । यदा अहं मम इदम् इति अनुभवो नास्ति, कामः कर्म वा अन्यदर्शनं वा नास्ति, तदा सर्वविशेषास्तमये सुषुप्तौ अनुपमः परमानन्दः समुल्लसतीतीदं स्वानुभवेन स्वयं परीक्ष्य विवेक्तव्यं भवति । अहंममानुभवरहितायां तृप्तौ पुरुषः परमात्मन्येकीभूत एव भवतीति शास्त्रमुद्घोषयति । तस्यां परिलुप्ताहङ्कारदशायां यः समुल्लसितः आनन्दः सा एव भगवद्भक्तिरिति पूर्वं द्वितीयसूत्रव्याख्यानावसरे प्रतिपादितम् । इमं विषयं सम्यक् ये मननं कुर्वन्ति तेषामेव मनसि परमानन्दरूपस्य भगवतः स्मरणं निरन्तरं कर्तव्यमिति अध्यवसायःस्वयमेव जागर्ति । तद्विस्मरणे महती हानिरिति चाऽवगम्यते । अत एव श्रीनारदो भक्तिलक्षणं तद्विस्मरणे परमव्याकुलता इत्यभ्यधात् । एवं निरणैषीच्च ।

## ९. भक्त्याचार्येषु वैमत्यमस्ति किम् ?

४९. व्यासः गर्गः शाण्डिल्यः नारदः इत्येते भक्तिलक्षणं व्युत्पादयन्ति - पूजादिष्वनुरागः कथादिष्वनुरागः आत्मरत्यविरोधानुरागः

सर्वव्यापारान् भगवत्यर्पयित्वा निरन्तरं भगवत्स्मरणे व्यापृतिरिति च स्वाभिरुच्याऽन्यथान्यथा व्याख्यान्ति । परं तु तद्व्याख्यानवैलक्षण्यं केवलमवस्थोपाधिकृतमेव, न तु स्वरूपलक्षणे भेद इति पूर्वमेवाऽस्माभिः प्रदर्शितम् ।

केचित्तु निगदन्ति यथा - पाराशर्यगर्गौ कर्मप्रधानां भक्तिं प्रतिपादयतः । शाण्डिल्योऽद्वैतभक्तिं लक्षयति । नारदस्तु द्वैतभक्तिं स्थापयतीति तेषामाचार्याणां मतानि विभागेन दर्शयन्ति । परं त्वस्याः कल्पनायाः न किमपि मूलमस्ति । अस्माभिः पूर्वमुक्तं यथा - अत्र भक्तानां केवलबाह्यलक्षणानि (चिन्हानि) लिलक्षयिषितानि न तु स्वरूप-लक्षणमेवेति । भक्तिर्नाम भगवति परमं प्रेम । एवं च भक्तो यथावस्थोऽस्ति तदा तथैव भगवन्तं सम्भज्य तदानन्दं प्राप्नोत्येव । यथोक्तम् -

*देहबुद्ध्या तु दासोऽहं जीवबुद्ध्या त्वदंशकः ।*
*आत्मबुद्ध्या त्वमेवाऽहमिति मे निश्चिता मतिः ॥*

इति हनूमता । इत्थं च भक्तो भगवदर्थं कर्म कुर्वन् दासोऽहमिति वदति । अन्तःकरणोपाधिदृष्ट्या अनन्तेषु जीवेषु आत्मानमप्यन्यतमं भगवदंशं भावयति । निरुपाधिकात्मदृष्ट्या तु सकलमिदमहं च वासुदेव इति प्रत्येति । वस्तुतो विचार्यमाणे निस्तरङ्गानन्दाम्बुधौ भगवति क्व वा द्वैताद्वैतवार्ता ? अहमित्यभिमान एव द्वैताद्वैतविवादस्याऽऽस्पदं भवति । सर्वमिदं भगवानिति अपरोक्षं पश्यन्तो महात्मानः भगवन्मयाः सन्त ईदृशे भेदविषये न मनः कुर्वन्ति । सूतसंहितायामुक्तम् -

*दासोऽहमिति सम्मोहस्ततस्सोऽहमिति भ्रमः ।*
*अहं स इति सम्मोहस्तस्मात् त्रीणि परित्यजेत् ॥ (सू.यज्ञ. १४-३७)*

भगवानेव सर्वभूतानीत्येषः तत्त्वसारः । यथा अवधूतगीतायामुदाहृतम् -

*अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चाऽपरे ।*
*परं तत्त्वं न जानन्ति द्वैताद्वैतविवर्जितम् ॥* इति ॥

एवं द्वैताद्वैतविवर्जितं ब्रह्मतत्त्वं अविदित्वा विवदमानानां जनानामेव संख्या लोके बहुला । इति ।

## अस्त्येवमेवम् ॥२०॥

५०. सर्वकर्माणि भगवति समर्प्य क्षणार्धमपि तदविस्मृतिरितीदमेव भक्तेः प्रधानलक्षणमित्यस्मिन् विषये पुराणेतिहासादिषु प्रभूतान्युदाहरणानि मिलन्ति । एतल्लक्षणं येषु दृश्यते ते भक्ताः । अनीदृशाः अभक्ता एवेति निश्चिनुयात् । लोके वर्णाश्रमविधिमनुरुन्धानाः भक्ताः दृश्यन्ते । केचिदनीदृशा अपि भक्ताः दृश्यन्ते । सर्वथा तु कृतानां कर्मणां लौकिकानां वैदिकानां च भगवत्समर्पणं कुर्वन्तो ये तद्विस्मृतौ व्याकुलाः भवन्ति ते एव भक्ताः स्युरिति राध्दान्तः । अत्र एवमेवेति द्विरुक्तिः प्रकरणसमाप्ति सूचनार्था ।

अथैवमात्मनोक्तं भक्तिलक्षणं अन्यसर्वमतानि क्रोडीकरोतीत्याशयेन एतमेव सिद्धान्तं अन्वयव्यतिरेकक्रमेण लक्ष्यलक्षणसमन्वयं प्रदर्शयितुं प्रक्रमते -

## यथा व्रजगोपिकानाम् ॥२१॥

५१. भगवति अखिलाचारान् समर्प्य, तद्विस्मरणे परमव्याकुलता परभक्तिरित्यत्र व्रजगोपिकानां श्रीकृष्णे प्रेमभाव एव दृष्टान्तः ।

### तदर्पिताखिलाचारता इत्यस्य विवरणम्

गोपीनां प्रेम्णि स्वसर्वव्यापारणां भगवदर्पणरूपं लक्षणमासीद्वा न वेति विवेचनात्पूर्वं तासां किञ्चिदपि शास्त्रज्ञानं नासीदिति, विहितकर्माण्यपि नाऽसन्निति च संस्मरणीयम् । यदा श्रीकृष्णो मथुरां गतस्तत्र चाणूरमुष्टिकद्वन्द्वसंमर्दसमये तं पश्यन्त्यो

मथुरानागरकस्त्रियः गोपिकास्त्रीरुद्दिश्य मिथः किल एवं संल्लपन्ति स्म -

*गोप्यस्तपः किमचरन् यदमुष्यरूपं*
*लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ।*
*दृग्भिः पिबन्त्यनुसवाभिनवं दुराप -*
*मेकान्तधाम यशसः श्रिय ऐश्वरस्य ।।*
*या दोहनेऽवहनने मथनोपलेप -*
*प्रेङ्खेङ्खनार्भरूदितोक्षणमार्जनादौ ।*
*गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो*
*धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः ।।* (भाग-१०-४४-१४, १५)

ननु गोपीभिः कीदृशस्य तपसः फलं प्राप्तम् ।। यतस्ता गोप्य अस्यश्रीकृष्णस्य समानाधिकवर्जितं स्वतस्सिद्धं क्षणेक्षणे नूतनम् अन्यैर्दुरवापं परमैश्वर्यस्य यशसश्च नित्यावासस्थानमिदं श्रीकृष्णरूपं स्वलोचनैः नित्यं निध्यायन्ति किल । गोदोहनं धान्यावहननं दधिमथनं भूसंमार्जनोपलेपनं दोलान्दोलनं रुदितबालोपलालनं जलाहरणं अमत्रमार्जनमित्यादिसर्वकर्मसमये श्रीकृष्णमेव सानुरागं मनसि संस्थाप्य आनन्दबाष्पपूर्णाक्ष्यो गद्गदकण्ठेन तमेव प्रगायन्ति किल । मनोयानेन तत्त्रिविक्रमसन्निधिमेव सत्वरमुपयान्ति खलु । अहो ईदृश्यो गोप्यो धन्या इति प्रशंसन्ति स्म । अतस्तासां प्रेम्णि भक्तिचिन्हमासीदिति ।

## न तत्राऽपि माहात्म्यज्ञानविस्मृत्यपवादः ।।२२।।

५२. ननु भक्तो भगवन्तं विस्मृत्याऽन्यत्र व्यापृतो भवतीतिदं न सम्भाव्यते । तर्हि तद्विस्मरणेन परमव्याकुलो भवतीति कथमापाद्यते इति चेत् - भक्तोऽपि लोकव्यवहारमध्यस्थो यतोऽतः कदाचिदन्यैर्बलात् बाह्यव्यवहारे समाकृष्येत । अथवा अनिरीक्षितेन विघ्नेन प्रचालितो

जातुचित् सत्स्मरणात् भ्रश्येत । एवं चेत् सः परमव्याकुलो भूत्वा पुनः दृढयोगबलेन भगवन्तं भावयितुं प्रयतते इत्येतावन्मात्रमत्र विवक्षितमिति विभावनीयम् ।

*प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः ।*
*न व्यथन्ति न हृष्यन्ति यत आत्माऽगुणाश्रयः ।।* (भाग १-१८-५०)

इत्युक्तरीत्या साधवो भक्ताः परापरविदो यतोऽतः परैर्बलात् सुखदुःखप्रसङ्गेषु समाकृष्टा यदि तदापि न हृष्टा नोद्विग्नाः सन्तो यथापूर्वं समचित्ता वर्तन्ते इति ।

प्रकृते तु गोप्यः प्राकृतजनगेहेषु जाताः स्त्रियो यतोऽतस्तासां भगवत्स्वरूपज्ञानं कुतस्तरां वा स्यात् ? ताः श्रीकृष्णं परमसुन्दरपुरुषं मत्वैव तस्मिन् कामकारेण प्रेरिता भूत्वा अनुरक्ता अभूवन् इति केचन मन्यन्ते । लोकसामान्यरीतिमभिलक्ष्य तथाभावनायामपि नाश्चर्यम् । यतो भागवतेऽपि तथाविधभावनास्पदानि कानिचिद्वचनानि केषुचित्प्रसङ्गेषु संलक्ष्यन्ते । उदाहरणार्थम् - भगवत्सन्देशहर उद्धवो यदा गोकुलं गतस्तदा ताः गोपिकाः दृष्ट्वा उद्गिरति यथा -

*क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः*
*कृष्णे क्व चैष परमात्मनि रूढभावः ।*
*नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षा-*
*च्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ।। इति ।* (भाग १०-४७-५१)

५३. स्वयं भगवानपि उद्धवेन सह संलपन् प्राह -

*मत्कामा रमणं जारमस्वरूपविदोऽबलाः ।*
*ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः ।।* (भाग. ११.२१.१२)

भगवान् व्यासोऽपि लौकिकबुद्धिमनुरुद्ध्य राज्ञा परीक्षिता प्रश्नमेवं कारयामास -

*कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने ।*
*गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥* (भाग. १०-२६-१२)

अस्य प्रश्नस्य उत्तरत्वेन योगीश्वरः शुक एवमाह -

*उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ।*
*द्विषन्नपि हृषीकेशं किमुताऽधोक्षजप्रियाः ॥*
*नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ।*
*अव्ययस्याऽप्रमेयस्य निर्गुणस्य गुणात्मनः ॥*
*कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ।*
*नित्यं हरौ विदधतो, यान्ति तन्मयतां हि ते ॥*
*न चैवं विस्मयः कार्यो भवता भगवत्यजे ।*
*योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥* (भाग. २९-१३ तः १६)

जन्मादिविकाररहिते योगीश्वराणामीश्वरे भगवति श्रीकृष्णे ये केचित् कामादिभावमपि कृत्वा भजन्ते ते सर्वैर्दोषैर्विमुक्ता भवन्तीत्यत्र न विस्मयः कार्य इति शुकः प्रत्युवाच । अस्मिन्नुत्तरे विद्यमानं गूढार्थं सम्यक् परिशीलयेत् । कामक्रोधादीनामुद्भवे विषयसेवनं तद्वासना च कारणं भवति । पूर्ववासनया विषयेषु कामो भवति चेत् तत्सेवनया स भूयोऽभिवर्धते । एवं कोपो भयं स्नेहादयोऽपि विषयनिमित्तेन जायन्ते चेत् घृतप्रक्षेपणेन अग्निरिव ते भुग्भुगिति भूयः प्रज्वलन्ति । किं तु परमात्मविषये न तथा । यतः स निर्गुणोऽतः तस्मिन् सत्त्वरजस्तमसां मध्ये यं कञ्चिदपि भावं कृतवतः अन्तःकरणमपि निर्गुणमेव भवति । यथा विषयासक्तं मनो विषयमयमेव भवति तथा भगवदभिमुखे मनसि कामादीनां या काचिद्वृत्तिः सञ्जाताऽपि सा संशम्य भगवन्मय्येव भवति । एवं तत्त्वज्ञानरहितानां कामुकवृत्त्या तत्समीपं गतानां गोपीनामपि भूयोभूयः तद्भजनेन तासां भगवन्मयता संसिद्धेति योगीश्वराशयः ।

५४. पुनरप्येकत्र श्री वेदव्यासो राज्ञा परीक्षिता प्रश्नं कारयति -

*संस्थापनाय धर्मस्य प्रशमायेतरस्य च ।*
*अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥*
*स कथं धर्मसेतूनां वक्ता कर्ताऽभिरक्षिता ।*
*प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम् ॥*
*आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितम् ।*
*किमभिप्राय एतं नः संशयं छिन्धि सुव्रत ॥* (भाग. १०.३३.२७ तः २९)

रासक्रीडाकथां श्रुत्वा राजा विचिकित्सति - धर्मसंस्थापनाय अधर्मविनाशनाय चेह भगवानवतीर्णः । स्वयं शास्त्रमुखेन धर्मव्यवस्थां व्याख्याय तत्पालकोऽपि स एव ननु । आप्तकामः श्रीकृष्णः परस्त्रीसङ्गरूपं धर्मविरुद्धं जुगुप्सितं कर्म कृतवानित्यत्र कोऽभिप्रायः स्यत् ? इतीमं मम सन्देहं कृपयाऽपाकुरु इति प्रार्थयत । तदुत्तरत्वेन शुकः प्राह -

*धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।*
*तेजीयसां न दोषाय वन्हेः सर्वभुजो यथा ॥*
*नैतत्समाचरेज्जातु मनसाऽपि ह्यनीश्वरः ।*
*विनश्यत्याचरन् मौढ्याद्यथा रुद्रोऽब्धिजं विषम् ॥*
*ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ।*
*तेषां यत्स्ववचो युक्तं बुद्धिमांस्तत्समाचरेत् ॥*
*कुशलाचरितेनैषामिह स्वार्थो न विद्यते ।*
*विपर्ययेण वाऽनर्थो निरहङ्कारिणां प्रभो ॥* (भाग. १०-३३-३० तः ३३)

तेजःस्विनो महत्तराः क्वचित्कदाचित् धर्ममुल्लङ्घ्य प्रचरन्ति । अथापि तेन तेषां न दोषः सम्भवति । सर्वं दहतो वन्हेः दोषो नास्ति खलु । ततश्च लोकोत्तराणामाचरणमुदाहरणं कृत्वा अल्पवीर्याः

किञ्चिज्ज्ञाः पुरुषाःताननुकर्तुं न जातुचित् प्रक्रमेरन् । श्रीरुद्रः हालाहलमपिबदिति किमन्यैरपि विषं जग्धुं पार्यते ? अतो मेधावी महात्मनामुपदेशमनुसृत्य स्वाचारविचारं प्रकल्पयेत् । न तु कदाचित् महात्मवत् आचरामीति स्वयोग्यतातीतं समाचरेत् । न हि सिद्धपुरुषाणां पुण्यकर्माचरणेन प्राप्तव्योर्थः कश्चिदस्ति । तथा धर्मातिक्रमणेन न प्रत्यवायोऽपि । यत्कारणम् - ते अभिमानरहिताः । तेषां कर्माण्यपि अकर्माण्येव भवन्ति । यतस्ते नैष्कर्म्यसिद्धिमाप्ताः । इदं कर्मरहस्यं सामान्यमनुष्यैरज्ञेयमेव । कर्तृत्वाभिमानरहिताः महात्मानः कर्माणि यथा आचरन्ति इत्येतदपि सामान्यबुद्ध्यगम्यमेव । एवं च भगवत्कर्मणो गूढतत्त्वस्य परिचयो नितरां दुर्गमः । अस्मिन्विषये श्रीशुक एवमभिप्रैति -

*किमुताऽखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसाम् ।*
*ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥३४॥*

*यत्पादपङ्कजपरागनिषेवतृप्ता*
*योगप्रभावविधुताखिलकर्मबन्धाः ।*
*स्वैरं चरन्ति मुनयोऽपि न नह्यमाना-*
*स्तस्येच्छयाऽऽत्तवपुषः कुत एव बन्धः ॥३५॥*

*गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ।*
*योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥३६॥*
*अनुग्रहाय भूतानां मानुषं देहमास्थितः ।*
*भजते तादृशीः क्रीडाः याः श्रुत्वा तत्परो भवेत् ॥३७॥*

हे राजन्, देवतिर्यङ्मनुष्यादीनां सर्वेषां जीवानामन्तरात्मा साक्षी स्वतन्त्रः प्रशास्ता च यः परमेश्वरः तस्य पुण्यापुण्यसम्बन्धः क्व ? यस्य पादपद्ममकरन्दं सेवित्वा मुनीश्वराः तृप्ताः सन्तः योगमहिम्ना स्वकर्मबन्धं सर्वमवमुच्य स्वतन्त्रा भूत्वा स्वेच्छया विहरन्ति, तस्य स्वेच्छात्तशरीरस्य

भगवतो बन्धवार्ताऽपि क्व ? गोपीगोपादिसर्वदेहिनामन्तरात्मा सः सर्व-भूतानुग्रहार्थं लीलया मनुष्यरूपं धृत्वा लोकोत्तरक्रीडां निर्विशति । अतः तल्लीलाविहारादि श्रवणमात्रेण मर्त्यः तत्परायणो भवेत् इति ।

अत्र उत्तरवचनान्तर्गतं तत्त्वरहस्यं अवगन्तुं मन्दमतिभिः न सुशकम् । सुरहस्यमेव तत् । भार्गवो रामः पित्राज्ञया सहसा मातृशिरः कर्तयामास । तत्कर्मणा सुप्रीतः पिता "प्रीतोऽस्मि ते, वरं वरयेति" प्राह । पुत्रः मातुरुज्जीवनवरमवृणोत् । तेन माता पुनरुज्जीविताऽभवत् । एतादृशानां तपोनिधीनां चरितं श्रुत्वा सामान्यो मनुष्यः स्वयमपि मातृहत्यां कर्तुमध्यवस्यति चेत् सःविवेकी किमु ? परावरज्ञैः कृतैरद्भुतचरित्रैः तन्महिमातिशयं ज्ञात्वा तान् परं सभाजयेत । न तु तत्साहसाचरणैः धर्माधर्मतत्त्वं निश्चेतुं प्रयतेत । तेषामुपदेशं परं प्रमाणीकृत्य तदनुगुणानि कर्माणि समाचरेत् । एतदपि लौकिकपुरुषेषु परिदृश्यमानं तेजस्तारतम्यं अनुलक्ष्याऽभिहितम् । ततश्चाऽनेन मापनदण्डेन भगवन्तं प्रमातुं न शक्यत एव । यस्मात् कारणात् स निर्गुणो निराकारो भगवान् वस्तुतः सर्वदा स्वमहिम्नि प्रतिष्ठितो धर्माधर्मानतीत्य विराजते । तथा सः स्वेच्छात्तावतारेष्वपि स्वकूटस्थसाक्षिरूपेणैव तिष्ठति । नित्यकूटस्थचैतन्यरूपः सः सर्वजीवाशयेषु नित्यान्तर्यामी भवति । एवं नित्यसांनिध्यानुग्रहं प्राणिनां प्रकुर्वतोऽपि तस्य तत्तच्छरीरकृतानां कर्मणां सम्बन्धगन्धोऽपि न सम्भवति । श्रीकृष्णो भगवान् रासक्रीडानिर्वेशसमयेऽपि स्वस्य कूटस्थासङ्गचिद्रूपमत्यजन्नेव समास्त । गोपीभिः साकं कृता क्रीडाऽपि मायाविनोदमात्रमेवेति मन्तव्यम् । सर्वथा तु तस्य येन केनाऽपि देहेन सम्बन्धो धर्माधर्मसंस्पर्शो वा नास्ति ।

५५. इयता विचारक्रमेण सिद्धोऽर्थः क इति चेत् - व्रजाङ्गनास्ताः विवेकविज्ञानाभावदशायां श्रीकृष्णस्य श्रीरूपं दृष्ट्वा काममोहिताः

अनुरक्ताः सत्यः एव तत्समीपमागता इति तु तथ्यमेव । किं तु तीव्रकामनया भगवत्येव कृतैकान्तप्रेमवतीनां तासां कामवृत्तिरेव परमप्रेमरूपतया परिणताऽभवत् इति । अत्र केचित् लोकदृष्ट्यवष्टम्भा अनतिप्रौढमतयः कथयन्ति - यत् श्रीकृष्णः स्वयमपि ताः कामिनीः कामयते स्म । तस्य अन्यकामुकवत् तासु प्रीतिसम्बन्धः अबध्यत इति । एतत्तु केवलं कल्पितकथानकमेवेति मन्यामहे । यतो भागवतपुराणप्रणेतुः व्यासर्षेः न तथा आशयः आसीत् । स मुनीशो भागवते परीक्षितः संशयपरिहारव्याजेन तत्त्वपरमार्थमेव गदितवानस्ति । एवमेव भगवदनुग्रहपात्रभूतानां महनीयानामपि चरितं कैश्चित् धर्मरहस्य-ज्ञानरहितैः विकृत्य व्याख्यायमानं दृश्यते । तत्सर्वं मिथ्याज्ञान-विलसितमेव । निस्त्रैगुण्ये वर्त्मनि विचरतां तेजस्विनां महत्त्वं तादृशा एव जानन्ति नाऽन्ये । अतः जनाः धर्माधर्मविषये शास्त्रोक्तां व्यवस्थां निश्चित्य लोकयात्रासु वर्तेरन् । सर्वथा तु नित्यशुद्धबुद्धमुक्तो भगवान् सर्वप्राणिनामन्तर्यामी सन् साक्षिरूपेण स्वरूपस्थ एव प्रकाशत इत्यतः सः देहधर्मैः न लिप्यते । सः यदा यदेह अवतरन् अपि -

***अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपिसन् ।***
***प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥*** *(गी. ४-६)*
***जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।***
***त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥*** *(गी. ४-९)*

इति भगवद्वचनानुसारेण तत्तदवतारेषु कृतानि कर्माणि बद्धजीव-कर्मवत् न बध्नन्ति । एतद्रहस्यमजानन्तो मूढाः यथा तथा वा कथयन्तु । जिज्ञासुभक्तानां तु तत्तदवतारकथाश्रवणादिना पुरुषार्थ-सिद्धिरेव भवति ।

५३. प्राकृता जनाः श्रीकृष्णरासक्रीडाप्रसङ्गं अन्यथाऽन्यथा

भावयन्तु नाम । गोपीनां तु तावता कालेन भगवन्माहात्म्यज्ञानं प्राप्तमासीदिति सुनिश्चितम् । यतस्ताः श्रीकृष्णविरहदशायाम् -

*तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ।*
*तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥* (भाग. १०-३०-४३)

तदात्वे तासां समवस्थावर्णनपरं गोपिकागीतं ये मृदुमनसः प्रीत्या पठन्ति ते गोपीनां भगवन्माहात्म्यज्ञानदशां परिचिन्वन्ति । ताःगायन्ति -

*न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ।*
*विखनसाऽर्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ॥*
(१०-३१-४)

इत्थं परमार्थमेव ज्ञात्वा परिदेवयन्तीनां तासां लौकिककामवासना आसीदिति कथमारोप्यते ? किं च तत्रैव ताः परमदैन्येन प्रयाचन्ते -

*विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ।*
*करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥*

संसारभयेन त्वयि शरणागतानामस्माकं शिरसि तवाऽभयहस्तं निधेहीति ताः प्रार्थयन्ते स्म । एवं संसारात् मुच्येमहीति भगवच्छरणा अपि यदि कामिनो निगद्यन्ते तर्हि के नु नाम मुमुक्षवः ? परं तु कामिनी काञ्चनाभिनिविष्टचेतसः जनाः अस्यां गोपिकागीतायां केवलशृङ्गाररसं पश्यन्तीत्यन्यदेतत् । तथ्यं तु गोपिकाः स्त्रियः शुद्धेन मनसा भगवत्येवाऽनुरक्ता आसन्नित्यतः तासु भक्तलक्षणं समग्रमेवासीदिति सात्त्विकाः संमन्यन्ते । तासां तदानींतनमनःस्थितिं तादृशा एव जानते ये बाह्यं सर्वं विस्मृत्य तन्मयाः भूत्वा चित्तसमाधिपदारूढाः महात्मानो भवेयुः । इह च ये भावुकाः इमं रासक्रीडाप्रसङ्गं ज्ञातुमिच्छन्ति ते भागवतं विष्णुपुराणं वा भक्ताग्रेसराणां श्रीमुखादेव श्रवणं कुर्युः । विष्णुपुराणे पञ्चमांशे त्रयोदशाध्यायवर्णितां गोपीनां भावसमाधिं तासां

सद्गतिप्राप्तिं च मनसा सानन्दं रसयितुं पूर्वार्जितसुकृतेन भवितव्यम् । तत्रस्थमेकमंशं पाठकजनपरिचयार्थमत्रोदाहरिष्यामः -

*तच्चित्तविमलाह्लादक्षीणपुण्यचया तथा ।*
*तदप्राप्तिमहादुःखविलीनाशेषपातका ॥*
*चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।*
*निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ॥*

(वि. पु. ५-१३-२१, २२)

एतद्वर्णनपरिशीलनेन तासां गोपीनां भगवन्माहात्म्यज्ञानदार्ढ्यविषये अणुमात्रमपि संशयो न स्यात् । सूत्रस्य अक्षरार्थस्तु - तत्रापि तासु गोपीष्वपि माहात्म्यज्ञानविस्मृत्यपवादो नास्ति । माहात्म्यज्ञानस्य या विस्मृतिर्विस्मरणम् । तद्विस्मृतिनामको यो लोकापवादः सः नाऽऽसीत् । सदा संस्मृतभगवन्माहात्म्यज्ञानवत्य एव गोपिकाः अत्र उदाहरणत्वेन निर्दिष्टा इत्यर्थः ॥

## तद्विहीनं जाराणामिव ॥२३॥

यथोक्तलक्षणहीनं प्रेम न भक्तिरित्युच्यते । यथा जाराणां प्रेम स्यात् ।

५७. व्रजगोपिकानां प्रेम भक्तेरन्वयदृष्टान्तः । जाराणां प्रेम तु व्यतिरेकदृष्टान्तः । जारपुरुषाणां स्त्रीणां च यद्यपि परस्परं प्रेम भवति । किं तु तत्प्रेम आत्मासुखार्थमेव, न प्रियजनार्थमिति स्पष्टमेव । अतस्तत्र तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलता चेति लक्षणं नास्ति । अतो न सा भक्तिः । एतदेव उपपादयति -

## नास्त्येव तस्मिंस्तत्सुखसुखित्वम् ॥२४॥

जारप्रेम्णि प्रियजनसुखे जाते स्वसुखमपि भवतीतीदं लक्षणं नास्त्येव ।

५८. जारप्रीतौ भक्तिलक्षणं किमपि नास्तीत्यतः तदतीवाऽवरं प्रेमेति स्फुटमुच्यते । प्रायेण जाराः प्रियजनसुखे न मनः कुर्वन्ति । केवलमात्मसुखार्थमेव प्रियजनेषु ते स्निह्यन्ति । कदाचित् ते प्रियजनहिताय तत्पराः प्रयतमाना इव लक्ष्यन्ते, स्वार्थं न परिगणयन्तीति परिदृश्यन्ते । किं तु तत् न यथार्थम् । केवलं नटनमेव । पूर्वोपकारसुखदाक्षिण्येन वा पुनः स्वप्रयोजनकांक्षया वा प्रियजनहितकर्मणि प्रयत्ननटनं कुर्वन्ति । तेषां सर्वत्र स्वार्थ एव उद्दिष्टो भवति । लोके न कोऽपि निःस्वार्थतया परं जनं जोषयितुं व्यवस्यति । सर्वथापि लौकिकाः सर्वेऽपि आपणिका इव, अधर्मणा इव वा प्रेम समाचरन्ति । कयापि प्रतीक्षया वा अविस्मरणीयेन कार्तज्ञेन वा परहिताय ईहमाना दृश्यन्ते । सर्वात्मना स्वार्थाकांक्षाराहित्येन परार्थाय इह न कोऽप्युत्सहते । गोपीसदृशभक्ततल्लजास्तु न तथा । ते भगवते आत्मनिवेदनमेव कृतवन्तो भवन्ति । ते स्वतनुमनोधनान्यपि न स्वकीयानि मन्वते । तानि भगवदर्थं धृतानीति तेषां विनिश्चयः । स्वशरीरेन्द्रियमनोव्यापारैः भगवत्प्रीतिः भवेद्यदि तर्हि तावतैवाऽलम् । न ततोऽधिके तेषां वाञ्छा । स्वात्मनिवेदनेन भगवत्सेवावकाशोऽभूदिति ते सन्तुष्यन्ति ।

# १०. भक्तिकर्मादीनां तारतम्यम्

## सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा ॥२५॥

सा भक्तिस्तु कर्मभ्यः तत्त्वज्ञानात् योगविधिविधानाच्च अभ्यधिकतरा भवति ।

५९. एतावत्पर्यन्तं भक्तिस्वरूपं तत्प्रयोजनं भक्तव्यवहारः भक्तलक्षणमित्येतानि विवेचितानि । इदानीं शास्त्रोक्तकर्मणां तत्त्वज्ञानस्य अष्टाङ्गयोगस्य च सम्बन्धविषये विचारः प्रवर्तते । शास्त्रेष्वेतान्यपि श्रेयस्साधनानीति संस्तुतानि सन्ति । तत्र कर्मविषये तावत् - अपाम

सोमममृता अभूम (तै. सं ३-२-५-१८) इति श्रूयते । सोमयागमनुष्ठाय सोमरसपानं कृत्वा अमृता अभूम इति । तथा "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति'' इति च श्रुतिर्विद्यते । एषु वचनेषु कर्मभिः नाशरहितः पुरुषार्थः प्राप्यत इति ज्ञाप्यते । तत्त्वज्ञानविषये च "ज्ञानादेव हि कैवल्य" मित्यादि प्रकरणेषु तत्त्वज्ञानेनैव मोक्षसिद्धिः इति उपदिष्टम् । योगविषये च - "न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्" (श्वेता. २-१२) इति योगविधिं प्रशंसन्ति । किं च "तँह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति भगवच्छरणागतिरूपा भक्तिरेव मुक्तेः साधनमिति उपदिष्टमस्ति । एषु एवं आकुलीभूते शास्त्रार्थे विधिषु कतमः साधीयानिति साधकस्य विचिकित्सा स्यात् ।

अस्य संशयस्य परिहारः कथमिति चेत् - एषु भगवद्भक्ति-रेवाऽधिकतरा । यत्कारणम् - भगवति प्रेमाभावे भगवदर्थं कर्म आचरितुं न शक्यते । तथैव भगवति रतिं विना तत्त्वज्ञानमपि नोत्पद्यत एव । उक्तं हि गीतासु -

***तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।***
***ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥*** *(गी. १०-१०)*

सततं प्रेमपूर्वकं ये मां भजन्ति तेषां मत्प्राप्तिकरं तत्त्वज्ञानमहमेव ददामीति भगवान् प्राह । अथ ध्यानयोगविषयेऽपि गीतासु -

***तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।***
***कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवाऽर्जुन ॥*** *(गी. ६-४६)*

इति भगवान् ध्यानं प्रशस्यतरमित्युक्त्वा पुनः भक्तिमेव प्रशंसति । यथा -

***योगिनामपि सर्वेषां मद्गतेनाऽन्तरात्मना ।***
***श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥*** *(गी. ६-४७)*

यस्तु श्रद्धया मय्येव मनः संस्थाप्य मां भजति स एव योगिषु अधिक इत्युक्तत्वेन भक्तिरेव अधिकतरेत्युक्तं स्यात् । भगवति प्रेम विना भगवद्ध्यानं कथं प्रवर्तते ? केवलध्यानस्य वस्वादय अन्ये देवाः विषया भवेयुः । परं तु भक्तस्य भक्तेः सर्वदेवात्मको वासुदेवोभगवान् विषयः । अतः कर्मज्ञानादिभ्यो ध्यानमधिकं, ध्यानयोगादपि भक्तिरेव अधिकतरेति सिद्धम् ।

पुनरेका शङ्का । तत्त्वज्ञानेन खलु अहङ्कारो विशीर्यते । ततश्च ज्ञानमेव मुक्तेः साधनमिति शास्त्रोक्तिः ऋज्वी ननु । एवं कृतस्य आक्षेपस्य उत्तरं पूर्वमेवाऽभिहितम् । ज्ञानभक्त्योः वैलक्षण्यं भेदो वा नास्तीति तथा भगवन्मयी ज्ञानाकारा मनोवृत्तिरेव नियमेन प्रेमाकारा च भवतीति पूर्वत्र समाधानमुक्तम् । तदत्र संस्मर्तव्यम् । तर्हि पुनरिदानीं भक्तिः ज्ञानादप्यधिकतरेति अत्र सूत्रे कथं प्रोक्तमिति संशयः । इमे द्वे उक्ती किं न विरुद्धे इति चेत् - नैतदेवम् । यत्कारणम् - भक्तेः गौणमुख्यभेदेन परिहारात् । भक्तिवत् ज्ञानमपि द्विप्रकारं भवति । परोक्षज्ञानमपरोक्षज्ञानं चेति । तत्र उपदेशश्रवणेन परोक्षज्ञानमेव जायते । पुनश्च मननिदिध्यासनाभ्यासेन अनुभवरूपं साक्षादपरोक्षं ज्ञानं भवति । एतदेव मुख्यार्थेन तत्त्वज्ञानमभिलप्यते । तर्हि परोक्षज्ञानं गौणमेव । मुख्यज्ञानस्य परभक्तेश्च न वैलक्षण्यं भेदो वाऽस्ति । अत एव वस्वादीन् देवान् ये ध्यायन्ति योगिनः, तेभ्यः भक्तयोगी विशिष्टः । स एव मुख्यार्थेन योगी भवति । यस्तु शास्त्रार्थं विनिश्चित्य परमात्म स्वरूपं परोक्षतया जानाति सः गौणो ज्ञानी । तस्य ज्ञानमपि गौणमेव । तादृशगौणज्ञानापेक्षया मुख्यज्ञानसमानपर्याया भक्तिः परभक्तिः । सा च परोक्षज्ञानरूपात् अधिकतरेति अस्मिन् सूत्रे प्रतिपादितम् । अतोऽत्र न कोऽपि विरोध इति ।

## फलरूपत्वात् ।।२६।।

इतश्च भक्तिः श्रेयसी । यत्कारणमियं भक्तिः कर्मज्ञानयोगादीनां फलरूपा भवति ।

६०. तत्कथमिति चेत् - 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये' (गी. ५-११) इत्युक्तरीत्या कर्मयोगनिष्ठानां कर्मानुष्ठानस्य चित्तशुद्धिरेव फलम् । योगमार्गनिरतानाम् - 'तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः' (गी. ६-१२) इत्युक्तप्रकारेण आसने उपविश्य चित्तमेकाग्रं कृत्वा इन्द्रियाणां निश्चलावस्थापन-मेव योगाभ्यासस्य फलम् । आत्मानात्मविवेकासक्तानां "अध्यात्म-ज्ञाननित्यत्वं तत्त्वंज्ञानार्थदर्शनम् (गी. १३-११) इत्युक्तरीत्या विचारं कुर्वतां सर्वसंशयान् परिहृत्य तत्त्वज्ञानफलेऽपवर्गे मनसः सम्यगाधान-मेव तत्त्वज्ञानस्य फलम् । इत्येवं फलसरणिं प्राप्तानामेव परमात्मनि परमप्रेमरूपा भक्तिरुल्लसति । ऊर्जिता च भवति । अतो भक्तिः कर्मज्ञानयोगानां फलमित्युक्तम् ।

एवं भक्तिः परमफलरूपेति । अपि च पूर्वप्रतिपादित-क्रमेणाऽऽवर्त्यमाना भक्तिः वृत्तिरूपा सती वृत्त्युपलक्षितात् आनन्दरूपात् परमात्मनोऽव्यतिरिक्तत्वादेव अमृतस्वरूपा च भवति । एवं प्रेमवृत्तेः पर्यन्ते प्रकाशमाना भक्तिः फलमित्युक्तेऽपि सा नित्येति सिद्धान्तस्य न काऽपि हानिः । अतः फलमिव फलमिति निरुक्तिमाश्रित्य सूत्रे फलरूपेत्यभिहितमिति ज्ञेयम् ।

अनेनैवाऽभिप्रायेण भगवानुद्धवं प्रति -

***न साधयति मां योगो न सांख्यं धर्म उद्धव ।***
***न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ।।*** *(भाग. ११-१४-२०)*

योगादयो मां साधयितुं न प्रभवन्ति । ऊर्जिता भक्तिरेवैव मां प्रापयितुं प्रभवतीति प्रोवाच ।

## ईश्वरस्याऽप्यभिमानद्वेषित्वाद्दैन्यप्रियत्वाच्च ॥२७॥

ईश्वरोऽपि अहङ्कारं द्वेष्टि । दैन्यं अनु प्रसीदति । अतो भक्तिर्गरीयसीति ।

## ईश्वरस्य इत्यस्य विवरणम्

६१. भक्तिलक्षणसूत्रे अस्मिन् इति सर्वनामशब्दं प्रयुज्य अत्र श्रीनारद ईश्वरेतिशब्दं प्रायुंक्त ; तत्राऽपि कारणमस्ति । तत् किमिति चेत् - इतः परं परभक्तेः साधनानि निरूपयितुं प्रारभते । साधनदशायां परमात्मना भक्तस्य च भेदोऽवश्यमङ्गीकरणीय एव । वस्तुतो भगवान् अनन्त इत्यतः स्वरूपेण परमार्थतः सः देशकालवस्तुपरिच्छेदरहित एव । अथापि व्यवहारदृष्ट्या यदिह बाह्ये अनेककर्तृभोक्तृसहितं नामरूपात्मकं च जगदुद्भूयाऽवभासते तस्य जगतः उत्पत्तिस्थिति-भङ्गानां मूलकारणत्वेन आधारभूतः सः परब्रह्मैवेति -

*यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । (तै.उ. ३-१)*

इत्याद्याः श्रुतयः उद्घोषयन्ति । एवं जगदुत्पत्तिस्थितिप्रलयानां आधारभूतो भगवानेव सर्वज्ञः सर्वशक्तः ईश्वराभिधेय इति श्रुतिस्मृतिषु व्यवह्रियते । यो ब्रह्मनामा चेतनात्मा सः मायोपाधिसम्बन्धेन ईश्वर इति व्यपदिश्यते । स एव चेतनात्मा अविद्याकल्पितोपाधिसम्बन्धेन जीव इति अभिधीयते । एष जीवस्तु अल्पज्ञोऽल्पवीर्यो भवति । गौणभक्ति-निरूपणायां अयं जीवेश्वरविभागः आकस्मिकोऽप्यावश्यक इति सूचनायाऽत्र सूत्रकारः ईश्वरशब्दं प्रायुङ्क्तेति विभावनीयम् ।

सूत्रे ईश्वरोऽभिमानद्वेषीति वदति । वस्तुतो विचार्यमाणे ईश्वरस्य न द्वेष्योऽस्ति न वा प्रियः । भगवानर्जुनं प्रत्येवमाह -

*समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।*
*ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।।* (गी. ९-२९)

सर्वप्राणिविषये समोऽहम् । सर्वत्र समव्याप्तः । किं तु ये मां भक्त्या भजन्ति ते मय्येव वर्तन्ते । अहमपि तेषु तिष्ठामीति । यथा च वन्हिः स्वसमीपागतस्य शीतमपाकरोति, दूरस्थस्य शीतं नापनुदति, तथैव भगवन्तं ये ये प्रेम्णा उपासते ते ते भगवद्रूपा एव भवन्तीत्यतः तेषामेव भगवदनुग्रहो भवतीति ।

किं तु येऽहङ्कारेण अहं कर्ताऽहं भोक्तेति मन्यन्ते ते भगवतः पृथग्भूताः इव भूत्वा परिच्छिन्नबुद्ध्या वर्तन्ते तादृशानां जनानां भगवान् सर्वव्याप्यपि दूरे इव भवति । तेऽज्ञानिनः स्वस्वकर्मफलं पुण्यापुण्यकृतमनुभवन्त्येव । अयमेवाऽर्थो भगवानभिमानद्वेषीति वचनेन सूत्रेऽभिहितः । यतो भगवान् दीनानाथनाथो भवति अतः सः दैन्यप्रियोऽस्ति । आर्तेषु शरणागतेषु प्रसन्नो भवतीति ।

## तस्याः ज्ञानमेव साधनमित्येके ।।२८।।

तस्याः भक्तेः तत्त्वज्ञानमेव साधनमिति केचनाऽऽचार्याः प्राहुः ।

## अन्योन्याश्रयत्वमित्यन्ये ।।२९।।

६२. कर्मज्ञानयोगानां भक्तिः फलमिति वचनेनैव तत् त्रयमपि भक्तिसाधनमित्युक्तप्रायमेव । तथापि तेषु यन्मुख्यं साधनं तन्निर्धारणायेदं प्रकरणम् ।

अविज्ञाते वस्तुनि प्रेम कस्यचिदपि नोत्पद्यते । वस्तुज्ञानं च तत्स्वरूपादीनां विचारेण सम्भवति । तस्मात् प्रथमं विचारपूर्वकं शास्त्रार्थं निश्चित्य वस्तुज्ञानं सम्पादयितव्यमिति केषाञ्चिन्मतम् । तन्मतरीत्या वस्तुज्ञानं परोक्षमिति कृत्वा तद् ज्ञानं गौणमेवेति स्पष्टम् ।

यथोक्तमस्माभिः पुर्वमेव परज्ञानं परभक्तिश्च अभिन्नं प्रत्येतव्यमिति । अस्य प्रमाणम् -

*अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।*
*इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥* (गी. १०-८)

अहं विश्वस्य कारणम् । मदालम्बनेन जगद्व्यापाराः प्रचलन्ति । इतीदं निर्ज्ञाय विवेकिनः प्रीतिभावपुरस्सरं मां भजन्ते इति भगवद्वचनम् । इदं ज्ञानं भक्तिसाधनमिति वदतां मतम् ।

६३. प्रीत्यविषयं वस्तु न कोऽपि परिगणयति । अविचारिते वस्तुनि न कस्याऽपि प्रेम उद्भवति । अत एकया दृष्ट्या वस्तुज्ञानेन तस्मिन् प्रेम उदेति । अन्यया दृष्ट्या वस्तुप्रीत्यैव तज्ज्ञातुं प्रवृत्तिः वस्तुज्ञानं च सञ्जायते । प्रेम्णैव वस्तुज्ञानमुद्भवतीत्यत्राऽपि प्रमाणमस्ति ।

*तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।*
*ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥* (गी. १०-१०)
*तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।*
*नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥* (गी. १०-११)

इति भगवद्वचनेन भक्त्या तत्त्वज्ञानमुद्भवतीत्यत्रापि प्रमाणमस्त्येव । एवं भक्तिज्ञानयोः किं पूर्वं किमपरमिति निश्चेतुं न शक्यते । अतः इमौ द्वावपि परस्परं परिपुष्यत इत्यन्येषां मतम् ॥

## स्वयं फलरूपतेति ब्रह्मकुमारः ॥३०॥

सा भक्तिः स्वयमेव फलरूपेति ब्रह्मात्मजः सनत्कुमारः सङ्गिरति ।

६४. ये तु भक्त्यनपेक्षया केवलस्वबुद्धिशक्त्यवष्टम्भेन जिज्ञासां कर्तुं प्रवर्तन्ते तेषां तत्त्वमहमवगच्छामीति मिथ्याभिमान एव सञ्जायते । तत्त्वविवेकस्तु दूरे एव तिष्ठति । परमात्मा सर्वेषामात्मा भवतीत्यतः तमवगन्तुं न कस्याऽपि शक्तिरस्ति । सर्वसाक्षिणं सर्वप्रत्यगात्मानं तं कः

केन कथं वा विजानीयात् । स स्वयंप्रकाशमानं वस्तु, तदवगमनाय साधनमुपकरणमेव नास्ति । श्रुतौ -

'विज्ञातारमरे केन विजानीयात्' (बृ. २-४-१४) य एव सर्वस्य विज्ञाता तं विज्ञातारं पुनः केन विजानीयादिति याज्ञवल्क्यो मैत्रेयीं प्रत्युपदिदेश । अतः परमतत्त्वं विषयीकृत्य ज्ञातुमशक्यमेव । अथापि ये भगवन्तमेव शरणमुपगम्य भजन्ति, ते भगवदनुग्रहेणैव भगवदपरोक्षज्ञानं समवाप्नुवन्तीति तु निश्चितम् । नैतावदेव । ये सदा बहिर्मुखाः मनुष्याः, तेषां भगवतस्तत्त्वं विज्ञेयमिति सहसा मनसस्तीव्रासक्तिः कथमुत्पद्येत ? अत एवोद्धवं प्रति भगवानाह -

*योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।*
*ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ।।*
*निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ।*
*तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम् ।।*
*यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।*
*न निर्विण्णो नाऽतिसक्तो भक्तियोगोऽस्य सिद्धिदः ।।*

(भाग. ११-२०-६ तः ८)

इति । ये जगद्विषयेषु विरक्ता भूत्वा कर्मसंन्यासं कृतवन्तः तेषां निःश्रेयसि ज्ञानयोगः साधनम् । अविरक्तानां कामिनां श्रेयःप्राप्तिं प्रति कर्मयोगः साधनम् । तदुभयाभावेऽपि कथञ्चिद्भगवत्कथादिषु सञ्जातश्रद्धानां मनुष्याणां भक्तिरेव श्रेयस्साधनं भवति । एवं च केनचित्सुयोगेन सञ्जाता चेद् भगवद्रतिः पुनर्भक्त्यैव परिवर्धिता सती भक्तावेव परिसमाप्ता भवतीत्येषा भक्तिकथा । अतो भक्तेरन्यत् प्रधानं साधनं न सम्भाव्यते । इत्थं च भक्तिः स्वयं फलरूपेति ।

लोके तावत् यस्मिन् वस्तुनि प्रीतिरस्ति तस्याऽन्वेषणे यत्नो भवति ।

अतस्तदन्वेषणं प्रेममूलकं भवेत् । परंतु लौकिके विषये तदन्वेषणयत्नः प्रेम्णा वर्धत इति न नियमः । प्रेम्णा आरब्धान्यपि कानिचित् कार्याणि जुगुप्साजनने पर्यवस्यन्ति । इदं वस्तु साध्विति पूर्वं भावना जातापि तत्प्राप्तिप्रयत्नकाले तस्मिन् दोषदर्शनेन मध्ये प्रयत्नः स्थगितो भवेत् । अथवा प्रियवस्तुनः प्राप्त्यनन्तरं तस्मिन् पूर्ववत् प्रीतिः न स्यात् । एवं लौकिके वस्तुविषये बहुधा विकल्पाः सम्भवेयुः । परंतु अलौकिके भक्तिविषये तथा न । सा सकृज्जाता चेत् तत्प्रेममाधुर्यानुभवेन भूयोभूयः परिवर्धमाना सती परिवृढा भवेत् । तदा तदन्तरायभूतः अहङ्कारः परिवृश्च्यते । एवं च अनन्ते प्रेमसागरे परमात्मनि ऐक्यं सिद्ध्यति ।

६५. भगवत्कथाश्रवणादिभिः उत्पन्नश्रद्धानां पुनश्च तत्रैव निरतानां पुरुषाणां परिचयक्रमेण बाह्यसाधनेभ्योऽन्तरङ्गसाधनान्येव प्रधानानीति तन्मनस्येव परिस्फुरति । तेषु साधनेषु अभिरुचिर्यदाऽभिवृद्धा भवति तदा ते स्वयमेव विविक्तस्थलमाश्रित्य अधिकाधिकतया भगवद्ध्यानाय उत्सुका भवेयुरेव । ततश्च -

*बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च ।*
*शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥*
*विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।*
*ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥*
*अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।*
*विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥* (गी. १८-५१ तः ५३)

इत्युक्तप्रकारेण यश्च साधकः चित्तशुद्ध्या अन्तःकरणं संयम्य बाह्यविषयान् परिवर्जयति, रागद्वेषादीन् व्युदस्यति, आश्रितैकान्तदेशः सन् त्रिकरणसंयमपूर्वकं नित्यं भगवद्ध्यानमेव कुर्वन् सुविरक्त्या अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं ममेत्यभिमानं च परिहृत्य तिष्ठति सः ब्रह्मरूप एव भवति । इदमेव परविज्ञानम् । तदा किल -

*ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।*
*समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥* (गी. १८-५४)
*भक्त्या मामभिजानाति यावान् यश्चाऽस्मि तत्त्वतः ।*
*ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥* (गी. १८-५५)

स एव परज्ञानी स एव परभक्तः । तस्य न शोकः न कामः । सः सर्वत्र सर्वजीवेष्वपि प्रकाशमानो भगवानेक एव परमार्थ इति साक्षात्पश्यति । तस्य भक्तस्य सर्वदा भगवत्प्रेम्णा विना अन्या मनोवृत्तिरेव नोदेति । सः सर्वं भगवानेवेति तत्त्वमनुभवन् भगवत्येव संलीनो भवति ।

एवमादौ गौणभक्तिरुदिता सती अभ्यासक्रमेण संवर्द्ध्य परभक्तिरूपेण परिपाकभावमापद्यत इति स्थितम् । अस्यां दशायां ज्ञानं भक्तिरिति उभयमपि समरसैकभावमाप्नुत इत्यतो ज्ञानमेव साधनं अथवा ते परस्परसमाश्रिते इत्यपि भेदज्ञानं प्रविलीय सर्वं भक्तिरेव संपद्यते इति ।

## राजगृहभोजनादिषु तथैव दृष्टत्वात् ॥३१॥

राजभवनं, भोजनं, इत्यादौ तथैव फलरूपतयैव दृष्टत्वात् । तद्विषयकज्ञानमात्रेण पुरुषार्थासिद्धेः । तदेव प्रपञ्चयति

## न तेन राजपरितोषः क्षुच्छान्ति (क्षुधाशान्ति) र्वा ॥३२॥

तेन ज्ञानमात्रेण राज्ञः परितोषो वा क्षुदुपशमो वा न भवतीति ।

६६. गौणज्ञानगौणभक्त्योर्मध्ये गौणभक्तिरेव परभक्तिं प्रति नियतं असाधारणं साधनमितीदं लोकसिद्धदृष्टान्तैरपि अवकल्पते । तथाहि - राज्ञः परिचयमात्रेण राजभवनसन्दर्शनमात्रेण वा राजानुग्रहरूपं फलं न प्राप्यते । भजनसेवादिभिः प्रीणनानन्तरमेव राजा सन्तुष्टः सन् सेवकाय सेवाफलत्वेन इष्टं धनादिकं प्रयच्छति । तथैव

तत्त्वशास्त्रव्युत्पत्त्या परमात्मज्ञानसम्पादनमात्रेण परमात्मनः सन्तोषो न भवत्येव । यस्य तु परमात्मनि प्रेमाभवति, यो वा प्रीतिकरणरूपसेवां करोति तस्य पुरुषस्य भगवदनुग्रहो भवतीति सम्भाव्यते ।

**"ये भजन्ति तु मां भक्त्या मयि ते तेषु चाऽप्यहमिति"** भगवद्वचनं यद्यपि ज्ञानिभक्तविषयं तथ्यम् । तथापि येन केनाऽपि रूपेण सेवितो भगवान् अनुगृण्हात्येवेति च न संशयः । लोके निरन्तरसेवकाय भृत्याय स्वामी भृत्यापेक्षितादधिकमेव अनुगृण्हातीति दृष्टम् । तत्र स्वामियोग्यताज्ञानं सेवकस्य अस्तु वा मा वा, फलं तु भवति । तत्र अनवरतसेवया यत्फलं प्राप्यं, तत् स्वामिस्वरूपज्ञानेन न भवतीति स्पष्टमेव । यद्यपि भगवान् लौकिकस्वामिवत् न दुराराध्योऽस्ति । तथापि प्रेमा नाम प्रेमकर्तारं प्रियतमेन सह ऐक्यमापादयतीति सहजनियमेन गौणभक्तः क्रमशो भगवत्येकीभूय आनन्दानुभवरूपां परभक्तिं सम्पादयतीतीदं सम्प्रतिपन्नमेव ।

एवमेव भोजने भोग्यपदार्थानां तद् गुणानां वा ज्ञानेन क्षुधा नापगच्छति । अन्नभुक्तौ प्रथमग्रासादारभ्य भोज्यवस्तुनि प्रीतिर्वर्धते क्रमेण च क्षुधाऽप्यपगच्छति । तुष्टिसिद्धिश्च भवति । एवमेव भगवत्प्रेमोदयादारभ्य तत्स्वरूपानुभव एव मधुरोऽस्तीत्यतो भगवद्भजनेनैव तदानन्दस्वरूपानुभवः सेत्स्यति । एषा सिद्धिः केवलेन परोक्षरूपतत्त्वज्ञानेन न भवतीति स्थितम् ।

## आदिशब्देन सङ्ग्राह्यविचारः

अत्र आदिशब्देन प्राप्यग्रामादयो गृह्यन्ते । तत्र ग्रामप्रापकमार्ग परिचयमात्रेण न ग्रामप्राप्तिर्भवति । एकैकपदपरिक्रमणेऽपि गन्तव्यदेशः समीपो भवतीति बुद्ध्या हर्षो भवति । एवं क्रमेण ग्रामप्राप्तिरूपं फलं च भवति । एवमेव नित्याप्तो भगवानात्मेति ज्ञानाभावेऽपि वस्तुतः भगवतः आनन्दरूपत्वात् साधको यथा यथा गौणभक्तिं कुरुते तथा तथा तस्य

मनोऽन्तर्मुखं भूत्वा भगवानेव सर्वभूतानां आत्मेति वाक्यार्थश्च अनुभवारूढो भवति । अतो गौणभक्तिरेव गौणज्ञानादधिकं साधनं परभक्तेरिति सिद्धम् ।

अपरं च परज्ञानमेव पर्यन्ते प्राप्यमित्यतो भक्तिवर्धनक्रमेणैव तत्त्वज्ञानमपि सुदृढीभवतीत्याचार्यपक्षोऽपि आञ्जस एवेति ।

सूत्रेऽस्मिन् क्षुच्छान्तिरिति स्थाने क्षुधाशान्तिरिति पाठान्तरमुपलभ्यते । तस्मिन् परिशील्यमाने क्षुधादीति पाठश्च स्यादिति अभ्यूहितुं शक्यते । यतो राजगृहभोजनादिष्विति यथा आदिशब्दः उपात्तः तथा क्षुधादिशान्तिरित्यत्राऽपि आदिशब्देन भवितव्यमिति । अस्मिन् पक्षे ग्रामाय प्रस्थितस्य मनुष्यस्य ग्रामोऽद्याऽपि कियद्दूरे वर्तते, कदा वाऽहं तं प्राप्नुयामिति कुतूहलः सहजः । तन्निवृत्तिश्च ग्रामदिशं यथा यथा पर्येति तथा तथा ग्रामप्राप्तिफलं च सिद्ध्यति । न तु तन्मार्गज्ञानमात्रात् । तथैव भगवत्प्राप्तिं प्रति आकांक्षायाः निवृत्तौ गौणभक्तिरेव अपेक्षितेति आदिशब्दः सूचयति ।

## तस्मात् सैव ग्राह्या मुमुक्षुभिः ।।३३।।

तस्मात् मुमुक्षुभिः सा भक्तिरेव परिग्राह्येति ।

६८. एवं च साक्षात् कर्मज्ञानयोगाः उपासकैः साधिताः भवन्तु मा वा, परं तत्र सर्वेष्वपि साधनेषु नान्तरीयकतया ओतप्रोतभावेन भक्त्याः अवश्यम्भावित्वेन गौणज्ञानापेक्षया गौणभक्तिरेव परमपुरुषार्थं प्रति मुख्यं साधनं भवति । ततश्च भक्तिरेव साधनं भक्तिरेव फलमिति सिद्धान्तस्य न कोऽप्यपवादोऽस्तीतिदं अवगम्य साधकाः भक्तिमेव साधयन्तु । तर्हि अन्यानि साधनानि शृङ्खलाकर्षणविधिना आकृष्टानि भूत्वा स्वयमेवाऽनुसरन्ति । इत्येवं परभक्तेः सिद्धान्तभागः समग्रो निरूपितो भवति ।

# ११. अथ साधनभागः प्रस्तूयते

## तस्याः साधनानि गायन्त्याचार्याः ।।३४।।

तस्याः भक्तेः साधनानि प्रसिद्धा आचार्याः इत्थं उपदिशन्ति ।

६९. परभक्तेः प्राप्त्यनन्तरं भक्तः विविक्तसेवी भूत्वा भगवत्स्मरणानन्दे एव तत्परः तल्लीनश्च भवति । तदनन्तरं तस्य कर्तव्यं किमपि नाऽवशिष्यते । परभक्तेः प्रागपि भगवन्तं प्रेम्णा भजमानाः सन्ति । तेषां प्रायो भक्त्या भगवता वा प्राप्तव्यं फलं किञ्चिद् भविष्यति । अतस्तेषां सा गौणभक्तिरेव भवति । तत्प्रकारविवरणं अग्रे ५६ तमे सूत्रे विवरिष्यते । तत्राऽऽदौ गौणभक्तिरेव उदिताऽङ्कुरिता अभ्यासक्रमेण परिपोषिता सती अन्ते परभक्तिरूपेण परिणमतीत्यतः भक्तिः स्वयं फलरूपेति पूर्वमेव प्रतिपादितम् । अतः सा गौणभक्तिरपि कथं अङ्कुरिता भवति ? तत्परिपोषणे अपेक्षिताः सामग्र्यः काः ? इतीदं निवेदयितुमिदं प्रकरणम् । ताः सामग्र्यः एवाऽत्र साधनशब्देन निगद्यन्ते ।

ननु भक्तिरेव भक्तेः साधनमिति पूर्वोक्तं विरुध्यते न किम् ? इति चेत् - नैतदेवम् । वृक्षस्य बीजकणवत् भक्तेः भक्तिरेव बीजमिति तु तथ्यम् । तथापि बीजावापकाले क्षेत्रं परुषमस्ति चेत् तत्क्षेत्रं कर्षणसमीकरणादिना पूर्वं संस्कृत्यैव बीजप्रक्षेपः कार्यः । अन्यथा उप्तं बीजं तत्रैव अवभर्जितं स्यात् । सस्यबीजमङ्कुरितमपि पोषक-साराभावे न प्ररोहति । तदा तत्र दोहदसारवस्तु दातव्यं भवति । सस्याङ्कुरः पल्लवितोऽपि तत्समन्ततः काशानां प्ररोहे तानि कुचराण्युन्मूल्य विरोधमपनयेत् । अङ्कुरभक्षिभ्यः पक्षिभ्यः तथा सस्यचरेभ्यः अजादिभ्यः प्रणिभ्यो गोपनाय च परितः वृति-प्रकल्पनादिना रक्षणविधिं विदध्यात् । एतैरुपायैः सम्भाव्यमानाः सस्यप्ररोहोपसर्गाः अपनीताः स्युः । इत्थमेवाऽत्र भक्तिबीजेन भक्तिवृक्षः

उद्धूय भक्तिफलोद्गमपर्यन्तं मध्ये सम्भाव्यमानानां प्रतिबन्धकानां परिहाराय अनुष्ठीयमानानुपायानत्र साधनान्युदाहरन्ति ।

## तत्तु विषयत्यागात् सङ्गत्यागाच्च ।।३५।।

तत्साधनमपि विषयत्यागेन सङ्गत्यागेन च सिद्ध्यतीति ।

७०. भक्तिशब्दः संस्कृते स्त्रीलिङ्गोऽप्यत्र प्रेमार्थकमिति कृत्वा तदिति नपुंसकलिङ्गशब्देन परामृष्टः । अथवा पूर्वं यल्लब्ध्वेत्यादि सूत्रे यदिति निर्देशवदिति विभावनीयम् ।

विषयेषु प्रीतिः फलेष्वासक्तिश्च भक्तेः कटुविरोधिन्यौ स्तः । अतो भगवद्भक्तः प्रथमतः विषयप्रीत्यासक्ती सन्त्यजेदित्यर्थः ।

*गन्धान् रसान् नाऽनुरुन्ध्यात् सुखं वा*
*नाऽलङ्कारांश्चाऽप्नुयात् तस्य तस्य ।*
*मानं च कीर्तिं च धनं च नेच्छेत्*
*स वै प्रचारः पश्यतो ब्राह्मणस्य ।।* (मो.ध. २५१-१)

विषयास्वादान् तथा विषयवासनाः नाऽनुरुन्ध्यात् । विषयानुभवसुखेषु नानुरज्येत । सुवर्णरजताद्यलङ्कारमण्डितो विजृम्भितो न भवेत् । धनसम्मान कीर्त्यादीन् नाऽनुधावेत् । एष एव तत्त्वविदो ब्राह्मणस्य युक्तो व्यवहारः । इत्युक्तरीत्या आदौ विषयसुखभोगत्याग एव परमात्मनि प्रेमोद्गमस्य मूलकारणमस्ति । अत्र विषयशब्देन केवलं बाह्यदेशे परिदृश्यमानो वस्तुग्राम इति न मन्तव्यम् । कलत्र पुत्रमित्रवित्तपशुभृत्यबान्धवादय इत्येते सर्वेऽपि विषया एव । इमे विषयाः ममेष्टार्थं साधयन्तीति विश्वस्य यः पुरुषः एतान् सङ्गृण्हाति पालयति पोषयति च सः पर्यन्ते तैः स्वयमेव वञ्चितो भूत्वा पश्चात्तपति । तदेतत् सर्वं दुःखबीजमित्येव अवगच्छेत् ।

*जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्*
*पुष्णाति यः प्रियचिकीर्षितया वितन्वन् ।*
*सोऽन्ते सुकृच्छ्रमवरुद्धमनाः स्वदेहं*
*सृष्ट्वा स्वबीजमवसीदति वृक्षधर्मः ।।*

इति व्यासोक्तरीत्या यः पुरुषः एषां भार्यापुत्रादीनां प्रियमाचरामि तेऽपि मम हितेष्टं साधयन्तीति विश्वस्य तान् सङ्गृह्य संगोपायति स मनुष्यः स्वयमात्मानं अतिकृच्छ्रसात् कृत्वा बीजाज्जायमानो वृक्ष इव पुनः देहप्राप्तये बीजावापं करोति । इत्थं स्वहितं नाशयित्वा ये विषयसङ्ग्रहतत्पराः सन्ति ते अहो कियन्तो मूर्खाः ! यतो हि देहादिविषयाः वयमेव तवाऽऽत्मेति पुरुषं वञ्चयन्ति भ्रामयन्ति च । किं च सत्यात्मानं परमात्मानं तिरोधाय ते पुरुषं सर्वदा विस्मृतात्मकमेव प्रकुर्वन्ति ।

विषयभोगत्यागमात्रेण 'वयं त्यक्तविषया' इति न भावयेत् । यत्कारणम् - विषयेषु त्यक्तेष्वपि तेषां सङ्गो मनसि वासनारूपेण वर्तेत । संसारे सारो नास्तीति वाचि केवलं वैराग्यं न किञ्चित्करम् । यतः -

***बीभत्सा विषया जुगुप्सिततमः कायो वयो गत्वरं***
***प्रायो बन्धुभिरध्वनीव पथिकैर्योगो वियोगावहः ।***
***हातव्योऽयमसार एष विरसः संसार इत्यादिकं***
***सर्वस्यैव हि वाचि चेतसि पुनः कस्याऽपि पुण्यात्मनः ।।***

इति सुभाषितोक्तिरीत्या वाचि वैराग्यप्रदर्शनं सर्वस्याऽपि सुशकम् । यथार्थतस्तु त्रिकरणपूर्वकं वैराग्यं कस्याऽपि पुण्यशरीरिण एव स्यात् । एवं चाऽस्य दोषस्य सङ्ग एव कारणमिति विज्ञाय सर्वथा सङ्ग एव त्यक्तव्य इति ।

*अथापि सङ्गः परिवर्जनीयो गुणेषु मायारचितेषु तावत् ।*
*मद्भक्तियोगेन दृढेन यावत् रजो निरस्येत मनःकषायः ।।*

(भाग ११-२७-२८)

इति भगवदुक्तप्रकारेण रजोगुणनिवृत्तये मनःकषायप्रहाणाय च गुणेषु देहादिषु अवश्यं सङ्गत्यागः कर्तव्य इति ।

## अव्यावृत्तभजनात् ।।३६।।

निरन्तरं भगवद्भजनेन तत्सिद्धिर्भवति ।

७१. पूर्वसूत्रे निषेधमुखेन साधनद्वयं बहिः विषयत्यागः अन्तः सङ्गत्याग इति हेयविषयोऽभिहितः । बाह्यवस्तूनां प्रहाणेऽपि भोग्यवस्तुषु सङ्गोऽप्रच्युत एव तिष्ठति । अतः सङ्गं त्यक्तुं मनसा कर्तव्यं किञ्चित् साधनमपेक्षितं आवश्यकं च भवति । मनसश्चैषः स्वभावः - एकमवलम्बते अपरं त्यजतीति । अतोऽत्र कर्तव्यं विधिमुखेन प्राह - भगवन्तं निरन्तरं भजेतेति । परमात्मध्यानाभावे विषयचिन्ता नियमेन समापतति । *जगच्चिन्तायां सत्यां भगवद्विस्मृतिः, भगवत्स्मरणे सति जग ाध इति स्थितम् ।*

*यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते ।*
*सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया ।।*

(गारुडे. पू. सं. २२२-२२)

इति गारुडपुराणोक्तिः स्मर्तव्या । मनसो बहिः प्रसरणमेव विषयचिन्तोद्भवे कारणम् । भगवत्स्मरणाभाव एव बहिर्मुखत्वे कारणम् । अतो भक्ताः -

*मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।*
*कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥*     *(गी. १०-९)*

इति गीतोक्तिमनुसृत्य भगवत्येव मनः समाधाय सकलेन्द्रियाणि च तत्रैव व्यापारयित्वा भगवद्विषयमेव परस्परं बोधयन्तो भगवतः कल्याणगुणान् ज्ञानबलवीर्यतेजऐश्वर्यानन्दादीन् संस्मरन्तः स्मारयन्तश्च कालं नयन्तीत्येषः परभक्तस्वभावः । य इह भक्तिं साधयामीति प्रयतते सोऽवश्यमेव तादृशान् भक्तान् अनुवर्तेत । अत एव श्रुतिराह -

**तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ** । इति । (मुं. २-२-५) विषयेषु मनो निहितं चेत् तत् तन्मयमेव भवति । तथैव भगवति आधीयते चेत् भगवन्मयमेव भवतीति तु सुनिश्चितम् । तदुक्तम् -

***यत्र यत्र मनो देही धारयेत् सकलं धिया ।***
***स्नेहाद् द्वेषाद् भयाद्वाऽपि याति तत्तत्स्वरूपताम् ॥*** (भाग. ११-९-२२)

मनसः तत्तत्सारूप्यप्राप्तौ स्नेहद्वेषभयादिकमेव निमित्तम् । किं च -

***विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते ।***
***मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥***
***तस्मादसदभिध्यानं यथा स्वप्नमनोरथम् ।***
***हित्वा मयि समाधत्स्व मनो मद्भावभावितम् ॥*** (भाग ११-१४-२७, २८)

हे उद्धव, विषयचिन्तायां मनो यथा विषयेष्वासक्तं भवति तथा मच्चिन्तायां तन्मनः मय्येव प्रविलीयते । स्वप्नमनोविकल्पयोः प्रतीयमाना विषयाः यथा वितथाः तथा जाग्रद्दशायामपि मुधेति निश्चित्य विषयचिन्तां परित्यज्य मत्प्रेम्णा परिपूर्णं मनः मय्येवाऽऽधत्स्वेति उद्धवं प्रति भगवानुपदिदेश ।

## लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ॥३७॥

लोकव्यवहारसमयेऽपि भगवतो गुणानां श्रवणं सङ्कीर्तनमित्यादिभिः उपायैः सा भक्तिः साध्यत इत्यर्थः ।

७२. सदा भगवच्चिन्तनमेव कुर्वन्नासीतेति हि पूर्वसूत्रेऽभिहितम् । एवं नियमनिबन्धनवत्यां भक्तौ स्थितस्याऽपि भोजनमित्यादयोऽपरिहार्याः व्यवहाराः समापतन्ति । लौकिकैर्जनैः साकमनिवार्येषु कर्मसु प्रवर्त्य व्यवहारः कर्तव्यो भवति । एवं च अव्यावृत्तभजनमपि कस्याऽपि कथं वाऽपि कर्तुं शक्यमिति प्रश्नस्य उत्तरमत्राऽभिहितम् ।

भगवतो गुणास्तु -

*ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।*
*भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥* (वि.पु. ६-५-७९)

हेयगुणसम्बन्धं वर्जयित्वा ज्ञानेत्यादि षड्गुणान् स्वस्वरूपतया प्राप्तवान् भगवानित्यर्थः । वन्हिः औष्ण्यप्रकाशौ प्राप्तोऽस्ति यथा । एवं सम्पन्नतमस्य भगवतः कल्याणगुणान् कीर्तयन् वा शृण्वन् वा जनैः सह वार्ताकथालापेन व्यवहारं निर्वर्तयेत । एतेन अविच्छिन्नश्रवण-सङ्कीर्तनप्रबन्धेन मनोगताः विषयवासनाः विलुप्यन्ते । श्रवण-वत्स्मरणेऽपीति ज्ञेयम् । परं तु भगवदशेषकल्याणगुणान् स्मर्तुमपि कस्यचिदपि न शक्तिरस्तीति स्पष्टमेव । अथापि भगवच्छब्दस्थानां अक्षराणां सङ्केतितार्थो महद्भिः निरुक्तोऽस्ति । तावन्मात्रस्मरणमपि व्यवहारकाले भक्त्यभिव्यक्तये अलं भवति । अस्मिन् विषये विष्णुपुराणेऽभिहितम् -

*अशब्दगोचरस्याऽपि तस्य वै ब्रह्मणो द्विज ।*
*पूजायां भगवच्छब्दः क्रियते ह्युपचारतः ॥* (वि.पु. ६-५-७१)

परमात्मा न कस्यचन शब्दस्य वाच्योऽर्थोऽस्ति । अथापि तत्पूजाराधनेषु भगवच्छब्दं उपचाराय प्रयुञ्जते । यतो हि -

*सम्भर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः ।*
*नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥७३॥*

*वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि ।*
*स च भूतेष्वशेषेषु वकारार्थस्तथाऽव्ययः ॥७४॥*

तत्र भकारः पोषकः इति आधारश्चेत्यर्थद्वयं वक्ति । गकारः कर्मफलं गमयति जीवानिति, सृष्टा सर्वानुत्पत्तिं गमयतीति च अर्थद्वयमभिदधाति । वकारः यस्मिन् सर्वान् वासयतीति, स्वयं सर्वेषु भूतेषु वसतीति च अर्थद्वयमाह । एवं भगवच्छब्दे एकैकमक्षरमपि द्वौ द्वौ गुणविशेषरूपौ अर्थौ अवगमयतीति विभावनीयम् । किं च -

*ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।*
*ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥७५॥*

एते षट् भगशब्दार्थाः । तद्वान् भगवान् । अर्थात् स्वरूपभूतैरेतैः षड्भिः गुणैर्युक्तः इत्यर्थं मनसि कृत्वा भगवद्गुणान् संस्मरेत् । किं च -

*उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।*
*वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥*

प्राणिनां उत्पत्तिं तेषामवसानं, एवं भूतानि कुतः आगच्छन्ति ? क्व गच्छन्ति ? विद्यास्वरूपं किं, तथा अविद्यायाः स्वरूपं च किम् ? इत्येतानि यो विजानाति स एव भगवानिति अभिधीयते । इत्येवं संस्मरन् कालं नयेत् ।

एवं भगवतः श्रवणस्मरणाभ्यां प्रेम्णः सातत्यं वर्णितम् । अथेदानीं गुणकीर्तनेन तत्सातत्यप्रकारो वर्ण्यते ।

भगवद्गुणानां सङ्कीर्तनं नाम महापुण्यफलमित्येव मन्तव्यम् । यतः श्रीनारदो व्यासेन साकं संलपन्नेवमाह -

*इदं हि पुंसस्तपसः श्रुतस्य वा*
*स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ।*

*अविच्युतोऽर्थः कविभिर्निरूपितो*
*यदुत्तमश्लोकगुणानुवर्णनम् ॥* (भाग. १-५-२२)

इह मनुष्येण कृतस्य तपसः अध्ययनस्य यज्ञस्य दानस्य वाग्व्यवसायस्य बुद्धिव्यायामस्य च परमं सार्थक्यमिदमेव हि यद् भगवतः उत्तमश्लोकस्य कल्याणगुणानां अभिवर्णनमिति अस्य श्लोकस्य तात्पर्यम् ।

*यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ।*
*निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥*
(भाग. ५-१२-१३)

ग्राम्यकथाप्रतिरोधिका या भगवत्कथा सा यत्र पस्तूयते तत्र मुमुक्षुः अवहितो यद्याकर्णयति तर्हि तस्य बुद्धिः स्वस्वाभाविक-रजस्तमोभावं अतिमुच्य शुद्धा सात्त्विकीभूय भगवत्येव पर्यवतिष्ठते ।

## कीर्तनम्

७३. एवमेव भगवद्गुणसङ्कीर्तनेनाऽपि बुद्धिः भगवत्येव परिनिष्ठिता भवति । एवं बुद्धिरेकाग्रा भवति चेत्तर्हि पूर्वसुकृतं फलितमिति मन्तव्यम् । भगवद्विश्वरूपदर्शनेन विस्मितोऽर्जुनः तदा यदुदगिरत् तद्वाक्यसंस्मरणं अत्रोचितम् ।

*स्थाने हृषीकेश तव प्रकीर्त्या*
*जगत्प्रहृष्यत्यनुरज्यते च ।*
*रक्षांसि भीतानि दिशो द्रवन्ति*
*सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥* (गी. ११-३६)

हे स्वामिन्, तव माहात्म्यसङ्कीर्तनेन जगदेव अत्यन्तं हर्षितं, तथा त्वय्यतीव अनुरक्तं च । राक्षसाः भीताः पलायमानाः सन्ति ।

सिद्धपुरुषाः च विनम्राः भवन्तं नमस्कुर्वन्ति इति । एवं भगवतः सद्गुणानां सङ्कीर्तनेन आस्तिकानां हर्षोऽभिवर्धते । यस्मात् सर्वेषामात्मा भगवानेवाऽस्ति अतः स एवाऽस्माकमन्तर्वर्तत इत्यनुस्मृतिः एव एषां हर्षकारणमस्ति । अत्र न केवलं हर्षलाभः । भगवत्सङ्कीर्तनं यथा यथा प्रवर्तते तथा तथा तस्मिन्ननुरागोऽपि विवर्धते । तदा हृदये विद्यमानाः पापवासनारूपाः राक्षसाः ततोऽपक्रामन्ति । अन्तःकरणं परिशुद्धं भवति । तदा योगसिद्धयोऽपि स्वयमेव सङ्कीर्तनकर्तुः समीपमागत्य भो स्वामिनः, अस्मान् स्वीकुर्वन्तु इति प्रार्थयन्ते । तस्मात् भगवद्गुणनामसङ्कीर्तनं नाम न केवलं भक्तिसाधनम् अपि तु परमपुरुषार्थसिद्धेरपि तत् कारणं समस्तीति मन्तव्यम् ।

## मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद्वा ॥३८॥

ईदृशी भक्तिः प्राधान्येन महात्मनां कृपयैव प्राप्यते । भगवतः एव कृपालेशाद्वा । प्राप्यत इति शेषः ।

७४. साधूनां महात्मनां सङ्गः साधनानामपि साधनमस्तीति सूचयितुमत्र मुख्यतस्तु इत्युल्लिखितम् ।

*सत्सङ्गलब्धया भक्त्या मयि मां स उपासिता ।*
*स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम् ॥*

*(भाग ११-११-२५)*

साधूनां सहवासेन प्राप्तया भक्त्या तदुपदेशविधिना मामुपास्य साधकः सद्भिरुपदर्शितं परमपदमेव प्राप्नोतीति भगवान् उद्धवाय सञ्जगाद । साधूनां सङ्गेन भगवद्भक्तिरनुक्रमिष्यतीति कपिलदेवो मात्रे देवहूत्यै प्राबोधयत् । यथा -

*सतां प्रसङ्गान्मम वीर्यसंविदो*
*भवन्ति हृत्कर्णरसायनाः कथाः ।*

*तज्जोषणादाश्वपवर्गवर्त्मनि*
*श्रद्धा रतिर्भक्तिनुक्रमिष्यति ॥* *(भाग. ३-२५-२५)*

साधुसङ्गे श्रोत्रयोस्तथा हृदयस्याऽपि रसायनरूपाः भगवन्माहात्म्यप्रसङ्गाः कथाः संल्लापाश्च उपलभ्यन्ते । तेषां सेवनोपासनेन अनुपदमेव अपवर्गमार्गे श्रद्धा प्रीतिः भक्तिश्च अनुक्रमेण विवर्धत इति ।

## 'वा' शब्दाभिप्रायविवरणम्

७५. अस्मिन् सूत्रे महत्कृपयैव इत्युक्त्वा पुनः भगवत्कृपालेशाद्वेत्युक्तौ किञ्चनेङ्गितमस्ति । तत् किमिति चेत् - साधुजनसंसेवया तत्कृपया भक्तिः प्राप्यत इति तु सुनिश्चितम् । परं तत्कृपैव तु कथं प्राप्तव्या इति चेत् - भगवत्कृपालेशेनैव लभ्यत इति ज्ञापितम् । सूत्राक्षरैः किं ज्ञाप्यत इति चेत् - इह तावदस्माकं साधुसङ्ग एव दुर्लभः । अतो यावत् सज्जनलाभः तावत्पर्यन्तं हेस्वामिन्, भवज्जनसङ्गं देहीति भगवन्तमेव रहः प्रार्थयेत । अनया प्रार्थनया भगवान् प्रसीदति । साधुसङ्गं चाऽनुगृण्हाति । एवं साधुसङ्गलाभे तत्कृपया भक्तिः प्राप्यते इति । वाशब्दस्य एवेत्यवधारणार्थोऽप्यस्ति । तत्पक्षे महत्कृपयैव भगवत्कृपयैव भक्तिलाभ इत्यर्थोऽवगन्तव्यः । उपासकः भगवत्स्वरूपं जानातु वा न वा, किं तु हे देव, तव स्वरूपं न जानाम्यहम् । त्वं योऽसि सोऽसि । तादृशाय तुभ्यं नमः । इत्येवं भजतो भक्तस्य महत्सङ्गो लभ्यत एवेति अग्रे ४० तमे सूत्रे स्पष्टं भविष्यति । इत्थं च येषां सुकृतिनां आदावेव महत्सङ्गो लब्धः, तेषां सत्सङ्ग एव मुख्यं साधनं भवति । येषां तु विद्यामदादिकारणवशात् सत्सङ्गप्राप्तौ प्रतिबन्धकमस्ति तेषां भगवत्कृपालेशेन सत्सङ्गप्राप्तिः, अथ च तेन भक्तिसिद्धिरिति ।

## महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च ॥३९॥

महात्मनां सङ्गो दुर्लभः, तत्परिज्ञानं दुर्गमं, यदि स लभ्यते तर्ह्यमोघश्च ।

## महत्सङ्गो दुर्लभः इत्यस्य विवरणम्

७६. पूर्वसूत्रार्थविवरणे योऽस्माभिः प्रतिपादितोऽर्थः सोऽत्र स्फुटमभिधीयते । ननु सङ्गत्यागो भक्तेः साधनमिति पूर्वत्रोक्तमथापि अत्र महत्सङ्गः कर्तव्य इति कथमुच्यते ? सत्सङ्गोऽपि सङ्ग एव हि । इत्याक्षेपस्य तु शब्देन परिहारः सूच्यते । भुक्तमन्नं जरयितुमशक्तः पुरुषः शुण्ठीखण्डं भक्षयति चेत् तत् अन्नं जरयित्वा स्वयमपि जीर्णं भवति । तथैव महत्सङ्गः कृतश्चेत् तेन सर्वसङ्गोऽपि परिहृतोभवति । महात्मानः श्रद्धापुरस्सरं मोक्षमार्गमनुवर्तमानाः परभक्ता एव भवन्ति । परं तु तादृशाः महात्मानः के ? ते कुत्र तिष्ठन्ति ? इति परिज्ञातुमेव दुःशकम् । अस्मिन् विषये कपिलो मातरं प्रत्येवं प्राबोधयत् -

*तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् ।*
*अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥*
*मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम् ।*
*मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः ॥*
*मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च ।*
*तपन्ति विविधास्तापाः नैतान् मद्गतचेतसः ॥*
*त एते साधवः साध्वि सर्वसङ्गविवर्जिताः ।*
*सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥*

*(भाग. ३-२५-२१ तः २४)*

सत्पुरुषाः एवम्धर्माणो भवन्तीति । एतादृशैर्महापुरुषैः सह सङ्गो भवति चेत् विषयत्यागः सङ्गत्यागश्च बाढं स्ववशो भवति ।

## अगम्य इत्यस्य विवरणम्

७७. यस्मात् सत्पुरुषाः महात्मानो भवन्त्यतस्ते स्वमाहात्म्यं नैव प्रकटयन्ति । न तेऽहङ्कारेण विजृम्भन्ते । अतस्ते अस्मत्प्रत्यक्षे स्थिताः अपि "एते भगवत्प्रियाः साधवः" इति अस्माभिः न परिज्ञायन्ते । जातुचित् तेषां बाह्याचरणं वीक्ष्य "एते मन्दाः, एतैः किं साध्यते ? एतेऽपि मनुष्याः" इति विभाविताः स्युः । अथवा तुच्छबुद्ध्या ते गर्हणास्पदाः अनादरणपात्राण्यपि भवेयुः । क्वचित्तु दैवयोगात् तेषां शुद्धं चारित्रं समीक्ष्य "एते ते महात्मानः" इति परिचयः प्राप्येत । मनुष्येण आत्मनः पावित्र्यसम्पादनाय दूरप्रयाणायासमनुभूय तत्र तीर्थक्षेत्रादिकं सन्दृश्य स्नानदानादिकं च कर्तव्यं भवति । साधुसङ्गमे तु न तथा प्रयासः । उक्तं हि -

*न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।*
*ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥* (भाग. १०-४८-३१)

प्रभूतजलवत्तामत्रेण न पुण्यतीर्थानि भवन्ति । मृच्छिलामयाः पुत्तलाः न तथ्यतो देवताः । महात्मभिःप्रतिष्ठापितत्वेन सेवितत्वेन च तानि तीर्थानि ताश्च देवताः भवन्ति । तेषां चिरकालसेवनया आत्मशुद्धिर्भवति । दर्शनादेव साधवः । साधवस्तु दर्शनमात्रेण जनान् पावयन्ति । एवं महात्मसङ्गः अनन्तफलदः समस्तीति ।

## अमोघ इत्यस्य विवरणम्

७८. एवं महत्सङ्गो बहुफलक इत्यतः सः अमोघः नियमेन फलदायक इति यावत् । तत्रापि तेषां य उपदेशःसोऽपि महानर्घ इति ।

*उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥*
*यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।*
*येन भूतान्यशेषेण द्रक्ष्स्यात्मन्यथो मयि ॥* (गी. ४-३४, ३५)

इति भगवदुपदेशरीत्या भक्तज्ञानिनां एकैकेन वचनेन मनुष्यस्य मोहजालं विशीर्यते । तथा स्वात्मभूते भगवति सर्वाणि भूतानि भवन्तीति दिव्यं ज्ञानं परिस्फुरति । अत एव सुभाषितकार आह -

*उपचरितव्याः सन्तो यद्यपि कथयन्ति नैकमुपदेशम् ।*
*यास्तेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि ॥*

इति । किं च -

*सत्सङ्गमो यर्हि तदैव सद्गतौ*
*परावरेशे त्वयि जायते मतिः ॥* (भाग. १०-५१-५४)

इति मुचुकुन्दोक्तिवत् यदा वा साधुसङ्गतिः तदैव हि सन्मार्ग प्रवृत्तिः भगवति च प्रेमनिर्भरं मनो भवतीति ।

## लभ्यतेऽपि तत्कृपयैव ॥४०॥

एवं दुर्लभोऽपि महत्समागमः भगवत्कृपयैव सम्प्राप्यत इति ।

७९. महात्मनां सङ्गो दुर्लभ इति तु सत्यम् । किं तु भगवन्तमेव आराधयतां सुकृतिनां तदनुग्रहेणैव सत्सङ्गः प्राप्यत इत्यपि तथ्यम् । विवेकचूडामणिग्रन्थे उक्तम् - यथा

*दुर्लभं त्रयमवैतद् दैवानुग्रहहेतुकम् ।*
*मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥३॥*

दुर्लभमप्येतत्त्रयं भगवदनुग्रहेणैव लभ्यते । अतस्तत्प्राप्तिपर्यन्तम् -

*ज्ञात्वाऽज्ञात्वाऽथ ये वै मां यावान् यश्चाऽस्मि यादृशः ।*
*भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥*

(भाग. ११-११-३३)

एवं भगवत्स्वरूपं विभूतिं जानातु वा न वा, परं तु -

*त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।*
*त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥*

इत्येवं शरणागतिभावेन ये भजन्ति तेषां भगवानेव सत्सङ्गमनुगृण्हाति । तद्भजनप्रकारं च सामान्यतो भगवानेव उद्धवाय उपदिदेश - यथा

*मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम् ।*
*परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनम् ॥*
*मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ।*
*सर्वलाभोपहरणं दास्येनाऽऽत्मनिवेदनम् ॥*
*मज्जन्मकर्मकथनं मम पर्वानुमोदनम् ।*
*गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः ॥*
*यात्रा बलिविधानं च सर्ववार्षिकपर्वसु ।*
*वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥*
*ममाऽर्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ।*
*उद्यानोपवनाक्रीडपुरमन्दिरकर्मणि ॥*
*संमार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः ।*
*गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥*
*अमानित्वमदम्भित्वं कृतस्याऽपरिकीर्तनम् ।*
*अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥*
*यद्यदिष्टतमं लोके यच्चाऽतिप्रियमात्मनः ।*
*तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ॥* *(भाग. ११-११-३४ तः ४१)*

इत्युक्तेषु विधिषु स्वाधिकारयोग्यतानुरोधेन तानि तानि कर्माणि यथाशक्ति समाचरेत् । एतेन भगवत्प्रसादो महापुरुषसङ्गमश्च साध्यते । इति ।

## तस्मिंस्तज्जने भेदाभावात् ।।४१।।

यत्कारणम् भगवतो भगवद्भक्तानां च मिथो भेदो नास्ति इति ।

८०. भगवान् यदि प्रसन्नस्तर्हि तद्भक्तानां महापुरुषाणां सङ्गो लभ्यत एवेति हि पूर्वमुक्तम् । तत्कारणं किमिति चेत्-भक्ताः खलु भगवद्रूपसूर्यस्य किरणरूपाः भवन्ति । वयं श्रद्धापुरस्सरं तस्य शरणमुपयाम चेत्तदा स एव भक्तरूपेण अस्माकं दर्शनं ददाति । यथा भगवद्रहितं स्थलमेव नास्ति तथा भक्तरहितं स्थलमपि नास्ति । किं तु इमे भक्ता इति प्रत्यभिज्ञातुं प्रथमतोऽस्माभिः सामान्यरूपेणाऽपि भगवानुपासितः स्यात् । सूर्यं द्रष्टुं वयं गृहाद्बहिर्निर्गच्छाम यदा तदा अस्मासु तत्किरणसंस्पर्शो यथा भवेदेव तथैव भगवदनुग्रहायैव समुत्सुकानां उपासकानां भक्तजनसन्दर्शनं भविष्यत्येव । आह हि भगवान् -

*प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।* (गी. ७-१७)
*ये भजन्ति तु मां भक्त्या मयि ते तेषु चाऽप्यहम् ।* (गी. ९-२९)
*ज्ञानी त्वात्मैव मे मतम् ।* (गी. ७-१८)

इति भक्तानां भगवदविनाभावं बहुधोदाहरति । अत एव भक्तो भक्तिः भगवानित्येतेषु भेद एव नास्तीति पूर्वमेवास्माभिः प्रतिपादितमस्ति । भगवानेव एवं रूपत्रयेण प्रकाशते ।

## तदेव साध्यतां तदेव साध्यताम् ।।४२।।

८१. अत्र तदेवेत्यवधारणे परामृष्टं किं तदिति निश्चेतुं न सुशकम् । केचन वदन्ति - पूर्वोक्ता ये सङ्गत्यागादयः, तेऽत्र परामृश्यन्त इति । किं तु तथाऽर्थकल्पने गमकं किमपि नाऽत्रोपलभ्यते । अपि च यतस्त्यागशब्दः पुंवचनः तर्हि लिङ्गान्वये विरोधः । अन्ये आहुः - चतुस्त्रिंशत्तमे सूत्रे निर्दिष्टं साधनानीति पदं एकवचनत्वेन विपरिणम्य

अर्थो वर्णनीय इति । तर्हि लिङ्गान्वयविरोधः परिहृतो भवेत् । किंतु दूरान्वयदोषः प्रसज्यते । अथवा महत्सङ्ग एवाऽत्र प्रकरणे उपसंह्रियते, तथाऽनुपदमेव दुःसङ्गत्यागप्रकरणमारभ्यते इत्यतः तच्छब्द-लिङ्गं विपरिणम्य महत्सङ्ग एव परामृष्ट इति व्याख्यानं प्रकृतानुगुणमिति विभावनीयम् । ततश्च साधुसङ्गः यत्नेन सम्पादनीय इत्यर्थः । अत्र साधनप्रकरणमवसितमिति सूचनाय तदेव साध्यतामिति द्विरुक्तिः ।

*महान्तस्ते समचित्ताः प्रशान्ता ।*
*विमन्यवः सुहृदः साधवो ये ॥* (भाग. ५-५-२)

*ये वा मयीशे कृतसौहृदार्था*
*जनेषु देहम्भरवार्तिकेषु ॥*
*गृहेषु जायात्मजरातिमत्सु*
*न प्रीतियुक्ता यावदर्थाश्च लोके ॥* (भाग. ५-५-२, ३)

इति ऋषभदेवोक्तरीत्या ये महापुरुषाः, तेषां इष्टमापततु अथवाऽनिष्टमापततु, ते समचित्तास्तिष्ठन्ति । सान्तःकरणानीन्द्रियाणि स्ववशे स्थापयन्ति । कोपतापरहिताः सर्वेषु सुहृद्भावयुक्ताः ते भगवत्येव सदा मनः समादधते । ते उदरम्भराणां वचांसि न कर्णे कुर्वते । यदृच्छालाभसन्तुष्टास्ते गृहपुत्रकलत्रादिषु धनदायिषु वा नाऽतिप्रीतिमन्तो भवन्ति । तादृशानां महात्मनां सङ्गः साध्यते चेत्, तदैव भक्ति-साधनानि समग्राणि भवन्तीति ।

## दुःसङ्गः सर्वथैव त्याज्यः ॥४३॥

क्षुद्रवस्तूनां दुर्जनानां च सङ्गः सर्वप्रकारेणाऽपि परिवर्जनीय इति ।

८२. महापुरुषसङ्गोऽस्तु मा वा, दुष्टसङ्गस्तु सर्वथा न कर्तव्यः । यतः -

*यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः ।*
*आस्थितो रमते जन्तुस्तमो विशति पूर्ववत् ॥*
*सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा ।*
*शमो दमो भगश्चेति यत्सङ्गाद्याति संक्षयम् ॥*
*तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु ।*
*सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥*

*(भाग. ३-३१-३२ तः ३४)*

ये शिश्नोदरमात्रपरायणाः ते दुर्जनाः । तादृशानां मूढानां सङ्गं यः करोति, तन्मार्गमनुसरति च, सः नियतं नरके एव निपतति । दुर्जनसहवासेन सत्यशौचादयः सद्गुणाः विनश्यन्ति । अशान्ताः मूढाः हतबुद्धयस्ते स्त्रीणां क्रीडामृगा भूत्वा शोचनीयाः भवन्ति । अतो दुर्जनसंसर्गः सर्वथा वर्जनीय इति कपिलदेवः उपदिशति ।

## कामक्रोधमोहस्मृतिभ्रंशबुद्धिनाश-सर्वनाशकारणत्वात् ॥४४॥

८३. विषयत्यागेन सङ्गत्यागेन च भक्तिः प्राप्यत इति हि पूर्वमुक्तम् । तदेवेदानीं विषयसङ्गः एव दुःसङ्गः इति सूचयित्वा तेन दुःसङ्गेन सर्वविधानर्थाः समापतन्तीति व्यतिरेकमुखेन व्याहरति । दुर्जनसङ्गेन ये ये अनर्थाः भवन्तीतीदं सामान्यजनैः आदौ न ज्ञायत एव । व्यवहारस्थाः विषयासक्ताः सर्वदा विषयसम्बद्धानेव वार्ताकथासु प्रस्तुवन्ति । विषयसङ्गिनां जनानामपि तादृशाः प्रस्तावाः कर्णहिताः भवन्ति । किं तु एवं प्रवृत्ता विषयचिन्ता किं किं करोतीति चेत् -

*ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।*
*सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥*

*क्रोधाद्भवति संमोहः सम्मोहात् स्मृतिविभ्रमः ।*
*स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।* (गी. २-६२, ६३)

अर्जुनं बोधयति भगवान् - अर्जुन, विषयचिन्तया तेषु कामः प्रवर्तते । कामेन विषयाननुभवितुमिच्छा सञ्जायते । तस्याः इच्छायाः प्रतिरोधे क्रोधः उद्भवति । क्रोधे प्रवृद्धे कर्तव्याकर्तव्यविवेको विनश्यति । एवमविवेकरूपे सम्मोहे कर्तव्यं परित्यज्य मनुष्यः निषिद्धकर्माणि कर्तुमारभते । इत्थं सम्मोहवशवर्तिनः पुरुषस्य उपदेशप्राप्ता कृत्याकृत्यस्मृतिः विनष्टा भवति । तदा विवेचनशक्तिरेव विलुप्यते । ततः सर्वपुरुषार्थैः परिवञ्चितो भूत्वा सः कुकृत्येषु निमज्जति । एवं सर्वानर्थमूलं दुःसङ्ग एवेति । अविवेकिनः विषय-चिन्ताकाले मनसि सञ्जायमानं ज्ञानं सुखं कामक्रोधादिकं सर्वं विकारजातं च स्वकीयमित्येव अभिमन्यन्ते । सात्त्विकगुणेन विषयज्ञानसङ्गः विषयमिथ्याज्ञानकृतक्षणिकसुखसङ्गः, रजोगुणेन कामसङ्गः कर्मसङ्गश्च, तमोगुणेन निद्रालस्यप्रमादाः, तदुत्थ मोहसुखसङ्गश्च इति एवं गुणत्रयकृतं वैषम्यं आत्मस्थमिति भ्राम्यन्ति । इहलोके वा परलोके वा ज्ञानसुखादयः सत्त्वादिगुणनिमित्ताः अन्तःकरणस्था एव न त्वात्मस्था इति विवेकेन निश्चेतुमक्षमाः ते यत्किञ्चित्प्रतिपद्यमानाः मुहुः संसरन्ति ।

## तरङ्गायिता अपीमे सङ्गात् समुद्रायन्ति ।।४५।।

इमे विकाराः कामादयः तरङ्गवदल्परूपा अपि सङ्गेन समुद्रवत् बहुविस्तृता भवन्ति ।

८४. समुद्रे तरङ्गवत् मनसि कामादयः अल्परूपाः तिष्ठन्ति । इमे क्षणे क्षणे उत्पतन्ति निपतन्ति च । सामान्यजनैः एतेषां यातायातमेव नाऽवगम्यते । एवं वृत्त्युद्गम एव आत्मनः स्वभाव इति सामान्य

जनानां प्रत्ययः । प्रायेणैवं अन्योन्याध्यासं कृत्वा मूढास्तिष्ठन्ति जनाः । ये तु विवेकिनः आत्मानात्मस्वभावं विविच्य परिशीलयन्ति, ते एव कामाद्युद्गमः मनःकृत इति लक्षयन्ति । आत्मस्थं न मन्यन्ते । अतस्तदपसारणाय ते प्रयत्नं कुर्वन्ति । तत्रापि ये कामाद्युद्भवं विशेषेण लक्षयन्ति तेषामेव कामादिपरिहारः सुशकः । नाऽन्येषाम् । दुस्सङ्ग-वशवर्तिभिः पुरुषैः कामादिभिः क्रियमाणा अनर्थाः न ज्ञायन्ते एव । तैः तन्मनो न स्पृश्यत एव । न इयद् एव । ते अजितेन्द्रियाः स्वयमेव कामादीनां वशवर्तिनो भवन्ति । उदाहरणार्थम् - महर्षिः सौभरिः अगाधे जलमध्ये तपस्यन् कदाचन स्त्रीसङ्गसुखं अनुभवन्तं कंचन मत्स्यं दृष्ट्वा तावन्मात्रेण स्वयमपि कामपरवशो भूत्वा पञ्चाशत्स्त्रीः उपयम्य कतिचिद्दिनानि मोहार्णवे पर्यलुठत् । तदन्ते स्मृतिं लब्ध्वा सः सुविरक्त्या एवमुदगिरत् -

*अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ।*
*अन्तर्जले वारिचरप्रसङ्गात् प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥*

*सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः*
*सर्वात्मना न विसृजेद्बहिरिन्द्रियाणि ।*
*एकश्चरन् रहसि चित्तमनन्त ईशे*
*युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसङ्गः ॥*

(भाग. ९-६-५०, ५१)

अहो, पश्यत । कथमहं नष्टोऽस्मि । पुरा तापसोऽभूवम् । सदाचारनिरत एवाऽसम् । जलमध्ये मिथश्चारिणां मीनानां अन्योन्य-सम्बन्धं दृष्ट्वा तावन्मात्रेणाऽहं चिरधृताद् ब्रह्मध्यानात् परिभ्रष्टोऽ-भूवं किल । अतो मुमुक्षुः सर्वथा मिथश्चारिणां प्राणिनां सङ्गमेव परिहरेत् । इन्द्रियाणि न कथञ्चिदपि बहिः प्रसारयेत ।

स्वयमेकान्ते तिष्ठन् भगवत्येव मनो विन्यस्येत । भगवच्चिन्तनपराणां सङ्गो यदि लभ्येत तत्सङ्गमेव कुर्वीत इति ।

सङ्गो विषयचिन्तनकृतः स्याद्यदि तर्हि तत्र कामक्रोधादयः तरङ्गवत् मिथः सम्भूय समुद्र इव महारूपा एव भवेयुः । इति ।

सूत्रस्थ सङ्गशब्देन दुस्सङ्गः, तत्कृतो विषयसङ्गः, तेन सङ्गेन उद्गतानां कामादिवृत्तीनां सम्मेलनरूपः सङ्गश्च इत्येतत्सर्वं गृहीतव्यम् । मिथः सम्मिलिताः तरङ्गा एव समुद्ररूपा भूत्वा दुस्तराः भवन्ति खलु । अतः सर्वथा दुस्सङ्गपरिहाराय मुमुक्षुभिर्यत्न आस्थेय इति प्रकरणसारः ॥

## १२. मायायाः सन्तरणं कथम् ?

**कस्तरति कस्तरति मायाम् ? यः सङ्गांस्त्यजति**
**यो महानुभावं सेवते यो निर्ममो भवति ॥४६॥**

कः खलु मायां तरेत् - इति ।

८५. का नाम माया ? तत्स्वरूपं किमिति चेत् - पूर्वसूत्रोक्तरीत्या कामक्रोधादिकारणं मिथ्याप्रतीयमानदृश्यप्रपञ्चरूपं यत्तदेव माया । या मा सा मायेति शब्दव्युत्पत्तिं कल्पयन्ति केचित् । अनिर्वचनीया माया इत्येके । पुराणेषु बहुधा वर्णिता माया ।

***ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चाऽऽत्मनि ।***
***तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥*** *(भाग. २-१०-३३)*

इति भगवान् मायास्वरूपमाह । यत् प्रतीयमानरूपेण न सद्वस्तु, परमार्थवस्तुविदा यत् आत्मवस्तुनि नोपलभ्यते सैव मायेति तत्त्वविदो वदन्तीति अत्रोक्तम् । ब्रह्माण्डपुराणे तत्स्वरूपमेवं निरूपितम् -

*एषा चतुर्विंशतिभेदभिन्ना मायाऽपरा प्रकृतिस्तत्समुत्था ।*
*कामक्रोधौ लोभमोहौ भयं च विषादशोकौ च विकल्पजालम् ।।*
*धर्माधर्मौ सुखदुःखे च सृष्टिर्विनाशपातौ नरके गतिश्च ।*
*वासः स्वर्गे जातयश्चाश्रमाश्च रागद्वेषौ विविधा व्याधयश्च ।।*
*कौमारतारुण्यजराधियोगभोगा विरागानशनव्रतानि ।।* इति ।।

माया नाम न परमार्थसद्वस्तु, सा अस्तीति वदन्तः केवलं भ्रान्ता इति शास्त्रकारा वदन्तीति केचन मुह्यन्ति । नैवं तथा । व्यवहारदृष्ट्या माया तथ्यरूपैव । यत्कारणम् - "एषा चतुर्विंशतिप्रकारान् रूपविशेषन् धृत्वा जनानां पुरतो नर्तनं करोति" इति सांख्यशास्त्रज्ञाः निरणैषुः । एषः अभिप्रायः गीतासु श्लोकेनाऽनेन सङ्गृहीतः -

*महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।*
*इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ।।* (गी. १३-५)

सूक्ष्मभूतानि ५. अहङ्कारो नाम महाभूतकारणम् १. बुद्धिर्नाम अहङ्कारकारणम् १. अव्यक्तं नाम बुद्धिकारणम् १. उभयविधेन्द्रियाणि १०. मनः १. इन्द्रियाणां विषयभूतानि गुणसहितानि इतीमे इन्द्रियार्थाः ५. इत्येवमिदं सर्वमपि मायारूपमेव । अथापि सर्वमूलमव्यक्तमेव मायेति प्राधान्येन व्यपदिशन्ति रूढ्या । इमां परमेश्वरस्य अपरां च प्रकृतिं वदन्ति । कामक्रोधादयः सर्वे विकाराः मायाख्यसमुद्रस्य तरङ्गरूपाः भवन्ति ।

८६. इदमशेषं विश्वं केवलं मायेति यद्यपि कथयन्ति । परं त्वत्र विविधैः रूपैः अनुभूयमानं; क्षणे क्षणे प्रियाप्रियाण्यापादयन्तमिमं जगत्संसारं कथं वयं मायेति प्रतीमः ? अथ च एतां मायां सन्तरीतुं को वा अभ्युपायः स्यादिति चिन्तया खिद्यतां अधिकारिपुरुषाणां एतत्सूत्रमारभ्य चतुर्षु सूत्रेषु धैर्योत्तम्भकं उत्तरमभिहितम् । नेदं

जगत् वस्तुतोऽसारम् । न वा केवलप्रतिभासमात्रम् । सत्ये आत्मनि विनिर्मितं मायाचित्रमेतदिति अभियुक्ता वदन्ति । अस्मिन् विषये पूज्यश्रीशङ्करभगवत्पादाः अभिदधति -

***सर्वज्ञस्येश्वरस्याऽऽत्मभूते इवाऽविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया शक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते।*** इति। *(सू. भा. २-१-१४)*

सर्वज्ञस्येश्वरस्य स्वरूपे इव अविद्यया कल्पिते, ईश्वराभ्दिन्ने इति वा तदभिन्ने इति वा निश्चेतुमशक्ये नामरूपे एव सर्वज्ञस्येश्वरस्य माया शक्तिः प्रकृतिरिति च श्रुतिषु स्मृतिषु च अभिज्ञाप्यते । एतयोः नामरूपयोः परमार्थरूपं तु सर्वज्ञः सर्वशक्तः परमात्मैव । परमार्थज्ञानां तस्मिन्नात्मनि न नामरूपयोरूपलब्धिः भवति । अन्यैः तु उपलभ्येते एव । यथा स्वप्नदशायां इदं सत्यमिदमसत्यमित्यनुभवो भवति, स्वप्नादुत्थानपर्यन्तं दृश्यसत्यासत्यविभागः सत्यो दृश्यते, तथैव जाग्रद्दशायामपि दृश्यव्यवहारः ज्ञानाऽज्ञाने धर्माऽधर्मौ संसारस्थितिगतिः जन्ममरणादिविकाराः सुखदुःखानीत्येतत् सर्वमपि जनैः सत्यमनुभूयते । उत्थानानन्तरं स्वप्नो मृषा यथा तथैव परमार्थप्रबोधानन्तरं जगदपि मिथ्या । स्वप्नो निद्रोद्भवो यथा, तथा स्वाज्ञानोत्थ मायोद्भवः जगत्संसारः । एवमपि ईश्वरादनन्या माया अनिर्वचनीया दुस्तरा च । अत्र भक्तिशास्त्रोक्तैरुपायैः ये भगवन्तमेव शरणमाश्रयन्ति ते भक्ताः मायामेतां तरन्ति । तेषामेव मायाकृतः संसारः आत्यन्तिकतया अभावमाप्नोति । तथा हि गीतासु -

***दैवी ह्येषा गुणमयी मम माया दुरत्यया ।***
***मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।।*** *(गी. ७-१४)*

इति भगवदुक्तरीत्या सत्त्वरजस्तमोमयीयं माया भगवतः अधीनाऽस्ति । अतोऽस्मिन् मायामये संसारसमुद्रे निमज्जतामुन्मज्जतां संसारिणां स्वप्रयत्नेन अस्मादुत्तरणं बहुदुःशकम् । परं तु ये स्वप्रयत्नं

सन्त्यज्य भगवन्तमेव शरणमाश्रयन्ते ते सुकरतयैव अगाधामपि मायां तरन्ति । अनेन भगवच्छरणागतिः कीदृङ्महिमा इति ज्ञाप्यते ।

## यः सङ्गांस्त्यजति यो महानुभावं सेवते इति

८७. पूर्वोक्तप्रकारेण भक्तिप्राप्तौ दुःसङ्गत्यागः तथा साधुसङ्गोपार्जनम् इत्ययं प्रधानो विधिः । प्रप्रथम उपायः । उक्तं च -

***महत्सेवां द्वारमाहुर्विमुक्तेः । तमोद्वारं योषितां सङ्गिसङ्गम् ॥***

(भाग. ५-५-२)

महापुरुषसङ्गः अविद्याकृतस्य मायासंसारसमुद्रस्य उत्तरणे मुख्यं साधनम् । तद्विपर्ययेण स्त्रीसङ्गिनां तथा विषयासक्तानां सङ्ग एव अविद्यामायासंसारे निपतनाय कारणं भवति । अतो महत्सङ्गमहिमा महान् ।

सुकेशभारद्वाजादयः षट् मुमुक्षवो विद्यार्थिनः ब्रह्मोपदेशं प्राप्तुं पूज्यं पिप्पलादं विधिवदुपसृत्य तस्य तत्त्वोपदेशेन कृतकृत्याः भूत्वा -

**"ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि"** इति कृतज्ञतां प्रदर्शयामासुः । एवं महत्सङ्गेन तेषां महागुणाः प्रकटीभवन्ति । आदर्शे मुखमवलोकयतः स्वमुखमालिन्यदर्शनमिव अस्माकं दोषाश्च स्फुटाः भवन्ति ।

## यो निर्ममो भवति

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया" इत्युक्तरीत्या महद्भ्यो दण्डवत्प्रणामं कृत्वा तेषां सेवाशुश्रूषया च ये शिष्याः स्वतनुमनोधनार्पणं कुर्वन्ति ते अनेन विधिना पूताः निर्ममाश्च भवन्ति । "ममेति बध्यते जन्तुर्न ममेति विमुच्यते" । सर्वत्र ममेति भावनैव बन्धकारणमस्ति । न मम किञ्चिदिति ममतात्याग एव मायाबन्धनात् विमुक्तेः कारणं उपायश्चेति ।

## यो विविक्तस्थानं सेवते यो लोकबन्धमुन्मूलयति निस्त्रैगुण्यो भवति यो योगक्षेमं त्यजति ।।४७।।

यः एकान्तस्थानमाश्रयते, यश्च लोकजने निरूढं स्नेहबन्धनं समूलं उद्धरति निस्त्रैगुण्यो भवति, यो वा स्वयोगक्षेमचिन्तां परित्यजति स खलु मायां तरति ।

८८. महात्मनां सविधे उपदेशं प्राप्य एकान्तस्थलमाश्रित्य तदुक्तप्रकारेण साधनं कर्तुं प्रयतेत । भागवतेऽप्ययं विधिः -

*तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।*
*शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ।।*
*तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः ।*
*अमाययाऽनुवृत्त्या यैस्तुष्येदात्माऽऽत्मदो हरिः ।।* (भाग. ११-३-२१, २२)

इति प्रबुद्धमुन्युक्तरीत्या श्रोत्रियं ब्रह्मनिष्ठं गुरुं उपगम्य तस्मिन् सेवाशुश्रूषापुरस्सरं भागवतान् धर्मान् शिक्षेत । ततो लौकिकजनयातायातशब्दबहुलान् प्रदेशान् वर्जयित्वा अरण्यगिरि गुहादि एकान्तस्थलं संश्रित्य तत्र गुरूपदेशप्रकारेण भगवन्नामस्मरणे, मन्त्रजपे, भगवद्रूपध्याने वा तत्परो भवेत् ।

## लोकबन्धमुन्मूलयति

८९. अस्मात् साधनानुष्ठानात् पूर्वमेव लोकबन्धं समूलमुन्मूल्य प्रत्यस्येत् । मनुष्यलोकः पितृलोकः देवलोकः इत्येतस्मिन् लोकत्रये यस्य इच्छा न निवर्तिता सः मायापरिधावेव परिवर्तते । पुत्रप्राप्त्या मनुष्यलोकं, शास्त्रोक्तकर्मानुष्ठानेन पितृलोकं, विद्यया उपासनादिना च देवलोकं जयेदिति **"सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा । कर्मणा पितृलोको विद्यया देवलोकः"** (बृ. आ. १-५-१६) इति

श्रुतिः । परं तु सकललोकातिगं परमात्मानमेव दिदृक्षोः "**किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः**" (बृ. आ. ४-४-२२) इति श्रुतिवचनरीत्या साधकस्य न प्रजासन्तत्यपेक्षा नापि कर्मोपासनापेक्षा स्यात् । स खलु उत्तरसूत्रोक्तरीत्या सर्वान् लोकबन्धान् उच्छिनत्त्येव । "**ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्**" इति मनुस्मृत्युक्तानि अपाकरणीयानि ऋणानि तस्य न सन्त्येव । किं च लोककामनातिगानां "**एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाऽथ भिक्षाचर्यं चरन्ति**" (बृ.आ. ३-५-१) इति श्रुतिप्रामाण्येन ऋणं किञ्चिदपि नास्त्येव । एवं यो लोककांक्षां त्यजति सः मायां तरति ।

## निस्त्रैगुण्यो भवति

९०. यो निस्त्रैगुण्योभवति सः मायां तरति । निस्त्रैगुण्यं नाम गुणातीतत्वम् । ततश्च गुणातीतत्वं मायातरणस्य बन्धच्छेदस्य उपायो भवति । सत्त्वं रजः तमश्च इत्येतैः त्रिभिर्गुणैः जगत्सर्वं समुद्भूतमिति सांख्यपण्डिताः वदन्ति । तेषामेष वादो गीतासु अनूदितः -

***न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।***
***सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥*** *(गी. १८-४०)*

एभिस्त्रिभिर्गुणैः विरहितं किञ्चिदपि इह लोके परलोकेषु वा नास्ति । एषां गुणानां मध्ये यदा तमोगुणः उद्रिच्यते तदा मनुष्यस्य मनो मूढं भवति । मनसि किमपि न स्फुरति । मनुष्यः किमपि कर्म कर्तुं न पारयति । केवलं मोह आवृणोति । तामसाहारं भक्षयित्वा एकत्रैव तूष्णीं आसित्वा निद्रातन्द्रादिभिः कालक्षेपं कुर्वत्सु अलसधौरेयेषु अस्य गुणस्य प्रभावो दृश्यते । यदा रजोगुणः उद्रिच्यते तदा मनुष्यस्य आशा वर्धते । मनुष्योऽपि यस्मिन्कस्मिन् वा कर्मणि प्रवृत्तो भवति ।

रागद्वेषादिषु तत्परता, परस्वापहरणेच्छा, यत्किञ्चित्प्राप्तौ लाभो भवत्विति उत्सुकता इत्येताः मनोवृत्तिगतयः रजोगुणाद् भवन्ति । यदा सत्त्वगुणः उद्रिच्यते तदा मनुष्यः यत्किमपि ज्ञानं वा सुखं वाञ्छिष्यति । एवमेषां गुणानां स्वभावकार्यादिकं गीतासु १४, १७, १८ मितेषु अध्यायेषु विवृतं अस्ति । एते गुणाः परस्परस्पर्धिनः । एकस्मिन् उद्रिक्ते अन्यौ स्थगितौ भवतः । परं तु एते त्रयोऽपि प्राणिषु मिलित्वैव तिष्ठन्ति । एतैर्गुणैर्वियुक्तं निसर्गे न किञ्चिदप्यस्ति । एकैको गुणोऽपि न क्वाऽपि तिष्ठति ।

तानेतान् गुणान् अत्येतुं यः प्रयतते सः प्रथमं रजोगुणावलम्बनेन तमोगुणं जयेत् । अर्थात् यस्मिन् कस्मिन्नपि कर्मणि व्यापृतश्चेत् तदा तमोगुणः स्थगितो भवति । एवं रजोगुणमपि जेतुं सत्त्वगुणमवलम्ब्य अर्थात् ज्ञानसुखशान्तीनां परीप्सया व्यापृतश्चेत् तदा रजोगुणः स्थगितः भवति । एवं गुणद्वयतिरस्कारे साधितेऽपि स सत्त्वगुणोऽपि रजस्तमोमिश्रः एव भवतीत्यतः तदा शुद्धसत्त्वमवष्टभ्य सत्त्वगुणं जेतुं यत्नं कुर्यात् । एवं गुणत्रयजयपुरस्सरं भगवद्भक्तिं सम्पाद्य

*मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।*
*स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥* *(गी. १४-२६)*

इत्युक्तप्रकारेण भगवत्स्वरूपे तन्मयो भूत्वा अत्यन्तं गुणातीतो भवति । एषा स्थितिः निस्त्रैगुण्यता । एषा दशा यस्यास्ति सः निस्त्रैगुण्य इति । सः मायां तरति ।

## योगक्षेमं त्यजति

९१. निस्त्रैगुण्यतासिद्धौ योगक्षेमत्यागो मुख्यं साधनं भवति । अप्राप्तस्य प्राप्तिः योगः । प्राप्तस्य परिपालनं क्षेमः । **इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथमिति** व्याकुलचित्तः असुर एव । तादृशस्य श्रेयोमार्गे

परिक्रमणं असाध्यमेव । यस्तु प्राप्तेनैव सन्तुष्टः सन् मम योगक्षेमं भगवान् सर्वथा करिष्यतीति विश्वस्य मनः सदा भगवत्येव सारयति सः निर्योगक्षेम उच्यते । प्रायेण मनुष्यः यथा यथा भक्तिमार्गे पुरस्सरति तथातथा तस्य स्वयोगक्षेमचिन्ता क्रमेण ह्रस्वीयसी परिवर्तते । एवं चाऽन्ते मम सर्वथा भगवानेव गतिरिति विश्वस्य तद्ध्याने एव तत्परो भवेत् ।

*अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।*
*तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥* *(गी. ९-२२)*

इति भगवानेव प्रतिजज्ञे । परभक्तस्य भगवतश्च भेदाभावेन तद्योगक्षेमः विनाऽऽयासेन प्रचलति । अत्र केचिदलसाः अपि देव एव कथञ्चिदस्मानपि रक्षतीति भणन्तो दृश्यन्ते । न तादृशानभिलक्ष्य कथितमेतत् । अथवा तादृशालसधुरीणानपि भगवानेव परिरक्षतीत्येतदपि तथ्यमेव । परं तु तत्तद्योग्यतानुसारेण अलसानां योगक्षेमौ परिक्लेशेनैव प्रचलतः । तत्र च क्षुधा तृषा रोगः दारिद्र्यं तिरस्कारः इत्येतैः रूपैः मध्ये मध्ये तेषां बिभीषिकामपि दर्शयित्वा तत्र तत्तत्प्रयत्नानुगुणमेव तद्योगक्षेमौ यथा प्रचलेतां तथा भगवानेव संघटयति । तत्कथा यथा तथा वा तिष्ठतु । परभक्तजीवनं तु तथा लक्ष्यहीनं न भवति । तत्राऽपि भक्तस्य जीविते मरणे वा न चिन्ता । सः नित्यनिरन्तरं भगवच्चिन्तने निरतः कालं नयति । तन्निर्भरता एव तद्योगक्षेमप्रबन्धं निर्वाहयति । एवं महापुरुषः मायां तरति ।

## यः कर्मफलं त्यजति, कर्माणि संन्यस्यति, ततो निर्द्वन्द्वो भवति ॥४८॥

यस्तु कर्म कर्मफलानि भगवते समर्पयति अथवा कर्मसंन्यासं करोति सः यतो निर्द्वन्द्वो भवति अतः सः मायां तरति ।

## कर्मफलं त्यजति

९२. योगक्षेमत्याग इति तु न सम्भाव्यत एवेति केचन मन्यन्ते । अनेन कर्मणा ममेदं फलं स्यादिति कांक्षाभावे तत्कर्म कथं परिपूर्णं भवेदिति तेषां आशङ्का स्यात् । तत्समाधानं यथा - यद्यपि फलापेक्षया कर्मकारिणः प्रथमं फलमुद्दिश्य कर्मसु प्रवर्तन्ते इति तु सत्यम् । किं तु कर्मानुष्ठानसमये तेषां फलचिन्तैव स्याच्चेत् तेषां कर्माणि न कदाचिदपि सम्यञ्चि भवन्ति । कदा वा कर्मफलं भवेत् ? अस्य कर्मणः फलं कीदृशं स्यादित्यादि चिन्ता स्यात् चेत् सा तानि कर्माण्येव विघटयति । येषामेषा चिन्ता न भवति तत्कृतानि कर्माण्येव सुष्ठु समग्राणि भवन्ति । तत्फलं च उत्तमं भवति । चित्रलेखनं काव्यरचना इत्यादिकर्मप्रवृत्ताः जनाः तत्काले फलचिन्तारहिताः सन्तः तत्कर्मण्येव निर्भराः भवन्ति । कर्मसमाप्तिमुद्दिश्य वा अस्मै फलायेति वा कर्म करिष्यामीत्यादिचिन्तां विहाय कर्म कर्तव्यं इत्येवाऽध्यवसायेन कर्मानुष्ठाने तत्कर्मैव साधु भवति । उत्तमं फलं च प्राप्यत इतीदमप्यनुभवसिद्धम् । एवं फलानभिसंधिरेव कर्मफलत्यागः । अथवा कर्मफलमीश्वराय समर्प्यते चेत्तदपि कर्मफलत्यागो भवति । इत्थं च कर्मफलत्यागः द्विधा सम्भवति - फलाभिसन्धिं विना कर्मानुष्ठानं, कृतस्य कर्मणः फलस्य ईश्वरे समर्पणं चेति ।

## कर्माणि संन्यस्यति

९३. एवं कर्मण्येव निमग्नस्य कर्म श्रेष्ठं भवतीदमास्तां तावत् । किं तु अस्मिन् बाह्यप्रपञ्चे प्रवर्तमानानि सर्वाणि कर्माणि किं मनुष्यमात्रेण निर्व्यूढानि भवन्ति ? अथ वा मनुष्यादि प्राणिषु अन्तः प्रचलन्त्यो हृदयक्रियाश्च केन कथं निर्वर्त्यन्ते ? इत्येतत् सम्यक् विमृशाम चेत् तेषु अन्यतमोऽपि व्यापारः मनुष्ययत्नेन न प्रचलत्येवेति स्पष्टं ज्ञायते । किं च, वायुरितस्ततो वाति । वन्हिः दहति, ऊर्ध्वमेव

ज्वलति । दिने दिने सूर्यः उदेति, क्लृप्तसमये एवाऽस्तमेति । तत्तदृतुमानं अनुसृत्य वृष्टिः वर्षति । इत्येताः क्रियाव्यवस्थाः कस्याऽधिकारस्य अधीनाः सन्ति ? मनुष्यस्य जन्ममरणादीनि सम्भवन्ति । अस्य इन्द्रियाणि मनोबुद्धी च नियतक्रमेण स्वस्व-विषयकर्माण्येव कुर्वन्ति । एताः सर्वाः व्यापारघटनाः मनुष्ययत्नं विना निरन्तरं प्रचलन्तीतीदं स्पष्टमेव ।

मनुष्योऽद्यतनेषु दिवसेषु कांश्चन प्रकृतिनियमान् अध्ययनेन परिज्ञाय नूतनतया कानिचिद्वस्तूनि निर्माय तानि च स्वोद्देशसिद्धये स्वानुकूलत्वेन परिवर्तयमानो दृश्यते । न केवलमिदं बाह्यवस्तु विषयं आधिभौतिकमेव, अपि तु आध्यात्मिकत्वेन निरूप्यमाणानि प्राणिप्राणशरीरान्तरङ्गाणि, तेषां व्यापारान्, इन्द्रियमनोबुद्धिगतीश्च परीक्ष्य परीक्ष्य अनेकान् विषयान् सङ्गृहीतवन्तः सन्ति । एतेन कांश्चन वस्तुव्यापारान् तन्नियमांश्च स्ववशीकुर्वाणाः, तथा भौतविज्ञान प्रयोगोपयोगीनि यन्त्राणि तदुपकरणानि अपि आविष्कृतवन्तः सन्तीति तु सत्यम् । परं तु विश्वस्मिन् प्रपञ्चे प्रकृतिनियमानां तथाविध-व्यवस्थितरूपत्वे को हेतुः ? तथा प्रपञ्चस्य सर्वभागेष्वपि परिदृश्यमानाः ये नियतव्यापाराः कस्याऽधीनाः ? मनुष्याद्यनधीनाः ताः क्रियाघटनाः कुतः कथं च स्वतन्त्रनियमानुसारेण प्रवर्तन्त इत्यत्र कारणं किमितीदं न कोऽपि अद्यापि निरणैषीत् । अतोऽग्रेऽपि न तत्सम्भाव्यते । ततश्च एतेन सिद्धं यत् -

*भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चमः इति ।।* (तै.उ. २-८)

इति यथोक्तमुपनिषदि तथैव आधिदैविकत्वेन निरूप्यमाणाः अभिमानिन्यो देवताः लोकान् नियमयन्तीति मन्तव्यम् । वायुसूर्याग्नि-पर्जन्यमृत्युरूपाः भौतिकपदार्थाः परिमितशक्तीनां मनुष्याणां शक्ति-

गोचरीभूता अपि तेषामभिमानिन्यो या देवताः सन्ति ताः सर्वदा अस्मदगोचराः सत्यः साक्षाद् भगवतः नियमनविषयभूता एव स्थित्वा प्रपञ्चव्यापारान्निर्वर्तयन्तीतीदं तथ्यम् ।

इत्थमेव मनुष्यादीनां प्राणिनां देहान्तः प्राणेन्द्रियमनोबुद्धीनां व्यापारेष्वपि मनुष्यस्य स्वातंत्र्यमस्ति वेति विचार्यमाणे नास्तीत्येव निश्चयो भवति । यतः -

***श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः ।***
***चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति ॥*** *(के. १-२)*

अन्तश्चेतनः प्रत्यगात्मैव श्रोत्रस्य श्रोत्रं मनसो मनः, वाचो वाक् प्राणस्य प्राणः, चक्षुषश्चक्षुर्विद्यते । ये तु इमान् जगत्संसारविषयान् वैराग्येण परित्यज्य व्युत्थास्यन्ति परमार्थं च विजानन्ति, ते एव संसारात् अतिमुच्य अमृता भवन्तीति श्रुतिज्ञापनेन आध्यात्मिकानां देहादीनां सर्वे व्यापाराः अन्तरात्मनो भगवतः सान्निध्यादेव प्रचलन्तीति सिद्धम् । ध्रुवो बालः भगवत्स्तुतये प्रयतमानोऽपि यदा अशक्तः आस्त तदा तत्कपोले भगवच्छंखस्पर्शमहिम्ना स्तोत्रं कर्तुं प्रावर्तत -

***योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां***
***सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना ।***
***अन्यांश्च हस्तचरणश्रवणत्वगादीन्***
***प्राणान् नमो भगवते पुरुषाय तुभ्यम् ॥*** *(भाग. ४-९-६)*

एवं पुराणेषु भगवत्सकाशादेव आध्यात्मिकव्यापाराः प्रवर्तन्त इति प्रतिपादितम् । इदं रहस्यं विजानन्त एव परभक्ताः महनीया इत्युच्यन्ते । ते एव सर्वकालेऽपि मायां उत्तीर्णा भवन्ति । गौणभक्तिं कुर्वणाः साधका अपि स्वकृतकर्मादि सर्वमिदं च भगवदीयमेवेति तस्मै निवेदयेयुः । क्वचिदपि किञ्चिदपि आत्मीयभावनामकृत्वा, स्वत्वं किमपि नास्तीति सर्वं तस्मै समर्पयेयुः । गीतासु भगवान् -

*ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।*
*अनन्येनैव योगेन मां ध्यायन्त उपासते ।*
*तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।* (गी. १२-६, ७)

कर्मसंन्यासस्य यत एवं फलमाह अतः कर्मसंन्यासे एव भगवतः तात्पर्यमिति निश्चीयते । अथ च त्यागतत्त्वमपि विवेकेन दर्शयन् भगवानाह -

*कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।*
*सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥*
*न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।*
*त्यागी सत्त्वसमाविष्टो मेधावी च्छिन्नसंशयः ॥ इति* (गी. १८-९, १०)

एतदुक्तिरीत्या काम्यकर्माण्यद्विषतः नित्यकर्मसु अनासक्तस्य सतः सङ्गत्यागफलत्यागपुरस्सरं "कर्तव्यानि कर्माणीति" बुद्ध्या विहितकर्मानुष्ठानमेव गौणसंन्यास इति प्रदर्शितम् । कर्मफलं त्यजतीति पृथगुपदेशेन तत् सूचयित्वा पुनश्च कर्माणि संन्यस्यतीति सूत्रे मुख्यसंन्यासोऽप्यभिहितः ।

## निर्द्वन्द्वो भवतीति

९४. माया भवति सदा द्वन्द्वमयी । इह संसारे एषा द्वन्द्वबाधा कतममपि प्राणिनं न विमुञ्चति ।

*इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।*
*सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥*
*येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।*
*ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥* (गी. ७-२७, २८)

इति भगवदुक्तिर्यथा तथा सर्वे प्राणिनः जन्मत एव द्वन्द्वमोहे

निमज्जिताः सन्ति । एवं जीवानां इच्छाद्वेषादयः स्वभावागता अपि अत्र ये मेधाविनः पुण्यकर्माणि कृत्वा पापकानि क्षपयन्ति ते भाग्यशालिनः भगवद्भक्तिं कर्तुं समीहन्ते । ततश्च क्रमेण ते मायां सन्तरन्ति । अत एव अर्जुनं प्रति कर्मयोगं ग्राहयन् भगवान् "निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेमो भूत्वा कर्म समाचरेति" उपदिदेश । परं त्वत्रसर्वत्र आत्यन्तिकत्वेन निर्द्वन्द्वतासिद्धिः परभक्त्यैव साध्यत इतीदं न विस्मरणीयम् ।

*यदा स्तुतिं च निन्दां च समत्वेनैव पश्यति ।*
*काञ्चनं चाऽऽयसं चैव सुखं दुःखं तथैव च ।।*
*शीतमुष्णं तथैवाऽर्थमनर्थं प्रियमप्रियम् ।*
*जीवितं मरणं चैव ब्रह्म सम्पद्यते तदा ।।*

इत्यत्रोक्तवत् येषां भेदमोहो नास्ति तेषां श्लोकोक्तानि द्वन्द्वानि समतामुपयान्ति । ये च कर्मफलं त्यक्त्वा कर्माणि च संन्यस्य निर्द्वंद्वसिद्धाः भवन्ति तेषां सुकृतिनां मायाबाधासंस्पर्शो नास्तीति प्रसिद्धमेव ।

## वेदानपि संन्यस्यति, केवलमविच्छिन्नानुरागं लभते ।।४९।।

सः मायां तरतीति सम्बध्यते ।

### वेदानपि संन्यस्यतीति

९५. यद्यपि नित्यनैमित्तिकानि कर्माणि वेदविहितानि सन्ति । अथापि अधिकारी पुरुषः कर्माणि संन्यसितुमर्हतीति श्रुतावेव प्रोक्तमस्तीत्यतः कर्मसंन्यासः अङ्गीकारार्हो भवतु नाम । परं तु वेदान् परित्यक्तुं कथं शक्यते ? यावता - "वेदसंन्यसनाच्छूद्रस्तस्माद्वेदं न संन्यसेत्" (व.स्मृ. १०-५) इति वसिष्ठवचनं वेदत्यागिनः शूद्रत्वमेव भवतीति उद्घोषयति ।

अतो वेदो न त्यक्तव्यः इति केचिद् वदन्ति । किं तु न साध्वेतत् । यस्मात् कारणात् - सर्वकर्मसंन्यासिनो ज्ञानिभक्तस्य कर्मविधिपरैः वेदैः किं प्रयोजनम् ? यथा कर्मत्यागेन परभक्तस्य दोषो न भवति तथैव वेदत्यागेनाऽपि न दोषस्याऽवकाशः । गीतासु

*अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।*
*भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ।। (गी. १८-१२)*

नरकपतनाद्यनिष्टफलानि देवत्वप्राप्तिरूपेष्टफलानि मनुष्यत्व-प्राप्तिरूपं मिश्रफलमिति च अतत्त्वविदां असंन्यासिनां एव भवति, न तु कदाचित् परमात्मानमेव विश्वस्य भजतां भक्तानां सम्भवतीत्युक्तत्वात् । अत एव भागवते -

*तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ।*
*मत्कथाश्रवणादौ वा श्रध्दा यावन्न जायते ।। (भाग. ११-२०-९)*

यावत्पर्यन्तं फलोपभोगे वैराग्यं नोदियाय यावच्च भगवत्कथा-श्रवणादिषु श्रद्धा नोत्पद्येत तावत्पर्यन्तं विहितानि कर्माणि समाचरेदित्युक्तम् ।

***ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ।***
***सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ।। (भाग. ११-१८-२८)***

ज्ञाननिष्ठो वा विरक्तो वा अथवा निस्पृहो मद्भक्तः इत्येते वर्णाश्रमलिङ्गानि सन्त्यज्य विध्यगोचराः सन्तः व्यवहरेयुरिति भगव-द्वचनरीत्या विरक्तस्य भक्तस्य न कदाचिदपि कर्मविध्यपेक्षा । किं च -

***सत्यानृते सुखदुःखे वेदानिमं लोकममुं च***
***परित्यज्याऽऽत्मानमन्विच्छेत् ।। (आप.ध.सू. २-२१-१३)***

इत्यापस्तम्बस्मृतिविधिना सत्यानृतानि सुखदुःखानि वेदान्

इहलोकपरलोकविषयान् च सन्त्यज्य अथ व्युत्थाय आत्मानमेवाऽन्विच्छन् भक्तो भवति । इत्युक्तम् ।

## अविच्छिन्नानुरागं लभते इति

९६. वेदानपि सन्त्यज्य अविच्छिन्नं भगवदनुरागं सम्पादयेदिति वचनेन ज्ञातव्यं किमिति चेत् - सकलशास्त्राभ्यासस्याऽपि भगवद्भक्तिरेव साध्यं फलं भवतीति । अतश्च

*शास्त्राण्यधीत्य मेधावी गुरोरभ्यस्य तान्यपि ।*
*पलालमिव धान्यार्थी त्यजेद्ग्रन्थानशेषतः ॥*

(सू.सं.मुक्ति खण्डे ७-७०)

इति स्मृत्युक्तरीत्या गुरोः सकाशात् शास्त्रग्रन्थानधीत्य तेषां अभ्यासेन मननेन च परमार्थनिश्चयं कृत्वा अथ च तत्सारभूतां भक्तिमेव सम्पाद्य तान्ग्रन्थान् सन्त्यजेत् । एवं योऽनुतिष्ठति स एव मायां तरतीति सूत्राशयः ।

पुनर्विचारे क्रियमाणे मायासन्तरणं न कस्याऽपि साध्यम् । यत्कारणम् मायेतीदं परमात्मस्वरूपमेवेति अविदित्वा भगवदाश्रयमगत्वा संसारव्यवहारतत्परता एव । नैतयोरर्थान्तरता । तद् द्वयमप्येकमेव । ऐतरेयोपनिषद्भाष्ये श्रीगुरुशङ्करभगवत्पादाचार्याः संसारसागरं वर्णयन्ति -

*ता एता अग्न्यादयो देवताः लोकपालत्वेन सङ्कल्प्य सृष्टाः ईश्वरेण अस्मिन् संसारार्णवे महति अविद्याकामकर्मप्रभवदुःखोदके, तीव्ररोगजरामृत्युमहाग्राहे, अनादौ अनन्ते अपारे निरालम्बे, विषयेन्द्रियजनितसुखलवलक्षणविश्रामे, पञ्चेन्द्रियार्थतृष्णामारुतविक्षोभोत्थितानर्थशतमहोर्मौ, महारौरवाद्यनेकनिरयगतहाहेत्यादिकूजिताक्रोशनोद्भूतमहारवे, सत्यार्जवदानदयाहिंसाशमदमधृत्याद्यात्मगुणपाथेयपूर्णज्ञानोडुपे, सत्सङ्गसर्वत्यागमार्गे, मोक्षतीरे एतस्मिन् महत्यर्णवे प्रापतन् ॥ इति ॥*

इमे लोकपालाः भवन्त्विति सङ्कल्प्य परमेश्वरेण सृष्टाः अग्न्याद्याः देवताः अस्मिन् संसारनाम्नि समुद्रे प्रापतन् । सः संसारः कीदृशः इति चेत् - अविद्याकामकर्मोद्भवं तापत्रयमेव तत्र जलम् । उल्बणाः रोगाः तथा जरामृत्यव एव महामहामकरसरीसृपादयः तत्र परिसर्पन्ति । अस्य संसारसमुद्रस्य नादिरस्ति नान्तो वा । सः निस्तटो निरालम्बोऽस्ति । अत्र विषयेन्द्रियसंयोगोद्भवं अल्पसुखं नाम क्षणिकं विश्रान्तिस्थानं भवति । तत्र पञ्चेन्द्रियतृष्णाख्यया वात्यया उद्धूताः अनर्थाख्याः तरङ्गाः परिक्षुभ्यन्ति । महारौरवादिनरकाः तत्र च नारकिणां हाहेत्यादिरोदनशब्दाक्रोशनगालीप्रदानादयः तदुद्भवः महारावो भविष्यति । सत्यं ऋजुता दानं दया शमो दमो धैर्यमित्याद्यात्मगुणरूपैः पाथेयैः परिपूर्णा ज्ञानाख्या नौका तत्सागरोपरि संप्लवते । सा ज्ञाननौका सत्सङ्गसङ्गत्यागाख्ये मार्गे सञ्चरति । अस्याऽपारसमुद्रस्य मोक्षो नाम परं तीरं भवति (ऐ. भा. १-२-१) । एवं महाभयावहोऽपि एषः मायासमुद्रः -

***दैवी ह्येषा गुणमयी मम माया दुरत्यया ।***
***मामेवं ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥*** *(गी. ७-१४)*

इति भगवदुक्ति प्रकरेण त्रिगुणात्मिकामेतां मायां सन्तरितुं दुष्करमपि ये भगवन्तमेव शरणमुपगच्छन्ति ते मायां तरन्ति । अथवा तरन्तीति किमुच्यते ? सर्वत्र प्रसृते तीव्रनिदाघातपे आतपत्रं गृहीत्वा निर्बाधं सञ्चरन्तो जनाः इव ते मायां न परिगणयन्ति । साऽस्तीत्यप्य-चिन्तयन्त एव निर्भयं व्यवहरन्ति । मायैव तेषामन्तर्हिता भवति ।

## स तरति स तरति, स लोकांस्तारयति ॥५०॥

९७. सः मायां तरति । सः जनानपि संसारात् तारयति । या मा सा माया इति निर्वचनात् तथ्यतोऽविद्यमानस्यैव मायेति नाम ।

सा अभक्तानामज्ञानिनां दुस्तरा । अथापि -

*त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि समाधिनावेशितचेतसैके ।*
*त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिम् ।।*

*(भाग. १०-२-३०)*

इति गर्भस्तुतौ ब्रह्मादयो देवाः भगवन्तं श्रीकृष्णं संस्तुवन्तो यथाऽकथयन् तथा भगवत्येव समाहितचित्तानां भक्तानां भगवतः पाद एव भवसागरतारणे नौका भवति । अपारोऽपि भवसागरः भक्तानां गोवत्सपदसमोऽल्पको भवति ।

***स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसौहृदाः ।***
***भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ।।***

*(भाग. १०-२-३१)*

भक्ताः भगवत्पादसमाश्रयणेन भवसागरं दुस्तरमपि स्वयं उत्तीर्य अद्यतनानां अन्येषां जनानामपि उत्तरितुं सौकर्यं भवत्विति भगवत्पाद-कमलं नाम भक्त्याख्यनावं निधाय ते महनीयाः पारमगच्छन् । तन्नौका-रूपं भगवत्पादकमलं आश्रित्य अन्येऽपि अधुनातनाः जनाः एतं मायासंसारसमुद्रं उत्तरितुं पारयन्ति । इति ।

# १३. प्रेम्णो महिमा

## अनिर्वचनीयं प्रेमस्वरूपम् ।।५१।।

प्रेम्णः स्वरूपमीदृशमिति न निर्वक्तुं शक्यते । यतो अनुभवरूपं हि तत् ।

९८. अविच्छिन्नं भगवत्प्रेम यः प्राप्तवान् सः मायां तरतीति ह्युक्तम् । तस्य प्रेम्णः तत्त्वं किमिति कश्चन पृश्छेत् । किं तु तदित्थमिति निर्वचनं नार्हति । यस्मिन् उद्गते भगवन्माया अन्तर्हिता भवति तदेव भगवत्प्रेम इत्येव लक्षणं मन्यताम् ।

इममर्थमुद्ग्राहयितुं काञ्चन आख्यायिकां उदाहृत्य प्रयत्यते । भगवान् श्रीरामो लङ्काद्वीपे रावणादीन् संहृत्य पत्नीप्रभृतिपरिवार-सहितः पुष्पकविमानेन अयोध्यां प्रति प्रस्थित आसीत् । प्रयाणकाले मार्गमध्ये विमाने उपविष्टस्य मारुतेर्मनसि कल्पना इत्थं समजायत । शतयोजनविस्तीर्णं सागरमुल्लङ्घ्य अहमेक एव सीतादेवीं दृष्टवान् । तद्वार्तां श्रीरामाय निवेदितवानहम् । सेतुनिर्माणकाले पर्वतशिलाः समाहृत्य स्थापितवानहम् । लक्ष्मणस्वामिनः मूर्च्छासमये सञ्जीविनी-मूलिकां आनीय अहमेव दत्तवान् । असङ्ख्याकान् राक्षसान् मारयित्वा अहमेव विभीषणाय राज्यं प्रदापितवान् । इत्थं च सकलमेव कार्यविधानं मयैव निर्व्यूढमासीत् । इदानीमपि यत्कार्यं श्रीराम आज्ञापयति तत्कार्यं साधयितुं अहं शक्तः सज्जस्तिष्ठामि । एवं गर्वभावस्तस्य प्रादुर्बभूव ।

एवं हनूमति चिन्तयति सति सर्वज्ञः श्रीरामः तं सम्बोध्य प्राह । मारुते, मम महती तृषा, किञ्चिज्जलमानयसि किमिति अपृच्छत् । शीघ्रकारी मारुतिस्तत्क्षणे "यदाज्ञापयति देवः" इत्युक्त्वा विमानत उत्प्लुत्य जलाय समन्तादवलोकयामास । दृष्टिगोचरे क्काऽपि जलं नाऽलक्ष्यत । भूमिः मरुप्राया आसीत् । विमानं तद्वायुवेगेन प्रयाति स्म । जलाहरणे विलम्बश्चेत् उद्देशः निष्फलो भवेदिति चिन्ता समुद्भूता । तावति बहुदूरे क्कचन जलाशयः समदृश्यत । सः बहु अटित्वा यतः श्रान्तः अतः क्षणं विश्रम्य जलं नेष्यामि, मम वेगस्याऽग्रे विमानं कियदिति चिन्तयित्वा ततः सरसः समीपमाययौ । शीतमारुतेन कमलिनीसौगन्ध्येन च मनोहरं तज्जलमादातुं यावदेकं कमलपत्रं उज्जहार तावदेव तत्र कश्चन प्रतिहारः समागत्य तं प्रति रे, कस्त्वम् ? अस्मद्देव्या आज्ञां विना एतत्कमलपत्रं कथं उच्छिन्नवानसीति कोपेन व्यक्रोशत् ।

मारुतिः प्रत्युवाच - भोः, रामदूतोऽहम् । हनूमानिति मन्नाम कदाचित् भवानपि श्रुतवान् स्यात् । इदानीं श्रीरामस्य तृषा जाता । अतः बहुसंल्लापकरणे अवकाशो नास्ति । शीघ्रं जलं नेष्यामीति । पुनः तं प्रतिहारः प्राह - त्वं रामदूतो वा स्याः कामदूतो वा भव । मम तेन किम् ? सद्यो गच्छ त्वं अधिकरणम् । इति परुषवचनैः भर्त्सयन् बलात् तं गलेगृहीत्वा निर्बन्धेन कस्याश्चन गुहायाः समीपं अनयत् । गुहां दृष्ट्वा मारुतेः पूर्वदृष्टायाः स्वयम्प्रभायाः स्मृतिरभवत् । सोऽचिन्तयत् - हन्त, इदमपि शोभनं जातम् । तस्यै निवेदयामि चेत् कार्यं सुकरमेव भवेत् । न खलु मम अज्ञाता स्वयम्प्रभा इति चिन्तयन् गुहान्तरगच्छत् । तत्र पश्यति महद्राजभवनम् । तस्मिन् प्रतिहारः तमेकत्राऽनयत् । तावदन्यः पाशहस्तः कश्चन् पुरुषः सस्मितमागत्य मारुतिं बद्धुं तत्कंट्यां हस्तं प्रसारयामास । तं दृष्ट्वा मारुतिः तस्य प्रतिकरोमीति कोपेन प्रहर्तुकामः मुष्टिमाबध्य प्रायतत । परं तु आश्चर्यं तस्य हस्त एव न प्रचलति । तदा स पुरुषो विहस्य रे कपे, त्वं तव समवस्थामेव न जानीषे इति वदन् पाशेनाऽऽबध्य तं तत्रैकस्मिन् स्तम्भे बबन्ध । मारुतिः परितस्तत्र यावत्पश्यति तदा स्तम्भेषु आत्मवत् बद्धान् नवनवतिं कपीनपश्यत् ।

चकितो भीतश्च मारुतिः तदा समीपस्थं कञ्चन वानरं प्रति भोः, केयं कथा ? किमर्थं यूयं सर्वेऽत्र बद्धाः इत्यपृच्छत् । तदा तेष्वेको वानरः प्रत्यब्रवीत् - भोः, अहं पूर्वं रामकार्यार्थं लङ्कां गतो हनूमान्नाम । श्रीरामाय जलाहरणायाऽत्र आगतः अहं न जाने कथञ्चिदिह राक्षसानां मायायां पतितोऽस्मि । एषां राक्षसानां मायातन्त्रं न त्वहं जानामि । अत्र स्थिताः सर्वेऽपि कपयः अहमेव हनूमानिति भावयन्ति । शृणु, यस्मिन् स्तम्भेऽद्य त्वं बद्धोऽसि तत्रैव भवादृशोऽन्यः कपिः बद्ध आस्त । तमद्य प्रातराशाय अमारयन् । इति उपांशु वदत एव तस्य तत्र काचन रमणी समीपं आगत्य अद्य अयं कपिरेव भवतु इति मारुतिं

निर्दिश्य प्रायात् । अनुपदमेव कश्चन कृष्णपुरुषः आगत्य हनूमन्तं पाशबद्धं महानसं अनयत् । हनूमतः दिग्भ्रमोऽभवत् । अयुतायुतराक्षसमारणक्षमं मम शौर्यं इदनीं कुत्र गतम् ! किंत्वद्य दैवमेव गतिरिति सञ्चिंत्य सः पाचकस्य वशे तूष्णीं स्थितः । स पाचकः ईलीपुरतः स्थित्वा पनसमिव खण्डयितुं तं धोप्पिति भूमौ पातयामास । हनूमतः सर्वोऽपि व्यापारः स्तब्धः । तदा तन्मनसि दैवात् स्वस्वामिनः श्रीरामस्य स्मृतिः जागृता । तदा सः न कामपि मायां पश्यति । स्वप्नात्प्रबुद्ध इव सः विस्मयेन अवलोकयति । विमाने पुरतः श्रीरामो हसन्नास्ते । मारुतेः अहं बलवानिति भावो यत्र कुत्रापि निर्गतः । आत्मना दृष्टं दृश्यं किमपि नास्ति । केवलं माया इति च प्रतीयाय । एकस्मिन् घटिकार्धे अनुभूतां घटनां स्मृत्वा भगवतो दयामेकां विना अहं कियान् इति मारुतिः सम्यग् व्यजानात् । एवं भवति मायाप्रभावः । अहङ्काराभिमानयोः समूलनाशे सति माया अस्तं गच्छतीति विभावनीयम् । परप्रेमाऽपि तदैव सिद्धमिति ॥

## मूकास्वादनवत् ॥५२॥

मूकेन अनुभूतस्वादवत् अनिर्वचनीयः प्रेमा ।

९९. प्रेमा कथमनिर्वचनीय इत्येतदत्र सदृष्टान्तं विशदीक्रियते । अनिर्वचनीयशब्दो भिन्नभिन्नार्थवाचित्वेन अन्यान्यशास्त्रकारैः व्यवह्रियमाण उपलभ्यते । शङ्कराचार्यमतानुयायिनः केचित् एतच्छब्दार्थं प्रतिपादयन्ति यथा - रज्जौ प्रतीयमानः सर्पः, एवं शुक्तिकायां अवभासमानं रजतं इत्यादिमिथ्यापदार्थान् अनिर्वचनीयमिति व्युत्पादयन्ति । अस्ति नास्तीति निश्चेतुमशक्यो मिथ्याप्रतिभास एवाऽ-निर्वचनीयशब्दार्थ इति तेषां मतम् । किं चाऽस्य मिथ्याप्रतिभासस्य उपादानकारणं आत्मस्थाविद्याशक्तिरेवेति सा अनादिकालादारभ्य आत्मनि स्थितेति, साऽप्यनिर्वचनीयेति च तेषां मतसंक्षेपः । श्रीशङ्कराचार्यास्तु

प्रतिपादयन्ति यथा - प्रपञ्चबीजभूते नामरूपे अविद्यया कल्पिते, आत्मनि भासेते । अथवा आत्मानमेव नामरूपप्रपञ्च इति व्यावहारिकाः अन्यथा गृण्हन्ति । तन्नामरूपबीजमेव माया, सा आत्मरूपेति वा ततो भिन्नं स्वतन्त्रं वस्तु इति वा निर्वक्तुं न शक्यते इत्यस्मिन्नर्थे मायां अनिर्वचनीयां वदन्ति ।

अत्र अनिर्वचनीयशब्दस्य उपर्युक्तयोः न कतरोऽप्यर्थः विवक्षितः । यत्कारणम् - प्रेमानाम भगवतः स्वरूपानन्द एव भवति । तं चाऽनुभवतां भक्तानां प्रेमवृत्तिरपि प्रेमा इत्येव अभिलप्यते । तत् अनिर्वचनीयमित्युक्ते इदमित्थमिति वाचा निर्देष्टुं न शक्यते इत्येवाऽभिप्रायः । तत् अनुभवमात्रगोचरमस्तीत्यर्थः । यथा मूकः खण्डशर्करादिमधुरपदार्थं आस्वादयति, सोऽनुभूतं स्वादं निवेदयितुं न समर्थः । यतः तस्य वाक् शक्तिः नास्ति । तथैव भक्ताः स्वप्रेमानुभवमन्यस्मै निवेदयितुं न शक्नुवन्ति । यस्माच्च व्यवहारोपयोगिषु शब्देषु न कश्चन शब्दः तदभिवर्णयितुं पारयति । अतः स्वानुभवादेव तत्स्वरूपं विज्ञेयमिति । अनेनैवाऽभिप्रायेण सूत्रकारः अनिर्वचनीयः प्रेमा इत्याह । अतो न कदाचित् प्रेम मिथ्येति मन्तव्यम् । तत्सदृशः परमार्थः नाऽन्यः कश्चनाऽस्ति ।

## प्रकाशते क्वाऽपि पात्रे ॥५३॥

स च भगवत्प्रेमा क्वचन अधिकारिपुरुषे विभाति । न सर्वत्र ।

१००. अनुभवमात्रगोचरो वाचा वर्णयितुमशक्यः प्रेमा इत्युक्तत्वेन न क्वाऽपि प्रेमाऽरस्तीति न मन्तव्यम् । यतोऽनुभवेनाऽपि गोचरीकर्तुं विशेषयोग्यतां अर्थात् अधिकारसम्पदं सः अपेक्षते । तादृशेषु योग्यतावत्सु अधिकारिषु सः अवश्यमेव प्रकाशते । अस्मिन् विषये गीतासु अभिहितं यथा -

*मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।*
*यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥* (७-३)
*बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।*
*वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥* (७-१९)

अनेकेषु जन्मसु कृतेन भक्तिज्ञानाभ्यासेन प्राप्तया ज्ञाननिष्ठारूपसिद्ध्या तत्त्वतो मामवगम्य सुसंस्कृतमतिः सन् साधकः वासुदेवः सर्वप्राणिनां प्रत्यगात्मेति, सर्वमिदं वासुदेव इति च स्वानुभवेन प्रत्येत्य तदनन्तरं परां भक्तिं लभते । स एव महात्मा । तत्समो नाऽन्योऽस्ति । तदधिको नाऽस्त्येव । तादृशाः भक्ताः विरलाः । दुर्लभा एवेत्यभिप्रायः । ईदृशानां महात्मनां प्रेमा लोके सर्वत्र विसृमरो भवति । ईदृशा महात्मानः यत्र निवसन्ति तत्र जातिवैराः मूषकमार्जाराः मृगव्याघ्राः नकुलोरगाः इत्यादयः तिर्यक् प्राणिनोऽपि स्ववैरस्वभावं परित्यज्य अन्योन्यप्रीत्या व्यवहरन्तीति पुराणादिषु वर्णितम् ।

## गुणरहितं कामनारहितं प्रतिक्षणवर्धमानं अविच्छिन्नं सूक्ष्मतरं अनुभवरूपम् ।।५४।।

### गुणरहितं कामनारहितमिति

१०१. भगवद्विषयः प्रेमा बाह्यविषयप्रेमवदिति न मन्तव्यः । यत्कारणम् - इमे बाह्याः शब्दादयो विषयाः सत्त्वरजस्तमोमयाः गुणत्रयविकाररूपाः एव भवन्ति । विषयचिन्तां तदनुभवं वा कुर्वतः पुरुषस्य श्रमो जायते । अथवा तत्र अलम्बुद्ध्यां जातायां ततो निद्रेच्छा वा तूष्णीं अवस्थातुं वा इच्छा जायते । भगवत्प्रेम कृत्वा तु श्रमो वा अलम्बुद्धिर्वा न जायते । तत्र जामितैव न ।

निद्रालस्यादिभिः जायमानं सुखरूपं प्रेम तामसम् । बाह्य शब्दादि-

विषयेषु केषुचित् जायमनं यत् प्रेम तद् राजसम् । यतः तत्तत्पदार्थसम्पादनाय श्रमः, तद्रक्षणार्थं प्रयत्नः, अथवा कालान्तरे तदनपेक्षितत्वे तद्दूरीकरणाय च पुरुषेण व्यापारः कर्तव्यो भवतीति तद् राजसं भवति । तथा बाह्यविषयाणां स्वरूपजिज्ञासा अथवा तत्संसर्गापेक्षा, इत्येतयोः औत्सुक्यरूपं यत् तत्सुखरूपमिति तत् प्रेम सात्त्विकं भवति । एवं गुणत्रयपरिणामरूपं यत् प्रेम, तत् पदार्थान्तरे प्रेम्णि सञ्जाते अथवा प्रकृतविषये कारणान्तरेण औदासीन्ये जाते विच्छिद्यते । एवं गुणत्रयमिश्रोद्भवः प्रेमा पुरुषं ज्ञानसुखसङ्गे वा कर्मसङ्गे वा प्रमादालस्यसङ्गे वा निबध्नाति । अतो यदेतेषु कृतं प्रेम तत् गुणत्रयात्मकमेव भवति ।

परं भगवद्विषये कृतं भक्तिरूपं प्रेम तु गुणरहितमेव भवति । यत्कारणम् भक्तस्य तत्र विषयज्ञानसुखेच्छा न भवत्यतः सत्त्वगुणवर्जितं, वस्तुसम्पादनाय इदं कर्म करिष्यामीति सङ्कल्पो वा प्रवृत्तिर्वा नोदेतीत्यतः रजोगुणवर्जितम्, प्रमादालस्यादिकं तत्पार्श्वं नोपसर्पति अतः तमोगुणरहितम् । एवं गुणत्रयरहिते भक्तान्तःकरणे शुद्धसत्त्वरूपे सति तन्मनसि भक्तिः पर्युदेति प्रकाशते च ।

भक्तः कार्यप्रवृत्तो न भवति । न तत्राऽऽलस्यं कारणम् । किं तु कामनाभाव एव कारणम् । तस्य बाह्यवस्तुषु न किञ्चिदपि प्राप्तव्यं वा परिहार्यं वा वर्तते । यथोक्तं गीतासु भगवता -

*यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।*
*आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥* *(३-१७)*

परभक्तः आत्मन्येव रमते । तस्य बाह्यवस्तुविषयसेवनया प्राप्तव्या तृप्तिः नाऽऽवश्यकी । सः आत्मन्येव तृप्तो भवति । भगवद्व्यतिरिक्तं किञ्चिदपि वस्तु तस्य नाऽऽपेक्षितमतः सः सदा सन्तुष्टो वर्तते । अत एव तस्य कर्तव्यमपि न किञ्चिदवशिष्यते । इति ॥

## प्रतिक्षणं वर्धमानमिति

१०२. ननु भक्तस्याऽपि स्वभक्तिः वर्धतामिति आशा स्यात्, तदर्थमपि क्रिया काचित् कर्तव्या स्यादिति चेत्, तथा न । अन्येषु विषयेषु यः प्रेमा सः प्रेमाभासः काम एव भवतीत्यतः, सः सदा विक्रियते एव । ततश्च क्षयित्वा अन्ते नष्टो भवेत् । भगवद्विषयः प्रेमा तु न तथा । यत्कारणम् भगवत्स्वरूपं नित्यसत्यानन्दं अतः तद्विषये प्रेमोद्भवस्तावदेव चिरम् । उदिते प्रेम्णि सः क्षणेक्षणे वर्धते एव । अन्तःकरणस्थयोः रजस्तमसोः अपगमानन्तरमेव शुद्धसत्त्वगुणमहिम्ना स प्रेमा प्रकाशते । अतः आत्मानन्दपरिचयमात्रे विलम्बः, तदुत्तरक्षणे उत्सिच्यमानः प्रेमा प्रथते ।

श्रुतिः - अथाऽकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः ॥ (बृ.आ.४-४-६) इति । कामयमानकथाः पूर्वमुक्ताः । अथेदानीं अकामयमानविषयः प्रस्तूयते । स ज्ञानीभक्तः कामनारहितो वर्तते । कामाः सर्वे तस्मादपगताः भवन्ति । यत्कारणम् - सः सर्वान् कामान् प्राप्तवान् । कथम् ? आत्मकामत्वात् । आत्मैव हि तस्य सर्वकामरूपो भवति । इति बृहदारण्यक श्रुतिरुद्घोषयति । ततश्च यस्य भगवति प्रेमा समुत्पन्नः स सर्वदा परमात्ममय एव भवति । स सर्वथा ब्रह्मसायुज्यमेवाऽऽप्नोतीति उदाहृतश्रुतिरेव "ब्रह्मैव सन् ब्रह्माऽप्येतीति" वाक्यशेषेणाऽऽह ।

## अविच्छिन्नमिति

१०३. यतः परमात्माऽनन्तः अतस्तत्प्रेमाऽप्यनन्तमेव । अविच्छिन्नं नाम मध्ये न विरतम्, किन्तु निरन्तरम् । अरण्ये ज्वलितो दावाग्निर्यथा स्वयमेव सर्वतो विसृत्वरो भवति तथा प्रेमाऽपि वर्धत एव । तत्राऽलम्बुद्धिः न जायते । अत इदं तमोगुणजातनिद्रासुखवत् नाऽवसीयते । तथा कदाचित् स्थगितं स्यादिति भीतिर्नास्ति ।

## सूक्ष्मतरमिति

१०४. इन्द्रियगोचराणि वस्तूनि स्थूलानीत्युच्यन्ते । इन्द्रियातीतानि केवलबुद्ध्या गृह्यमाणानि सुखादीनि सूक्ष्माणि भवन्ति । काव्यरसानुभवेन गणितव्याकरणादिविद्याकौशलेन च ज्ञाप्यमानं सुखादि, इत्यादीनि सूक्ष्माणि वर्तन्त इत्यतः तत्सुखं न सर्वैः गोचरीक्रियते । भगवत्प्रेम तु ततोऽपि सूक्ष्मतरम् । तत् बुद्धिव्यापारमतीत्य साक्षादात्मनः प्रेमत्वेन अवस्थितं इन्द्रियैर्वा मनसा वा विषयीकर्तुं तथा गदितुं च न शक्यते । भक्तः स्वानुभवेन तदनुभवति । आत्मानन्दः परप्रेमेति च द्वयमप्येकमेव ।

## अनुभवरूपमिति

१०५. भगवत्प्रेम अनुभवगोचरमिति यद्यप्युक्तम् । तथापि तत् सूक्ष्मेक्षिकया विभाव्यमाने न कस्याऽपि गोचरमिति वक्तव्यं भवति । यस्मात् कारणात् आत्मानुभवस्य साक्षादात्मनश्च यथा भेदो नास्ति तथैव आत्मप्रेम्णः आत्मनश्च नास्त्येव भेदः । आत्मैव प्रेमरूपोऽस्ति । वन्हेः औष्ण्यवत् । आत्मनः प्रेमेति व्यपदेशमात्रं भवति । वस्तुभेदो नास्ति । अस्माकमात्मेति वयं यं व्याहरामः स एव सर्वेषामात्मभूतः, स एव प्रेमानन्दानुभवरूपो वर्तते । अत एव श्रुतिः-

***तदेतद् ब्रह्माऽपूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः ।***

***(बृ. आ. २-५-१९)***

एष ब्रह्मात्मा पश्चात्पुरोभागरहितः कार्यकारणभावरहितः अन्तर्बहिर्भेदशून्यः स्वयमद्वितीयोऽस्ति । अयमात्मैव ब्रह्म सर्वानुभव रूपमिति निर्वक्ति ।

अनुभवरूपेण विद्यमानस्य आत्मनोऽनुभवेनैव सर्वे सर्वमपि विजानन्ति । बाह्यवस्तूनां ज्ञानस्य ज्ञानमिति अनुभव इति च नाम

भवति । इन्द्रियैर्जायमानो वस्तूनामनुभवः इन्द्रियसंनिकर्षमनुसृत्य भवतीत्यतः सोऽनुभव इति व्यपदिश्यमानः अन्वर्थो वर्तते । भगवत्प्रेम तु सदा सर्वान्तरं सत् परमात्मरूपमेवाऽस्तीत्यतः अस्याऽनुभवरूपस्य प्रेम्णः उत्पत्तिनाशावेव न स्तः । इन्द्रियाणि प्रत्यङ्मुखानि कृत्वा आत्मन्येवात्मना प्राप्तव्यमिदं प्रेम पूर्वभवमपि सर्वैर्न लभ्यत इत्यस्य इदमेव कारणम् ।

## तत्प्राप्य तदेवाऽवलोकयति तदेव शृणोति (तदेव भाषयति) तदेव चिन्तयति ।।५५।।

तत्प्रेमप्राप्त्यनन्तरं भक्तः सर्वत्र तदेव पश्यति, सर्वदा तदेव शृणोति, तदेव संलपति तदेव चिन्तयति ।

१०६. एवं लब्धप्रेमा भक्तः प्रेममयो भवत्यतः तस्य सर्वं प्रेममयमेव भवति । तथा च श्रुतिः -

*आत्मैवाऽधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति । स वा एष एवं पश्यन् एवं मन्वान एवं विजानन् आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति ।*

*(छां. उ. ७-२५-२)*

इति श्रुत्युक्तवत् तस्य ज्ञानिभक्तस्य ऊर्ध्वमधः पश्चात्पुरतः दक्षिणे पार्श्वे उत्तरे च सर्वत्र सर्वमपि आत्मैव भवत्यतः, सः एवं पश्यन् एवं मन्वानः एवं विजानन् आत्मारामो भवति । स प्रेमसागरे आनन्दी भवति । स सर्वस्वतन्त्रः स्वराट् । इति ।

१०७. सूत्रे तदेव शृणोतीति वाक्योत्तरं तदेव भाषयतीति वाक्यं क्वचिद् दृश्यते । तदा सः यं कञ्चित्पश्यतु शृणोतु चिन्तयतु, तत्सर्वमपि प्रेम-विषयमेव भवतीत्यतः तस्य जनसंल्लापोऽपि तद्विषय एवेत्यभिप्रायः उद्गृहीतव्यः । एषा परभक्तेः परा काष्ठेति ।

# १४. अथ गौणभक्तिविचारः

## गौणी त्रिधा गुणभेदादार्तादिभेदाद्वा ।।५६।।

गौणभक्तिः त्रिप्रकारा गुणभेदेन अथवा आर्तादिभेदेनेति ।

## गुणभेदात्

१०८. अथ गौणभक्तिं निरूपयितुं प्रक्रमते । अमुख्या भक्तिः गौणभक्तिः । एतां गौणभक्तिं उभयदृष्ट्या त्रिभिस्त्रिभिः प्रकारैः प्रपञ्चयितुं शक्यते । भगवद्गीतासु सत्त्वरजस्तमोगुणानां विवरणं कृतम् । तत्र चतुर्दशेऽध्याये ते गुणाः यथा जीवं निबध्नन्तीदं स्पष्टीकृत्य ततो गुणातीतस्य ज्ञानिभक्तस्य निस्त्रैगुण्यस्थितिं च भगवान् प्रादर्शयत् । अतस्तत्र यद्यपि परभक्तिः प्रधानविषया, तथापि यःसाधकः तत्रोक्तानि परभक्तलक्षणानि मनसि कृत्वा अनुसरणपूर्वकं साधनं करोति तस्य भक्तिः सात्त्विकी स्यात् । एवं कर्मयोगविवरणसमये प्रतिपादितं यथा - "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवाऽर्जुन (गी. २-४५) इति । अत्रोक्तप्रकारेण संसारिभिः अन्यान्यकामेन क्रियमाणानि कर्माणि राजसानि भवन्ति । तादृशकर्मानुष्ठानसमये कर्तुः प्रीतिश्च सकामा भवतीत्यतः तां भक्तिं राजसीति वक्तुमुचितम् । ततः सप्तदशाध्याये यज्ञदानतपांसि सात्त्विकराजसतामसानीति प्रविभज्य तामसश्रद्धया यद् भगवद्भजनं क्रियते सा तामसभक्तिरिति वर्णितमस्ति । एवमेषा त्रिप्रकाराऽपि मुख्यभक्तिर्न भवति । किं तु गौणभक्तिरेव । यत्कारणं तासु भक्तिषु भगवत्प्रेम परमरूपं न भवति । इत्थं च साधकस्य अन्तःकरणं प्राधान्येन यं गुणमुपादाय भक्तिं कर्तुं प्रवर्तते तत्र तद्गुणप्राधान्येन सात्त्विक-भक्तिः राजसभक्तिः तथा तामसभक्तिरिति परिगणय्य तासां गौण-भक्तिरिति नाम कुर्वन्ति ।

## आर्तादिभेदाद्वेति

१०९. अथवा आर्तादिभेदेन गौणभक्तिः त्रिधेति प्रोच्यते । गीतासु सप्तमाध्याये वर्णितम् -

*चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।*
*आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥*
*तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । इति ।*

*(गी. ७-१६, १७)*

उपासकः यत्प्रयोजनमुद्दिश्य भक्तिसाधनान्यनुतिष्ठति तदनुलक्ष्य भक्तिं चतुर्धा विभजन्ति । भक्तिः भक्तमनोगतिं अनुरुध्य वर्तते इत्यतः अत्रोक्ता भक्तिरपि सात्त्विकादिभेदवत् परभक्तिलक्षणाभावेन गौणभक्तिरित्येव कथ्यते । चोरव्याघ्रादिदुष्टप्राणिनां आधिव्याध्यादीनां भयनिमित्तेन विपन्नः पुरुषः स्वसङ्कष्टपरिहाराय भगवच्छरणमुपगच्छति चेत् सः आर्तभक्तः । भगवत्तत्वजिज्ञासया भक्तिं कुर्वन् पुरुषो जिज्ञासुभक्तः । धनधान्यादिलाभवृद्ध्यर्थं प्रार्थयमानः पुरुषः अर्थार्थी भक्तः । एवमेते त्रयो गौणभक्ता इतिव्याख्याय श्रीशङ्कराचार्याः ज्ञानिपुरुषं परभक्तवर्गे सममेलयन् । श्रीनारदादयो भक्त्याचार्याः परमप्रेमरूपायाः भक्त्याः प्राप्त्यै यः प्रयतमानोऽस्ति, भगवत्प्रेममात्रप्राप्त्या एकया अलमिति निर्भरतया भगवन्तं भजति स एवाऽऽर्तभक्त इति परिगणयन्तीति विभावनीयम् । तथा हि कुलशेखरः मुकुन्दमालायाम् -

*नाऽऽस्था धर्मे न वसुनिचये नैव कामोपभोगे*
*यद्यद् भव्यं भवतु भगवन् पूर्वकर्मानुरूपम् ।*
*एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि*
*त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥*

*(मुकुन्दमाला)*

हे भगवन्, मम नहि धर्मार्थकामेष्वपेक्षा । केवलेन त्वत्पादभक्त्यानन्देन अलम् इति प्रार्थयते । एवमुत्कण्ठावानेवाऽत्र आर्तः । तस्य जन्ममरणादिसंसारभीतिरपि नास्ति । भगवद्भक्तिरेकैव समपेक्षिता । इतीयं आर्तस्य भक्तस्य समवस्था । अस्याः भक्तेः परभक्तेश्च वैलक्षण्यं किमिति चेत्, परमात्मनः कथाः कल्याणगुणांश्च श्रावंश्रावं एतस्य पुरतो मह्यं नाऽन्यत्किञ्चिद्रोचत इति सापेक्षा परोक्षज्ञानवत् आर्तभक्तिः । भगवत्तत्त्वमेव साक्षादपरोक्षं कृत्वा तन्मयतया प्रेमानन्दमनुभवतो भक्तस्य भक्तिः परभक्तिरिति विवेक्तव्यम् ।

## उत्तरस्मादुत्तरस्मात्पूर्वपूर्वा श्रेयाय भवति ॥५७॥

एषु भक्तिप्रकारेषु पूर्वः पूर्वः परस्मात् अधिकश्रेयसे कल्पते ।

११०. सात्त्विकराजसतामसेषु प्रेमसु तामसाद् राजसं, राजसात् सात्त्विकं परभक्तेः सन्निकृष्टं भवति । एवमर्थार्थिनो भक्तेः जिज्ञासुभक्तिः जिज्ञासुभक्तेः आर्तस्य भक्तिः ज्यायसी भवति । यत्कारणम् - आर्तः परमात्मप्रेमार्थं जगद्विषयान् सर्वान् परित्यक्तुमुद्यतो वर्तते । परमात्मप्रेम्णि केवलं रन्तुमभिलषति । यथा हि - शिशुः मातुर्मुखमेव केवलमालोकयन् रमते, न तु मातुः स्वरूपं विज्ञातुं प्रयतते । तद्वदार्तः अनपेक्ष्य तत्त्वजिज्ञासां साक्षात्परमात्मानमेव अभिवाञ्छति । अत एव श्रीनारदो मुख्यभक्तिलक्षणे तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति रहस्यार्थं गर्भीकृत्य निजगाद । अत्र ज्ञानं तु बाह्यवस्तुज्ञानवत् परमात्मस्वरूपं केनचित्प्रत्ययेन निर्धारणमेव, न प्रमाणेन तत्त्वनिश्चयः । बुद्धिप्रधाना जनाः प्रायेण तर्कतः वस्तुस्वरूपनिश्चयाय प्रयतन्ते । प्रेमप्रधाना भक्तास्तु वस्तुसौन्दर्यं प्रति प्रीयमाणाः तस्मिन्नेवाऽभिरमन्ते । एवमार्तो भक्तः भगवत्तत्त्वनिश्चयाय न बुद्धिव्यायामं करोति । भगवन्माहात्म्यं परं शास्त्रेण गुरुमुखेन च श्रुत्वा -

*तव तत्त्वं न जानामि यादृशोऽसि जनार्दन ।*
*यादृशोऽसि महादेव तादृशाय नमो नमः ।।*

हे देव, तव तत्त्वमहं न जानामि । त्वं यादृशोऽसि तादृशाय तुभ्यं नमः, तव भक्तिं दत्वा मामनुगृहाणेति प्रार्थयमान एव समास्ते । अतो हृदयप्रधाना आर्तभक्तिः मुख्यभक्तेः नेदीयसी वर्तते । इत्थं च गौणभक्तिषु इयमेव ज्यायसी भवति ।

तत्त्वज्ञानं प्रति साधनमिति भक्तिकरणापेक्षया भक्त्यर्थमेव भक्तिकरणरूपायां आर्तभक्तौ को विशेष इति चेत् - जिज्ञासुः पुरुषः भक्तिं केवलं ज्ञानसाधनं मन्यते । न ततोऽधिकं स्थानं तस्याः मन्यते । तस्य मुख्या दृष्टिः ज्ञानं प्रत्येव तिष्ठति । तस्मात्तस्य भक्तिः न अनन्या भवति । आर्तभक्तस्य भक्तिस्तु अनन्या भवति । यथोक्तम् -

*या निर्वृतिस्तनुभृतां तव पादपद्म*
*ध्यानाद् भवज्जनकथाश्रवणेन वा स्यात् ।*
*सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्*
*किं त्वन्तकासिलुलितात् पततां विमानात् ।।* (भाग. ४-९-१०)

भक्तभागवतानां भगवत्पादपद्मध्यानेन वा भगवत्कथाश्रवणेन वा भक्तविजयश्रवणेन वा यः आनन्दः प्राप्यते स आनन्दः नश्वरेण स्वर्गभोगेन न लभ्यते इति वार्ता तावदास्ताम् । स्वमहिमप्रतिष्ठारूपे साक्षाद्ब्रह्मप्राप्तावपि न लभ्यत एवेति आर्त भक्तानां भावना भवति । अत एव तद्भक्तिः अनन्या ।

जिज्ञासुभक्तः मर्कटशिशुन्यायानुरोधेन भक्तिं करोति । मर्कटशिशुः मातुरालिङ्गनं विना स्वयं यत्र कुत्रापि अधःपतेयम् इति यथाभिमन्यते, तथा ज्ञानं विना भ्रष्टो भवेयम् इति, आकलयन् ज्ञानार्थं प्रयतमान एव भविष्यति । अतस्तस्य भक्तिः अनन्या न भवति । आर्तभक्तस्तु

मार्जालशिशुन्यायानुरोधेन भक्तिं करोति । मार्जालशिशुः स्वस्थानस्थित एव स्वाह्वानमात्रेण माता स्वयमेव समीपमागमिष्यतीति विश्वस्य तिष्ठति । एवं भगवान् कदाचिदपि स्वहस्तं न मुञ्चतीति विश्वस्य स्वप्रयत्नमुज्झित्वा भक्तावेव केवलं निरतो भवतीत्यतः अस्य भक्तिः अनन्या भवतीति ।

१११. गौणभक्तेः विवरणविचारोऽत्र समाप्यते । भक्त्यर्थं क्रियमाणानि साधनानि सकलान्यपि गौणभक्तावेव अन्तर्भवन्ति । अतश्च -

*श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।*
*अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥*
*इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।*
*क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥* (भाग. ७-५-२४, २५)

इति प्रह्लादप्रोक्तासु नवविधभक्तिषु सर्वत्र भगवत्प्रेम अन्तः परिस्रवतीत्यतः ताः सर्वाः गौणभक्तावेवाऽन्तर्भवन्ति । अध्यात्मरामायणे -

*सतां सङ्गतिरेवाऽत्र साधनं प्रथमं स्मृतम् ।*
*द्वितीयं मत्कथालापस्तृतीयं मद्गुणेरणम् ॥*
*व्याख्यातृत्वं मद्वचसां चतुर्थं साधनं भवेत् ।*
*आचार्योपासनं भद्रे मद्बुद्ध्याऽमायया सदा ॥*
*पञ्चमं पुण्यशीलत्वं यमादि नियमादि च ।*
*निष्ठा मत्पूजने नित्यं षष्ठं साधनमीरितम् ॥*
*मम मन्त्रोपासकत्वं साङ्गं सप्तममुच्यते ।*
*मद्भक्तेष्वधिका पूजा सर्वभूतेषु मन्मतिः ॥*
*बाह्यार्थेषु विरागित्वं शमादिसहितं तथा ।*
*अष्टमं नवमं तत्त्वविचारो मम भामिनि ॥* (अ.रा.अ. १०-२२ तः २७)

इति प्रोक्तानि नव भक्तिसाधनानि अस्मात्कारणादेव गौणभक्तावेव अन्तर्भाव्यानि । किं बहुना, उपासकस्य यद्यद्बाह्यं कर्म भगवद्विषयं भवति तत्सर्वं गौणभक्तिरेव । यत एभिः उपायैः सर्वैरपि मुख्यभक्तिर्नाम परभक्तिरेव साधयितव्या भवति ।

# १५. गौणभक्तेः सौलभ्यम्

## अन्यस्मात्सौलभ्यं भक्तौ ॥५८॥

भक्तौ अन्येभ्यः श्रेयस्साधनेभ्यः सौलभ्यमस्तीति ।

११२. पूर्वं पञ्चविंशे सूत्रे परभक्तिः कर्मज्ञानयोगेभ्यो ज्यायसी भवतीत्यतः तैः सर्वैः भक्तिरेव प्राप्तव्यं फलमिति निदर्शितम् । अत्र गौणभक्तिः कर्मज्ञानयोगेभ्यः अनुष्ठातुं सुकरतया सुलभं साधनं भवतीति ज्ञाप्यते ।

कर्ममार्गे अनुक्रमणं अतीव दुष्करम् । तथाहि - शास्त्रे कर्म यथोक्तं तस्य तथैवाऽनुष्ठाने कर्मणः फलं प्राप्यते इति वदन्ति । अन्यथा स्वेच्छया कर्माचरणे फलं न, अपि तु प्रत्यवायदोष एव सङ्घटते । वेदे धर्मशास्त्रेषु च यस्य कर्मणः साधनस्य वा यद्यदङ्गं भवति, कथं वा कर्म अनुष्ठेयम् इत्यादीनि विचारितानि निश्चितानि भवन्ति । काम्यनिषिद्धकर्माणि वर्जयित्वा केवल-नित्यकर्मानुष्ठानेऽपि अल्पं क्षयिष्णु च स्वर्गफलं प्राप्येत । तत्रापि द्विजा एवाऽधिकारिणः । एवं कर्ममार्गः सङ्कीर्णः दुर्गमश्च वर्तते । केवलं स्वर्गकामनया कर्मसु कृतेष्वपि तैः परभक्तिरूपं फलं न प्राप्यत एव । अत एव गीतासु भगवान् निदर्शयति -

*त्रैविद्या मां सोमपाः पूतपापा*
*यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।*

*ते पुण्यमासाद्य सुरेन्द्रलोक-*
*मश्नन्ति दिव्यान् दिवि देवभोगान् ।।*
*ते तं भुक्त्वा स्वर्गलोकं विशालं*
*क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।*
*एवं त्रयीधर्ममनुप्रपन्ना*
*गतागतं कामकामा लभन्ते ।।* (गी. ९-२०, २१)

अधीतर्ग्यजुस्सामवेदाः कर्माधिकारिणो ये द्विजाः, ते सोमयागादिकं कृत्वा पापानि निर्धूय स्वर्गलोकं प्राप्नुवन्ति । परं तु तत्र ते स्वकर्मफलानि स्वर्गभोगान् अनुभूय तत्फलावसाने पुनः मर्त्यलोकं प्रत्यागच्छन्ति । एवं बहुश्रमेण यज्ञादिकं कृत्वाऽपि कर्मिणः अल्पं क्षयिष्णु च फलं प्राप्नुवन्तीति तद्गतिं निन्दित्वा अनन्तरं कर्म कर्मयोगविधिना यथा परभक्तिं प्रति साधनं भवेत् तथा उपदिशति -

*यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।*
*स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।।* (१८-४६)

ब्राह्मणक्षत्रियवैश्यशूद्राः स्वस्वाधिकारानुगुणं कर्म कुर्वाणाः सन्तः तत् परमेश्वराराधनरूपेण परिणामयन्ति चेत् तेन चित्तशुद्धिं प्राप्य तद्द्वारा परभक्तिं प्राप्नुवन्तीति भगवान् प्राह । एवं च कर्ममार्गमनुसृत्य सम्पाद्यमाना गौणभक्तिः बहुकष्टसाध्या एव भवति । तेन प्राप्तव्याऽपि परभक्तिः चिरकालेन साध्यते न अचिरेण ।

अथ ज्ञानमार्गेण साधनं कुर्वन्नपि नित्यानित्यवस्तुविवेकः, इहामुत्र भोगविरागः शमादिसम्पत् मुमुक्षुत्वमिति साधनचतुष्टयमपेक्ष्यैव प्रयतेत । तं ज्ञानमार्गमनुसरन्तं उद्दिश्य गीतासु -

*अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।*
*आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ।।*

*इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।*
*जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ।।*
*असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।*
*नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ।।*
*मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।*
*विविक्तदेशसेवित्वमरतिर्जनसंसदि ।।*
*अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।*
*एतद् ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ।।* *(१३-७ तः ११)*

इत्युक्तम् । एतैः श्लोकैः यस्य अमानित्वादयः साधनगुणाः सन्ति तस्यैव ज्ञानमार्गः फलप्रदो भवति । अन्यथा प्रयतमानस्य अज्ञानतमः अधिकमेव आवृणोतीति स्पष्टमुक्तम् । अत एव एष मार्गो न सर्वेषां सुगमः । अपरं च अस्मिन्मार्गेऽपि अनन्यभक्तिरावश्यकीति कीर्तितमेव ।

अथ योगमार्गं विमृशाम चेत् तत्राऽपि यमनियमाद्यष्टाङ्गयोग साधनानुष्ठानानन्तरमेव योगसिद्धिरिति योगशास्त्रे प्रतिपादितम् । तत्राऽपि ईश्वरप्रणिधानं नाम भक्तिः आवश्यक्येवेति कथितमस्ति ।

११३. एवं च अन्यान्यमार्गेषु बहुप्रयासेन साधनान्यनुष्ठितान्यपि तत्र सर्वत्र आदौ वा मध्ये वा अन्ते वा भक्तिरनुसर्तव्यैव भवति । परं तु भक्तिमार्गे न तथा । स सरलः सुगमश्च मार्गः । भक्तिर्हि प्रेम । प्रेमवृत्तिरहितान्तःकरणवान् प्राणी एव लोके नास्ति । निसर्गादेव सर्वे प्राणिनः एकस्मिन्वाऽन्यस्मिन्वा यस्मिन् कस्मिन् वस्तुनि व्यक्तौ वा स्वभावतः प्रीतिं कुर्वन्ति । तदेव प्रेम भगवदभिमुखं कार्यते चेत् अलम्, तत्प्रेमैवाऽऽत्मानं परिवर्धयति । निमित्तमात्रं तु कर्मादयो भक्तेः साधनमिति । तैर्विनाऽपि उपासकः स्वसहजया केवलप्रेमवृत्त्या भक्तिं सम्पादयितुं प्रभवत्येव । वस्तुतो भगवानेवाऽस्माकमात्मा भवति । अत एव सर्वोऽपि

स्वात्मनि स्निह्यति । "आत्मा१हि प्रिय" इति श्रुतिः । स्वात्मविषयकं प्रेम सहजं यतोऽतस्तदात्मप्रेम भगवद्भक्तेरतीव सन्निकृष्टमेव । बाह्यवस्तु-विषयकं प्रेम तु अस्मान् कामपरतन्त्रान् कृत्वा स्तम्भे बद्धान् पशूनिव विषयेष्वाऽऽसञ्जयति । तद्बन्धनग्रन्थिमुच्छेत्तुं भगवन्तं प्रत्याऽऽभिमुख्यमेव साधीयः साधनम् । अस्मिन् प्रयोगे प्रयासोऽपि नास्ति । भगवतः स्वात्मत्वात् । लोके यस्य कस्याऽपि वस्तुनः सद्गुणश्रवणमात्रेण तस्मिन् प्रीतिर्जायते ननु । अनुपदमेव मनः तस्मै स्पृहयति । इदं स्वाभाविकम् । तथैव परमात्मनः कल्याणगुणान् आकर्णयामश्चेत् तस्मिन्नादरभाव उत्पद्यते एव । क्षुधितः शिशुः यथा मातरमभिधावति तथा येन केनाऽपि निमित्तेन अस्नाकं मनस्तापो जायेत तर्हि भगवन्तं शरणमुपगच्छेत् । शिशुः क्रीडनकानि दूरे अपास्य मातृसमीपमुपसर्पति यथा तथैव वयं विषयान् दूरे परिहाप्य भगवन्तं प्रत्यभियामश्चेत्, शिशुचिन्तापरा माता यथा शिशुमभिसरति तथैव भक्तप्रियो भगवानपि अस्मानभिवीक्ष्य क्लेशेभ्यः पारयेत् । गीतासु

*ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।*
*अनन्येनैव योगेन मां ध्यायन्त उपासते ।।*
*तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।*
*भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ।।* (१२-६-७)

इति भगवान् आश्वासनं ददाति । भक्ता अपि -

*स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।*
*भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ।।*

(भाग. ११-३-३१)

पापराशिमभिनिघ्नन्तं भगवन्तं स्वयं स्मरन्तः अन्येभ्यश्च स्मारयन्तो भक्ताः भक्त्यानन्देन पुलकिता भवन्ति । एवं भक्तेः भक्तिरेव प्रधानं साधनं भवतीति कृत्वा नान्यत्साधनं मुख्यं इति ।

विषयप्रीतिं तिरस्कर्तुं वैराग्यमुत्पादयितुं च भक्तिरेव असाधारणं कारणं भवति । कथमिति चेत् - लोके एकस्मिन् वस्तुनि प्रीतौ अधिकायां सत्यां तत्पूर्वं यत्प्रियंवस्तु आसीत् तस्मिन् प्रीतिः क्षीयते । तद्वस्तु पूर्ववत् एनं आक्रष्टुं न प्रभवति । अधिकगुणे वस्तुनि मन; प्रीयते । यतश्च अधिकगुणवद्वस्त्वभिमुखमेव मनःप्रसरणस्वाभाव्यं अतो भगवद्गुणानां श्रवणं कीर्तनं वर्णनं स्मरणं च मनसः विषयाकर्षणं अपोहितुं भेषजं भवति । एवं भक्त्या वैराग्यं प्रथते ।

११४. भगवत्तत्त्वज्ञानमपि भक्त्यैव प्राप्तव्यम् । तथाहि गीतासु -

*तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।*
*ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥*
*तेषामेवाऽनुकम्पार्थमहमज्ञानजं तमः ।*
*नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥* *(१०-१०, ११)*

ये भक्त्या मां सततं भजन्ति तेषामज्ञानतमः ज्ञानदीपेनाऽहमेव नाशयामीति भगवानेव गदितवान् । एतद्रहस्यमविदित्वा ये तर्कप्रधानेन विचारेणैव भगवत्तत्त्वमन्विच्छन्ति ते मूर्खा एव केवलम् ।

*श्रेयस्स्रुतिं भक्तिमुदस्य ते विभो*
*क्लिश्यन्ति ये केवलबोधलब्धये ॥*
*तेषामसौ क्लेशल एव शिष्यते ।*
*नान्यद्यथा स्थूलतुषावघातिनाम् ॥* *(भाग. १०-१४-४)*

एवं चतुर्मुखोक्तवत् नियतश्रेयोदायिनीं भक्तिं परित्यज्य ज्ञानप्राप्तये ये प्रयतन्ते तेषां तुषावघातिनामिव क्लेशप्राप्तिरेव केवलम् । न किञ्चित्फलं लभ्यते । अतो बुद्धिमान् अन्यानि साधनानि सन्तु वा मा वा सर्वसुलभां भक्तिमेव सम्पादयेत ।

# प्रमाणान्तरस्याऽनपेक्षत्वात् स्वयम्प्रमाणत्वात् ।।।५९।।

यतः - भक्तिसिद्धिं प्रति अन्यस्य प्रमाणस्य अपेक्षा नास्ति सा स्वयम्प्रमाण सिद्धा अतः सुलभसाध्या भक्तिः ।

११५. कर्म ज्ञानं योगः इत्येतेषु मार्गेषु शास्त्राचार्याणां प्रमाणस्य च अपेक्षा वर्तते । एतत्कर्म ईदृशं फलं ददाति वा न वा ? तत्त्वविचारेण कृतो निश्चय एव सिद्धान्तः कथम् ? साधनेन योगसिद्धिः भवति वा न वा ? इत्यादयः संशयाः तत्र सम्भाव्याः । एवं तत्र संशये सञ्जाते शास्त्राचार्याणां युक्तिरेव प्रमाणमिति प्रत्येतव्यं भवति । तत्रापि कालान्तरे साधनानुष्ठानान्ते फलं प्राप्तव्यं भविष्यति । भक्तिविषयस्तु न तथा । यतो हि भक्तिशास्त्रश्रवणात् पूर्वमपि सर्वप्राणिनोऽपि स्वात्मनि प्रेम कुर्वन्त्येव । तत्प्रेम अन्येभ्यो विषयेभ्योऽधिकं निरतिशयं निर्निमित्तं यतोऽतः तत् स्वयम्प्रमाणसिद्धमेव । श्रुतौ -

*न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति ।* *(बृ.आ. ४-५-६)*

पतिः जाया पुत्राः पशवः वित्तं ब्रह्मक्षत्रादिजातयः देवाः इत्येतेषु यस्मिन्कस्मिन् प्रेम भवति तत्तत्प्रेम स्वात्मप्रेमनिमित्तेनैव सञ्जायते इति ज्ञापयित्वा, स्वयं सिद्धमात्मप्रेम प्रसिद्धमिति ऊरीकृत्य, एतस्याऽऽत्मनः परमार्थस्वरूपं परमात्मैव भवतीति प्रतिबोध्य, एतस्मात्कारणादेव परमात्मतत्त्वं श्रवणमननादिभिः विजानीयात् इति याज्ञवल्क्यो मैत्रेय्यै बोधयामास । परमात्मस्वरूपज्ञानात्पूर्वमेव अस्माकं सर्वेषां स्वात्मनि प्रेम समस्त्येव । तस्य प्रेम्ण आस्पदं वस्तु किमु परमार्थतः इतीदं केवलं शोधयितव्यं अन्वेष्टव्यं भवति । अस्माकं आत्मनि प्रेम अस्ति वा न वेतीदं न विचारेण निश्चेतव्यम् । यत आत्मनि प्रेम स्वयं सिद्धमस्ति । इतश्च भक्तिः ज्ञानादिभ्यः सुलभं साधनमिति सिद्धम् ।

## शान्तिरूपात् परमानन्दरूपाच्च ।।६०।।

भक्तावधिकं सौलभ्यमिति सम्बध्यते ।

११६. भक्तिः अधिकसुलभसाध्या इत्यत्र अपरं कारणमप्यस्ति । कर्म वा ज्ञानार्थो विचारो वा योगसिद्ध्यर्था यमनियमादयो वा इतीमानि साधनानि श्रमसाध्यान्येव सन्तीत्यतः अन्तरकाले अनुष्ठातुं जामितया साधकः कदाचित्तानि परित्यजेदिति अपायः अस्ति । अतोऽनुष्ठाता अप्रमादेन कायक्लेशसहनेन च स्थिरप्रयत्नं कुर्यादेव ।

भक्तिविषयस्तु तथा न । यत्कारणं - सर्वस्याऽपि स्वात्मनि स्वभावादेव प्रेम जागृतमेव समस्तीत्यतः तदर्थं विशेषतः सम्भ्रमो नाऽऽवश्यकः । प्रेम च सर्वानेकीकरोति इति निसर्गनियमः । अतोऽस्य मध्ये अन्तरायो न सम्भवेत् । सम्भवेऽपि स्मरणादिसुलभोपायेन सः परिहृतो भवेत् । यावता भक्तस्य भगवन्तं विनाऽन्यद्वस्तु नाऽपेक्षितमेव । वासनाबलात् कदाचित्कस्यचिद्विषयस्य स्मरणे जातेऽपि अथवा कस्यचिद्वस्तुनः भोगप्रसक्तावपि तस्मिन् सर्वत्र भक्तः भगवत्सम्बन्ध-मेवाऽवलोकयति । तत्रापि परभक्तस्तु -

*आपूर्यमाणमचलप्रतिष्ठं*
*समुद्रमापः प्रविशन्ति यद्वत् ।*
*तद्वत्कामा यं प्रविशन्ति सर्वे*
*स शान्तिमाप्नोति न कामकामी ।।* (गी. २-७०)

इति भगवदुक्तिवत् नित्यनिरन्तरभगवच्चिन्तनतत्परो भगवन्मय एव भवति । नानादिग्भ्यः प्रवाहरूपेणागताभिः नदीभिः सुसङ्गतः समुद्रः ताः सर्वाः स्वात्मन्येव समावेश्य समुद्रमेव कृत्वा स्वयं सीमानमनतिक्रममाण एव तिष्ठति । एवं भक्तो विषयान् भुञ्जानोऽपि यतोऽनासक्तः अत एव क्षोभरहितः सन् समचित्तस्तिष्ठति । तस्य मनः

शान्तरूपेण वर्तते । आनन्दरूपो भगवानेवाऽऽत्मा भवत्यतः तस्य मनोवृत्तिरपि आनन्दमयी एव भवति ।

गौणभक्तोऽपि परभक्तिपरीप्सुः भूत्वा भगवत्कथाश्रवणे तद्गुण-चिन्तने वा निरतो भवत्यतः तस्य मनोवृत्तिरपि शान्तरूपाऽऽनन्दमयी एव भवति । अन्येषु मार्गेषु साधनानि क्लेशदानि स्युरथापि साधकस्याऽभ्यासबलेन हितकराणि भवेयुः । भक्तिस्तु तथा न । आदौ मध्येऽन्ते चेति त्रिष्वपि स्तरेषु सा शान्तिरूपा सती आनन्दमय्येव भवति । अतो भक्तेः स्वरूपज्ञानमपि सुगमं सुकरं च वर्तते । एवं च अनुभवगम्यप्रेमरूपत्वेन भक्तेः अनुष्ठानं इतरसाधना-नुष्ठानापेक्षया सुकरमिति सुस्पष्टम् ।

## १६. साधकव्यवहारविधिः

### लोकहानौ चिन्ता न कार्या निवेदितात्मलोकवेदत्वात् ।।६१।।

लोकव्यवहारभङ्गं लाभालभौ वा साधको न चिन्तयेत् । यतः पूर्वमेव लोकचिन्तायाः शास्त्रचिन्तायाश्च त्यक्तत्वात् । वैदिककर्मणः संन्यस्तत्वात् । सर्वस्याऽपि भगवत्येव अर्पितत्वाच्च ।

११७. भक्तो लोके स्वयोगक्षेमनाशः स्यादिति न चिन्तयेत् । सर्वदा भगवच्चिन्तननिरतः स्यात् । इत्युक्तं श्रुत्वा अत्र केचन व्यवहारप्रियाः विप्रलपन्ति । किमर्थं भगवच्चिन्तनम् ? तद् वृथैव । दिवास्वप्नायितं तत् । लोके कश्चिदपि कर्माण्यकुर्वन् तूष्णीमलसो भूत्वा न तिष्ठेत् । सर्वोऽपि यत्किञ्चिदपि कर्म कुर्वन्नेव वर्तेत । अन्यथा जीवनं मुधा अपगच्छति इति । अन्ये वदन्ति - लोकव्यवहारमनासक्त्या निर्वर्तयन्नेव पुरुषस्तिष्ठेत् । न तु भक्तिव्याजेन अकर्मण्यतारूपमालस्यं

समाश्रयेत । तत् समाजस्य राष्ट्रस्य च द्रोह एवेति । परं तु एते राष्ट्राभिमानित्वेन आत्मानं मन्यमाना वेषधारिणो नास्तिका एव भवन्ति । एवमाक्षेप्तारः इदानीन्तने काले बहवो वर्तन्ते । किं तु परमार्थस्थितिः का ? किं सफलम् किं व्यर्थम् ? किं दुष्करम् किं सुकरम् ? समाधानेन तूष्णीमवस्थानं कष्टं वा ? कार्यमग्नता कष्टतरा वा ? तथ्यतो लोकहितं किं ? एतत्सर्वं विचारेण निश्चेतव्यम् ।

*न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।*
*कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ (गी. ३-५)*

इति भगवदुक्तिप्रकारेण सामान्यजनानां तूष्णीमासितुं न शक्यत एव । प्रकृतिसम्भवाः सत्त्वरजस्तमोगुणाः जनानामनपेक्षायामपि तान् यस्मिन्कस्मिन्नपि कर्मणि व्यापारयित्वा बलात् कार्यमग्नान् कुर्वन्ति । एकस्मिन् ग्रामे कश्चन देवालय आसीत् । तत्र कर्मचारिणो बहवो जना आसन् । तेषां बृत्त्यर्थं देवालयतः वेतनप्रबन्धः कृत आसीत् । तेषु एकस्मै ब्राह्मणाय सः तपस्वीति कृत्वा प्रतिदिनं प्रस्थपरिमितमन्नं वेतनत्वेन दीयते स्म । स तपस्वी प्रत्यहं देवालयमागत्य एकत्राऽऽसीनः अप्रचलित एव भगवद्ध्यानं करोति स्म । तपस्विनां ब्रह्मचारिणां च सिद्धेऽन्ने संविभागोऽस्तीति शास्त्रविधिमनुरुद्ध्य तत्रत्योऽधिकारी तस्मै प्रत्यहं अन्नं दत्वा गौरवेण पश्यति स्म । एवं कतिपयवर्षेषु गच्छत्सु सोऽधिकारी स्थानात् निवृत्तोऽभवत् । तस्य स्थाने अन्यः पुरुषो नियुक्तः अधिकारी आगतः । स नूतनः अधिकारी देवालयस्य आयव्ययादिव्यवहारं परीक्ष्य अस्मै तूष्णीमासीनाय वृथा अन्नं दीयत इत्याक्षेपं कृत्वा तद्वेतनं स्थगितमकरोत् । तदा स तपस्वी सर्वाधिकारिणः समीपमागत्य मम चिरप्रवृत्तः संविभागः कुतो न दीयत इति पप्रच्छ । सोऽधिकारी प्राह - तूष्णीमासीनाय किमर्थमन्नं दातव्यम् ? इदं कर्म यः कोऽपि कुर्यात् । त्वमपि अन्यकर्मचारिवत् किमपि कर्म करोषि चेत् तदा

तुभ्यं अन्नं दीयते इति । तदा स ब्राह्मण उवाच - मम कर्म सर्वेषां सुकरमिति न मन्तव्यम् । यः कोऽपि घटिकामात्रपर्यन्तं एकत्र तूष्णीं स्थातुं शक्नोति चेत् तर्हि मम अन्नसंविभागमहं सन्तोषेण उत्सृजामि । कृपया तत्परीक्ष्य तदनन्तरमेव मम वृत्तिः व्यवस्थाप्यतामिति प्रार्थयत । ततो हसन्नधिकारी भवतु, श्वोऽहमेव तथाऽऽसीनोभूत्वा प्रदर्शयिष्यामीति तं प्रत्युक्त्वा शून्यहस्तमेव तं प्राहिणोत् । परदिने यदा वृत्तिमन्तो ब्राह्मणाः देवालये सम्मिलिताः तदा सोऽधिकारी तं तपस्विनमाहूय पश्य, एकप्रहरपर्यन्तमहं तूष्णीमिहाऽऽसे इत्युक्त्वा आसने उपाविशत् । दशनिमेषानन्तरं स ब्राह्मणः प्राह - स्वामिन्, किमिदानीं भवान् जानाति यत् तूष्णीमवस्थानं कियद्दुष्करमिति । यतो भवान् अस्मिन् दशनिमेषाभ्यन्तरे एव ग्रामविषयं देवालयविषयं आयव्ययविषयमिति किमपि किमपि मनसि चिन्तयति स्म । इति । तदा सोऽधिकारी स्वमनोगतं यथावत् विदितवतो ब्रह्मणस्य तस्य महिमानं महयित्वा, स्वकृतापराधं क्षमस्वेति प्रार्थयामास । तथा तपस्विनो वृत्तिं च स्थिरीचकार । एवं परभक्ताः भगवतश्चिन्तनयैव स्वजीवितं सर्वं यापयन्ति ।

***अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।***
***तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ (गी. ९-२२)***

इत्याश्वासनं ददाति भगवान् । किं तु परिच्छिन्नबुद्धय इह केचिल्लौकिकाः मन्यन्ते - यदस्माकं देहेन्द्रियाणि सन्ति । बुद्धिर्मनश्च विद्येते । अतो वयं कर्मविषये ज्ञानविचारे स्वतन्त्राः । अस्मदिष्टानुसारेण यत्किमपि चिन्तयामः कर्तुं च वयं प्रभवामः । अस्मद्योगक्षेमौ वयमेव निर्वहामः । इत्यहङ्कारेण परिबृंहन्ते । परं त्वस्य मतस्य अभद्रतां परिपश्यन्तो भक्ताः तादृशान् लौकिकान् नाऽनुवर्तेरन् । भगवद्वचने दृढविश्वासं कृत्वा सर्वव्यापारान् भगवतेऽर्पयित्वा स्वयोगक्षेमौ प्रति न

चिन्तयेयुः । अत एव भगवान् अर्जुनं प्रति - यथा परभक्ताः ममोपासनां कुर्वन्ति तथैव -

*यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।*
*यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।।* (गी. ९-२७)

एवं सर्वसमर्पणयोगेन त्वं पुण्यपापलेपरहितो भूत्वा मामेव प्रपत्स्यस इत्युपदिदेश ।

११८. अस्मिन् सूत्रे लोकहानावित्यस्य केचिदन्यथा व्याख्यानं कुर्वन्ति । भक्तः लौकिकजनानां योगक्षेमविषये स्वयमपि साहाय्यमाचरामीति तत्र प्रवृत्तोऽपि तेषां सुखदुःखादिचिन्तां न स्वात्मनि लेपयति । यतो भगवानेव जगत्सृष्टिलयानां कर्ताऽस्तीति सः जानाति । भगवत्कार्ये भक्ता अपि सहकारं दत्वा तद्द्वारा स्वसेवां कर्तुमवकाशं भगवानेव कल्पितवानस्तीति च ते जानन्त्येव इत्यर्थं कल्पयन्ति । नैतत्सारम् । लोकहानौ चिन्ता न कार्येति सूत्रार्थस्य विरोधात् । अपरं च प्रकरणमिदं गौणभक्तविषयमेव । न परभक्तप्रकरणम् । अतोऽस्मद्व्याख्यानुसारेण अत्र गौणभक्तस्य लोकव्यवहाररीतिमात्रावेदनाय इदं सूत्रं प्रवृत्तमित्येव कल्पयितुं युक्तम् ।

## न तदसिद्धौ लोकव्यवहारो हेयः किं तु फलत्यागस्तत्साधनं च कार्यमेव ।।६२।।

असिद्धायां भक्तौ लोकव्यवहारो न त्यक्तव्यः । किं तु कर्मफल-त्यागः कर्तव्यः तथा भक्तिसाधनानि अनुष्ठेयान्येव ।

११९. गौणभक्तिरपि कालक्रमेण सिद्ध्यति । न एकपदे । भगवत्कृपया सत्सङ्गमहिम्ना च प्राप्तव्या भवति । एवं तु भक्तावसिद्धायां विहितकर्माणि तथा जनसमाजे अनुसरणीयानि रीतिनीतिनिबन्धनानि च न

हापयेत् । शास्त्रे श्रद्धारहितः लोकनीति-व्यवस्थां अनादि्रयमाणो मनुष्यः आसुरी-सम्पदमनुजात इत्येव अवगन्तव्यः ।

भक्तिर्मनसि यावदङ्कुरीभूय परिपोषिता भवति तावत् गुरु-महत्तरेषु विनयेन वर्तितव्यम् । तथा श्रद्धा सत्यं शौचं सदाचारः इत्येतान् अप्रमादेन परिपालयेत् । आहारविहारेषु लोकव्यवस्थानियमान् सावधानेन अनुवर्तेत । शास्त्रोक्तकर्माणि सङ्गत्याग फलत्यागपुरस्सरमेव समाचरेत् । यथा यथा भक्तिरुद्भूय परिवर्धेत तथा तथा तदनुकूलानि साधनानि नियमेनाऽनुतिष्ठेत् । एवं सन्मार्गे सदाचारे च प्रवर्तमानस्य पुरुषस्य इहपरसुखानि निष्प्रत्यूहं प्रसिद्ध्यन्ति । अन्यथा स्वेच्छया प्रवर्तमानेन यावन्ति कर्माणि क्रियन्ते तैः सः संसारे निबध्यते । स्वेच्छाचारो हि अधोगतये दुर्गतये च कारणं भवति ।

## स्त्रीधननास्तिकचरित्रं न श्रवणीयम् ॥६३॥

स्त्रीणां पशुधनादीनां तथा नास्तिकानां च चरित्रं न शृणुयादेव ।

१२०. साधको भक्तिसाधनान्यनुतिष्ठन् लोकरीतिं शास्त्रनियमांश्च अनतिक्रम्य व्यवहरेदिति पूर्वमुक्तम् । भक्तिप्रतिकूलानि प्रतिबन्धकानि च कार्याणि सुतरां परिहरेत् । तत्र स्त्रीसङ्गसम्भवान् दोषान् शास्त्रेषु बहुधा वर्णयन्ति । साधकः स्त्रीणां सङ्गं न कुर्यादिति वचनं तावदास्ताम् । तत्सम्बद्धान् वार्ताकथादीनपि न शृणुयात् । यतः भक्ति-प्रतिकूलजनसङ्गत्या सत्यं शौचं दया मौनं बुद्धिः लज्जा धनसम्पदः कीर्तिः इत्येतानि क्रमशः क्षीयन्त इत्युक्त्वा सर्वज्ञः कपिलः पुनरप्याह -

*तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु ।*
*सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥*
*न तथाऽस्य भवेन्मोहो बन्धश्चाऽन्यप्रसङ्गतः ।*
*योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥* (भाग. ३-३१-३४)

स्त्रीसङ्गः तथा स्त्रीसङ्गिसङ्गश्च महत्तरं मोहमापादयति । इति । तथा मनुरपि प्रवक्ति - कामक्रोधवशः पुरुषः अज्ञः प्राज्ञो वा तं स्त्रीजनसन्निधिः उन्मार्गे प्रवर्तयतीत्युक्त्वा पुनरप्याऽऽह -

*मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।*
*बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥* (मनुस्मृ २-२१५)

गृहस्थः पुरुषः मात्रादिभिरपि स्त्रीभिः समं एकान्ते न एकाकी तिष्ठेदित्यवोचत् । न तावदेवेति मन्तव्यम् । चित्ताकर्षकसुन्दरस्त्री-चित्रप्रेक्षणमपि अपायमापादयति । अतः सर्वथा स्त्रीसङ्गलम्पटत्वं परिहापयेत् । एवमेव धनसंबन्धी विषयः चिन्तनीयः । यथोक्तम् -

*प्रायेणाऽर्थाः कदर्याणां न सुखाय कदाचन ।*
*इह चाऽऽत्मोपतापाय मृतस्य नरकाय च ॥*
*यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ।*
*लोभः स्वल्पोऽपि तान् हन्ति श्वित्रो रूपमिवेप्सितम् ॥*

(भाग. ११-२३-१५, १६)

विचार्यमाणे अर्थः लोभिपुरुषाय किमपि सुखं न ददाति । इह जीवितकाले नानाविधचिन्तामुत्पाद्य तं परितापयति । मरणानन्तरं च नरकमेव प्रापयति । ईषन्मात्रमपि धनलोभः स्याच्चेत् सः कीर्तिमतां कीर्तिं गुणवतां गुणं च श्वित्ररोगः सुन्दरं रूपमिव विघटयति । किं च -

*अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये ।*
*नाशोपभोग आयासस्त्रासश्चिन्ता भ्रमो नृणाम् ॥*
*स्तेयं हिंसाऽनृतं दम्भः कामः क्रोधः स्मयो मदः ।*
*भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥*
*एते पञ्चदशाऽनर्था ह्यर्थमूला मता नृणाम् ।*
*तस्मादर्थमनर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥* (भाग. ११-२३-१७ तः १९)

अप्राप्तस्य धनस्य संम्पादने, प्राप्ते द्रव्ये तदभिवृद्धौ, तद्भोगे तद्व्यये तथा तन्नाशे च मनुष्यस्य बह्वायासो भयं च भवति । अर्थमूलाः दोषाः - चिन्ता भ्रमः स्तेयं हिंसा अनृतं दम्भः कामः क्रोधः गर्वः मदः भेदबुद्धिः वैरं अविश्वासः स्पर्धा नानाविधव्यसनानि, एते पञ्चदश दोषाः अर्थनिमित्तेन जनानां सम्भवन्ति । अतोऽर्थं न चिन्तयेत् । तद्वार्ताकथामपि नाऽऽकर्णयेत् । स्त्रीसङ्गिसङ्गवत् धनिसङ्गि-सङ्गेनाऽपि अनर्थः समापततीति विज्ञाय साधकः धनवतां चरित्र-मपि न शृणुयादिति ।

एवं नास्तिकसङ्गं न कुर्यात् । तच्चरित्रं न शृणुयात् । ये वेदधर्मनिन्दकाः ते नास्तिका उच्यन्ते । ते ईश्वरास्तित्वं नानुमन्यन्ते, शास्त्रप्रामाण्यमपवदन्ति । अतस्ते श्रेयोमार्गपरिपन्थिनः । तेषां श्रद्धा-भक्तिरहितानां सङ्गं न कुर्यात् । तैः सह वार्ताकथालापं परिवर्जयेत् । तच्चरित्रं च न शृणुयात् । एतत्त्रयश्रवणदोषपरिहाराय भगवत्कथा-श्रवणमेव भेषजम् । सत्सङ्गेन भगवत्कथाश्रवणलाभः तेन च सर्वसङ्गदोषनिवृत्तिः भवतीति पूर्वं १७ सूत्रे अभिहितमस्ति ।

## अभिमानदम्भादिकं त्याज्यम् ॥६४॥

१२१. अत्रोक्ता अभिमानादयः कुत्रत्या इति निश्चेतुं क्लिष्टमस्ति । भक्तिप्रतिबन्धकाः आसुरसम्पद्धर्माः इति सामान्येन ग्रहणे,

*दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।*
*अज्ञानं चाऽभिजातस्य पार्थ सम्पदमासुरीम् ॥* (गी. १६-४)

इति श्लोकोक्ताः ये दम्भादयो दोषाः, तान् त्यजेदिति सूत्रार्थः पर्यवस्यति । अस्मिन् पक्षे सूत्रोक्तः शब्दः गीताषोडशाध्यायवर्णिता-सुरसम्पदां उपलक्षणमिति गृहीतुं शक्यते । ततश्च इमान् दोषान् वर्जयित्वा एतत्प्रतिपक्षभूताः दैवीसम्पद्रूपाः ये गुणाः -

*अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।*
*दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ।।*
*अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।*
*दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।।*
*तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।*
*भवन्ति सम्पदं दैवीमभिजातस्य भारत ।।* (गी. १६-१-३ तः ५)

इत्येतैः श्लोकैः विवृताः दैवीसम्पदाख्याः, तानेतान् साधनाभ्यासेन सम्पाद्य आसुरस्वभावं त्यक्तुं प्रयतेत इत्यभिप्रायो भवति ।

अथवा अभिमानदम्भादिकमित्यनेन गीतात्रयोदशाध्यायोक्तानि यानि अमानित्वमदम्भित्वमित्यारभ्य तत्त्वज्ञानार्थदर्शनमिति पर्यन्तं ज्ञानसाधनानीत्युक्तानि, तद्विरुद्धानि मानित्वदम्भित्वादीनि गृहीत्वा, तानि त्यजेदिति सूत्रार्थो वर्णनीयः ।

अथवा आपस्तम्बाचार्याः स्वे धर्मसूत्रे भूतदाहीया गुणाः इति यान् परिगणयन्ति, यथा

*क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो*
*मृषोद्यम् अत्याशा परीवादोऽसूया काममन्यू*
*अनात्म्यम् अयोगस्तेषां योगमूलो निर्घातः ।* (आ.ध. १-२३-५)

इत्येतान् वा परिगृह्य सूत्रार्थो वाच्यः । इत्थं च राजसतामसगुणसम्भवान् चित्तधर्मान् दूरीकुर्यादिति सूत्रस्याऽभिप्रायः ।

## तदर्पिताखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम् ।।६५।।

१२२. यदेतत्पर्यन्तं अवबोधितो यो दुष्टचित्तवृत्तित्यागः सद्गुणाभ्यासश्च एषो भक्ताचारः सोऽनुष्ठातुं न सुकरः । विवाहानन्तरं

उन्मत्तताया मोक्षः, उन्मत्ततामोक्षानन्तरं विवाह इति लोकाभाणकवत् दुर्वृत्तित्यागः सद्वृत्तिप्राप्तिरिति द्वयमपि परस्परसापेक्षं भवति । अतोऽस्मिन् विषये भक्त्याचार्याः कञ्चन उपायमुपदिशन्ति । काम-क्रोधादीनां त्यागो दुष्करोऽपि तान् तस्मिन्भगवत्येव कुर्याद्यदि तर्हि तत्कृता दोषाः स्वयमेव नष्टाः भवन्ति । अदुष्टाः सम्पद्यन्ते । व्रजगोपिकाः श्रीकृष्णसमीपं जारबुद्ध्या आगताः इत्यतः ताः कथं गुणत्रयेण मुक्ता अभूवन्निति राज्ञः परीक्षितः प्रश्नस्य योगीश्वरः शुकः एवं प्रत्युत्तरमाह -

*उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ।*
*द्विषन्नपि हृषीकेशं किमुताऽधोक्षजप्रियाः ।।*
*कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ।*
*नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ।।* (भाग. १०-२९-१३, १५)

हे राजन्, शिशुपालो भगवति द्वेषं कुर्वन्नेव परमपुरुषार्थं प्राप्तो यथेति पूर्वमेव अकथयं किल । एवं तर्हि भगवति प्रेम कुर्वतीनां तासां श्रेयस्सिद्धिरासीदित्यत्र कः सन्देहः ? आश्चर्यं च किम् ? अव्ययोऽ प्रमेयो निर्गुणोऽपि सन् भगवान् मनुष्याणां निःश्रेयसार्थाय अत्राऽवतीर्णः । एवं सर्वाश्चर्यमये श्रीहरौ कामं क्रोधं भयं स्नेहं तथा सद्भावं नित्यं कुर्वतां जनानां ते कामादयो भगवन्मया एव भवन्तीति समाधानमाह ।

भगवतो दिव्यमङ्गलरूपदर्शनेच्छा यद्यपि कामः स्यात् तथापि स कामः भगवति कृत इति स्वभावं त्यक्त्वा भगवन्मय एव स्यात् । एवमेव हे भगवन्, त्वं दयामय इति सत्यं चेत्तर्हि कुतो मेऽद्यापि प्रसन्नो न भवसीति कृतः कोपः स्वदोषं परित्यजति । अहं भगवतो दासः, ममाऽन्येन किं स्यादिति कृतोगर्वः स्वदोषं वर्जयति । अहो, अहं महापापः, अतो भगवान् येन केनापि रूपेणाऽऽगत्य मां दण्डयेदिति जातं भयं, तस्य सर्वव्याप्तत्वमेव दृढीकृत्य भयमेव भीषयति । भगवान् सर्वस्याऽपि सखा अस्ति, सः मित्रस्य मम दोषान् न गणयेदिति स्नेहभावो वर्धते

चेत् सः तत्समीपप्रापणायैव कारणं भवति । सर्वान्तर्यामिणि भगवति ममान्तरङ्गरहस्यनिवेदने का लज्जा, तमेव शरणं गच्छामीति मैत्री । स मित्रभावो दृढो भवति चेत् सर्वे दोषाः प्रशमं यान्ति । अत एवं कामक्रोधादीन् मनुष्यादौ अकृत्वा भगवत्येव विधास्याम चेत्, ते अस्माकं कमप्यपायं कर्तुमशक्ताः सन्तः सात्त्विकभावाभिवृद्धये एव कारणभावमापन्नाः पर्यन्ते भगवद्भक्तिरूपेणैव परिणंस्यन्ति ।

## त्रिरूपभङ्गपूर्वकं नित्यदास्यनित्यकान्ताभजनात्मकं प्रेम कार्यं प्रेमैव कार्यम् ॥६६॥

त्रीणि रूपाणि विघटय्य नित्यदास्यरूपं नित्यकान्ताभजनात्मकं वा प्रेम कुर्यात्, प्रेमैव कुर्यादिति ।

### त्रिरूपभङ्गो नाम

१२३. लौकिकानां भक्तिः गौणभक्तिः । सा त्रिप्रकारा भवति । भय भक्तिः सकामभक्तिः परिच्छिन्नभक्तिः इति । प्राकृता जनाः भयेन भक्तिं कुर्वन्ति । यत् ते मन्यन्ते - देवो नाम भयङ्करं रूपं धृत्वा अन्तर्धानेन तिष्ठति । तं नोपास्महे चेत् सः अस्माकं अरिष्टं विधास्यति । इतिमत्वा सामान्या जनाः तं अनुकूलयितुकामाः देवसेवां कर्तुं व्यवस्यन्ति । आत्मनः स्वकुटुम्बवर्गस्य च काऽपि विपत् मा भूत्, सः सर्वतो भयाद्रक्षतु इति देवताराधनं कुर्वन्ति । तत्रापि अतीवप्राकृतजनाः काली, मारी, यक्षिणीति स्वबुद्धिकल्पितदेवताः रक्तबलिदानादिना समर्चन्ति । स्वकृतार्चनेन तुष्टा देवता कमप्युपद्रवं न करोतीति विश्वसन्ति । एषा भयभक्तिः यतो हि भक्तिशब्दस्य अनर्हा । भक्तिर्नाम प्रेम भवति । यत्र प्रेम भवति तत्र भयस्य क्व अवकाशः ? एवं च भयकृतायां पूजायां भक्तिशब्दो भाक्त एव ।

तत्रैवाऽन्यः प्रकारः - धैर्यस्वभावाः केचन जनाः न कस्मादपि

बिभ्यति, अथापि देवताप्रसादेन स्वेष्टार्थाः सिद्ध्यन्तीति विश्वस्य स्वमनसि कामनाः सङ्कल्प्य विविधोपचारैः देवताः आराधयन्ति । ते मन्यन्ते यद् देवो नाम स्वसकलेष्टार्थान् पूरयितुं समर्थः सार्वभौमो राजेव निरतिशयमहिमसम्पन्नः कश्चन दिव्यशक्तिमानिति । स देवः अस्य यज्ञस्य ईदृशं फलं दास्यति, ईदृश्या सेवया अस्माकं मरणोत्तरं कल्पवृक्षः कामधेनुः नन्दनोद्यानं इत्यादि सम्पत्समृद्धं स्वर्गं वितरतीति मन्यमानाः स्वमनोरथसिद्धये भगवत्पूजादिषु प्रवर्तन्ते इति एषा सकामभक्तिः । एवमिदं प्रेम क्रयविक्रयरूपं पण्यं भवति । इमामपि पूजोपासनश्रद्धां प्रेमरूपभक्तिनाम्ना व्यवहर्तुं नोचितमेव । यत्कारणम् - तथ्यतो भक्तौ आशागन्धोऽपि न सम्भवति ।

अथ परिच्छिन्नभक्तिरूपः तृतीयः प्रकारः, अस्याः लौकिक भक्तेः सातिशयरूपेत्यपि नाम । अस्यां भक्तौ भगवति परिच्छिन्नत्वं कल्पितं भवति । भगवान् नाम दूरे परोक्षे ईदृशगुणवान् ईदृग्रूपः एतन्नामवान् सर्वज्ञः सर्वशक्तोऽमुष्मिन् लोके पत्नीपुत्रादिपरिवारसहितो वर्तते । सः विश्वकुटुम्बीति भावनया तदुपासनमेव सातिशयभक्तिः । यतो अस्याः भक्तेरन्या अतिशयिता भक्तिर्विद्यते । अत्राऽपि कामना भवतीत्यतः एषाऽपि पण्यव्यवहारवदेव भवति । अथाऽपि उक्तेषु त्रिषु प्रकारेषु इयमुत्तमा स्यात् । यतः प्रथमं ईदृशभावनया कृताऽपि भक्तिः क्रमेण उत्कर्षं प्राप्ता सती, स सर्वज्ञः सर्वशक्तो भगवान् यतोऽतः स्वेच्छया भक्तजनकल्पनानुगुणमाकारं स्वीकृत्य निर्दिष्टस्थाने स्थितोऽपि सर्वशक्तत्वादेव सर्वव्यापी सन् सर्वस्याऽप्यात्मा भवतीति विद्याभ्यासक्रमेण प्रत्यभिज्ञायते । अतस्तस्य नामरूपगुणस्थाननिर्देशादिकं सर्वं कल्पितमेवेत्यवगम्यते । यद्यपि भगवत्प्रदक्षिणं तीर्थयात्रा नामगुणसङ्कीर्तनमित्यादिभिः साधकः धन्यो भवति, तथापि तत्र भगवत्स्वरूपे परिच्छिन्नत्वबद्धिः अगत्या क्रियमाणाऽपि तत्त्वतः सा न युक्ता

भवति । अतः सोऽपराध एव । अतश्चैवंप्रकारेण कृताऽपि भक्तिः मुख्या न भवतीत्यतः एषाऽपि गौणभक्तिरेव ।

एवं भयकामपरिच्छिन्नत्वबुद्धिरूपां त्रिप्रकारामतिक्रम्य परभक्ताः परमप्रेमरूपामेव भक्तिं कुर्वन्ति । तत्र न भयं न कामो न परिच्छिन्नत्व-बुद्धिर्वा । गौणभक्तोऽपि स्वयोग्यतानुगुणं भगवन्तमाराध यन् हे भगवन्, मत्कृतैषा भक्तिर्न परमा । तव यथार्थमहिमानं विज्ञाय यथाऽहं निजप्रेमरूपां भक्तिं कर्तुं शक्नोमि तथा मामनुगृहाण इति प्रेममात्रं प्रयाचेत । एवं च गौणभक्तेः त्रिप्रकारां अतिक्रम्य पर भक्तावेव साधकः प्रयत्नं कुर्यादिति ।

अथवा त्रिरूपभङ्गपूर्वकमित्यस्य प्रकारान्तरेण व्याख्या स्यात् । लौकिकप्रेम्णि प्रेमकर्ता प्रेमविषयः प्रेम चेत्येवं त्रिपुटी विभाव्यते । अतः साधकस्य प्रेम यावत्प्रमाणं वा भवतु, तत् परिच्छिन्नरूपमेव स्यात् । एवं परिच्छिन्नत्वरहितत्वमेव त्रिरूपभङ्गः । तथा प्रेम कुर्यादित्यर्थः । ममेदं प्रेम, प्रेमकर्ता अहं, प्रेमविषयो भगवानिति यथा विभागो न विभाव्येत तथा प्रेम्ण्येव ऐकरूप्यमासाद्य समन्तात् भगवानेव स्थित इति अपरोक्षसिद्धिरेव परमं प्रेमेति । अतः एवं प्रेमकर्ता इत्यादि त्रिरूपमतीत्य केवलं प्रेमकुर्वाणः प्रेममय एव स्यादिति सूत्रार्थः ।

## प्रेमार्थं प्रेम इति कीदृशम्

१२४. प्रेमार्थं प्रेमकरणमितीदं परभक्तानामेव साध्यम् । अथापि अन्येषामपीदं अवगमयितुं सुत्रे द्वौ दृष्टान्तावुपात्तौ ।

तत्र प्रथमो दृष्टान्तः नित्यदास्यमिति । पूर्वं कदाचन केचन धनिकाः मनुष्यान् मौल्येन क्रीत्वा तान् स्ववशे नित्यदास्ये निदधति स्म । तादृशा दासाः गर्भदासाः स्युः । एते नित्यदासाः सर्वदा गोमहिष्यादिवत् यजमानाधीना एव । अद्यतने कालेऽपि यः कोऽपि यां काञ्चिद् गां

क्रीणाति चेत् सा गौः यजमानगृहे गोष्ठे प्रतिवसन्ती स्वामिना चारितान् तृणादीन् खात्वा क्षीरं शकृदादीन् च उत्पाद्य स्वामिने दत्वा तद्गृहभागं स्वस्थानमेव स्वगृहमिति मन्यते । तथैव तदात्वे गर्भदासाः स्वस्वामिन उपयोगाय स्वजीवितमेव न्यासीकृत्य निःस्वार्थं स्वामिनं सेवन्ते स्म । गर्भदासार्भका अपि तद्गृहीयाः एवेति परिगण्यन्ते स्म । स स्वाम्यपि दासस्य तज्जनस्य च योगक्षेमं स्वयं निर्वहति स्म । स्वामिनं मुक्त्वा दासस्य पृथक् स्वकीयं जीवितमेव नाऽसीत् । दासस्य स्वामिनश्च कुटुम्बमेकं अभिन्नमित्येव उभयोर्भावना प्ररूढा भवतिस्म । एवमेव यो भक्तिं कर्तुं प्रयतते, सः भगवतोऽहं नित्यदासः, गर्भदासोऽस्मि । मम स एव गतिः । मदीयं नेह किञ्चनाऽस्ति । मम योगक्षेमयोः स एक एवाऽऽधारः इति विश्वस्य तस्मिन् नित्यं प्रेम कुर्वन् जीविते स्वत्वमत्यन्तं जह्यात् । एषा नित्यदास्यासक्तिरिति ।

अथ नित्यकान्ताभजनदृष्टान्तेन ग्रहीतव्योंऽशः क इति चेत्-सद्गृहिणी एव दृष्टान्तः । या कुलधर्मपत्नी सा पाणिग्रहणादारभ्य स्वपतिरेव स्वसर्वस्वमिति मत्वा, पतिसुखमेव स्वसुखमिति तेन सह ऐक्यमापन्नेव साध्वीवर्तनं कुरुते इतीदं लोकप्रसिद्धम् । सा साध्वी स्वजन्मगृहे स्वमातापितृसेवायाः अप्यधिकोत्साहेन पतिगृहकुटुम्बभरणं कुर्वती कालं यापयन्ती सती स्वव्यक्तित्वं तस्मिन्नेव कुटुम्बे विलीनं करोति किल । तथैव भक्तः प्रेम्णा भगवन्तं भजमानः भगवत्प्रेमैकं मुक्त्वा स्वजीवितस्य नाऽन्यद्ध्येयमस्तीति भावनां दृढीकुर्यात् । इयं नित्य कान्तासक्तरिति ।

एवं दृष्टान्तद्वयेऽपि स्वार्थस्वत्वविरहात् क्रियमाणं प्रेम प्रेमार्थं मेवेति अवसीयते ।

नित्यदास्यभावनायाः नित्यकान्तासक्तिभावनायाश्च निदर्शनानि पुराणेतिहासादिषु बहुशः समुपलभ्यन्ते । तत्र तावद् रामायणं दृश्यताम् ।

श्रीरामो लङ्कायाः अयोध्यां प्रत्यावर्तनानन्तरं राज्येऽभिषिक्तः सन् एकादशसहस्रवर्षपर्यन्तं राज्यं प्रशास्य तदनन्तरं महाप्रस्थानयात्राकाले बन्धुमित्रादिभ्यो यथोचितसन्देशादिकं प्रदाय ततो मारुतिं सम्बोध्य भोः धीर हनूमन्, मम त्वत्कृतोपकारं प्रति तुभ्यं कथमहमुपकरोमि ? अथवा त्वांमुपकरिष्यामीति अहं उद्दिशामि चेत् तवापि बलवत्तरा विपदाविर्भवत्विति अमङ्गलमाशासानो भविष्यामि । अतो मया तव उपकारप्रसक्तिरेव मा भूदित्याशासे इत्याह किल । तदा स मारुतिरपि स्वेष्टार्थं यथा प्रार्थयते स्म, तदपि सदा संस्मरणार्हमस्ति ।

*यावत्तव कथा लोके विचरिष्यति पावनी ।*
*तावत् स्थास्यामि मेदिन्यां तवाऽऽज्ञामनुपालयन् ॥* *(रा. उ. १०८-३६)*

इत्यमुं वरं सम्प्राप्य परभक्तो हनूमान् धन्योऽभवत् ।

एवमेव नित्यकान्तासक्तिविषये जगन्मातरं सीतादेवीं दृष्टान्तत्वेन संस्मरेत् । श्रीरामस्य पाणिग्रहणादारभ्य अयोध्यायां रामेण सह संवसन्ती, वनवासकाले रावणराक्षसेन अपहृता सा तन्निमित्तेन वियोगदुःखमनुभूय, तदन्ते रावणादिसंहारानन्तरं अयोध्यां पुनरागत्य श्रीरामस्य राज्येऽभिषेकानन्तरं सुखे दुःखे च श्रीराममेव अनुवर्तमाना तदन्यविषयं किञ्चिदपि सा महामाता मनसि नाऽचिन्तयत् । सूर्ये छायादेवीव सा श्रीराममेव नित्यमन्ववर्तत । इत्थं नित्यानुवर्तनमेव नित्यकान्तासक्तिरिति ।

एवं नित्यदास्यासक्तिः नित्यकान्तासक्तिरित्येकतरविधभक्ति-तत्परतासिद्ध्ये प्रयतमानस्य भक्तस्य त्यक्तत्रिरूपं प्रेमैव जीवनं भवति ।

## द्विरुक्तेरभिप्रायः

१२५. गौणभक्तेः विवरणमत्र अवसितमिति सूचनाय सूत्रे प्रेम कार्यं प्रेमैव कार्यमिति द्विरुक्त्या उपसंहृतम् । इतः परमपि कानिचिद्

भक्तिसाधनानि वक्ष्यन्ते । अथापि षट्पञ्चाशत्तमसूत्रादारभ्य यत्प्रस्तुतं गौणभक्तिप्रकरणं तत् समाप्य पुनश्चेदानीं मुख्यभक्तिविषयं विवृणुमः इति सूचनमस्ति अस्यां द्विरुक्ताविति ।

## १७. मुख्यभक्ताः

### भक्ता एकान्तिनो मुख्याः ।।६७।।

नियतभक्तियुक्ताः भक्ताः मुख्यभक्ताः परभक्ताः इति चोच्यन्ते ।

१२६. पूर्वं ५६ तमे सूत्रे निरूपिताः गौणभक्ताः अपि अन्यकर्मिभ्यः प्रशस्यतरा एव । परं तु गीतासु -

***तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।***
***प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।।***
***उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।***
***आस्थितः स हि युक्तात्मा मामेवाऽनुत्तमां गतिम् ।।***

*(गी. ७-१७, १८)*

एषु चतुर्षु ज्ञानी नित्यनिरन्तरं मय्येव मन आदधाति । अतः सः विशिष्यते । तस्याऽहं प्रियः । सोऽपि ममाऽत्यन्तं प्रियः । तस्य मत्तोऽन्यत्किञ्चिद्भजनीयं न विद्यते । आर्तादयो यद्यपि प्रशस्यतरा एव । परं तु ज्ञानी मम आत्मैव भवति । सः मामेव अनुत्तमां गतिं मन्यते । इति भगवानाह ।

यद्यप्यार्तभक्तस्य अर्थार्थिवद्वा जिज्ञासुवद्वा भगवद्भजने अन्यत् निमित्तं न भवति । तथापि तस्य भगवत्स्वरूपज्ञानं न भवति । तस्य भगवान् यदा तत्त्वज्ञानमनुगृण्हाति तदा सः भक्तेर्महत्त्वं अवगच्छति । ज्ञानीभक्तस्तु स्वभावेनैव श्रीहरौ अनन्यप्रवणं प्रेम लब्धवान् भवति । महाभारते च एकान्तिभक्तानां महिमा प्रशंसित इत्थम् -

*अहो ह्येकान्तिनः सर्वान् प्रीणाति भगवान् हरिः ।*
*विधिप्रयुक्तां पूजां च गृण्हाति भगवान् स्वयम् ॥*
*ये तु दग्धेन्धना लोके पुण्यपापविवर्जिताः ।*
*तेषां त्वयाऽभिनिर्दिष्टा पारम्पर्यागतागतिः ॥*
*चतुर्थ्यां चैव ते गत्यां गच्छन्ति पुरुषोत्तमम् ।*
*एकान्तिनस्तु पुरुषा गच्छन्ति परमं पदम् ॥*
*नूनमेकान्तधर्मोऽ यं श्रेष्ठो नारायणप्रियः ।*
*अगत्वा गतयस्तिस्रो यद्गच्छन्त्यव्ययं हरिम् ॥*
*सहोपनिषदान् वेदान् ये विप्राः सम्यगास्थिताः ।*
*पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः ।*
*तेभ्यो विशिष्टां जानामि गतिमेकान्तिनां नृणाम् ॥*

*(मो.ध. ३४८-१-५ तः ५)*

एकान्तिभक्तानां धर्मोत्कर्षं महिमवर्णनं च श्रुत्वा हर्षोत्पुलको राजा जनमेजयः विस्मयवचनान्येवमुद्गिरति - अहो, एकान्तिभक्तान् इमान् प्रीणाति भगवान् । तैः विधिवत्कृतां पूजां प्रीत्या स्वयं स्वीकरोति किल । त्वया तावत् भर्जितमनोवासनानां पुण्यपापरहितानां जनानां - उत्तमगतिः अभिवर्णिता । परं तु ये एकान्तिभक्ताः ते तुरीयगतिं पुरुषोत्तमं नाम परं धाम प्राप्नुवन्ति खलु । अतो नारायणप्रियोऽयं एकान्तधर्मः नूनं सर्वश्रेष्ठ इत्यहमवगच्छामि । यतः एकान्तिनः तिस्रो गतीरतिक्रम्य साक्षात् अव्ययं श्रीहरिमेव प्रपद्यन्ते । ये उपनिषत्सहितान् वेदानधीत्य सम्यग्धर्मानुष्ठानं कुर्वन्ति विप्राः, ये ध्यानयोगारूढाः ये च स्वधर्मनिष्ठाः संन्यासिनः, तैः प्राप्याभ्यो गतिभ्योऽपि एकान्तिभिः प्राप्या गतिः समधिकेति अहं भावयामि । इति ।

**कण्ठावरोधरोमाञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथिवीं च ।।६८।।**

१२७. इदानीं एकान्तिभक्तलक्षणानि तन्महिमप्रकर्षं च वर्णयति । यच्छ्रवणेन भक्तिमार्गे प्रयतमानानां साधकानां मुख्यभक्तेषु आदरः सञ्जायेत । ततश्च तान् अनुकृत्य साधनानुष्ठाने श्रद्धा विवर्धते इति ।

*कथं विना रोमहर्षं द्रवता चेतसा विना ।*
*विनाऽऽनन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाऽऽशयः ।।*

(भाग. ११-१४-२३)

रोमाञ्चं चित्तद्रुतिं आनन्दबाष्पं च विना क्व भक्तिः ? भक्त्या विना कथं चित्तशुद्धिः ? इति भागवतोक्तरीत्या परभक्ताः सहजेनैव भक्त्युद्रेकेण पुलकाञ्चिताः परिशुद्धचित्ताश्च भवन्ति ।

*वाग्गद्गदा द्रवते यस्य चित्तं*
*रुदत्यभीक्ष्णं हसति क्वचिच्च ।*
*विलज्ज उद्गायति नृत्यते च*
*मद्भक्तियुक्तो भुवनं पुनाति ।।* (भाग. ११-१४-२१)

प्राप्तभगवद्रतेः भक्तस्य वाणी गद्गदस्वरा भवति । सः कदाचित् रोदिति । जातुचित् हसति । क्वचित् नृत्यति । एकदा मुक्तलज्जः उच्चैर्गायति । एतादृशेन भक्तेन भूतलमेव पवित्रितं भवतीति भागवते एकत्र परभक्तलक्षणं वर्णितमस्ति । अन्यत्र च -

*स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।*
*भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ।।*
*क्वचिद्रुदन्त्यच्युतचिन्तया क्वचित्*
*हसन्ति नन्दन्ति वदन्त्यलौकिकाः ।*

*नृत्यन्ति गायन्त्यनुशीलयन्त्यजं*
*भवन्ति तूष्णीं परमेत्य निर्वृताः ॥* (भाग. ११-३-३१)

पापराशिमपहर्तारं श्रीहरिं स्वयं संस्मरन्तः अन्येषामपि स्मारयन्तः भक्त्युभ्दूतया भक्त्या आनन्देन रोमाञ्चमनुभवन्ति । लोकातिक्रान्तवर्तनाः ते भगवच्चिन्तया क्वचिद्रुदन्ति । कदाचिद्धसन्ति । जातुचिन्नन्दन्ति । एकदा नृत्यन्ति । अन्यदा गायन्ति । जन्मरहितं परमात्मानं मुहुर्मुहुः अभिमृशन्ति । एवं भगवन्तं निरन्तरं चिन्तयन्तः परमानन्देन सन्तुष्टाः सन्तः मूकवत्तिष्ठन्ति । इति ।

भगवद्गीतासु प्रोक्तं यत् गौणभक्ताः परभक्तानेव अनुकुर्वाणाः एवमेवाऽऽचरन्तीति । तेभ्यो भगवान् स्वयमेव तत्त्वज्ञानमनुगृण्हातीत्यस्य इदमेव कारणमिति प्रसङ्गत उक्तम् ।

***मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।***
***कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥*** (गी. १०.९)

'यदत्रोक्तं, एतावन्मात्रमेव भक्तमनोभावानां परिमिति' रिति न मन्तव्यम् । यतः -

***स्तम्भः प्रलयरोमाञ्चौ स्वेदो वैवर्ण्यवेपथू ।***
***अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः ॥***

इत्यत्रोक्ताः अवस्थाः - एकत्रैवाऽऽसनम्, प्रज्ञाराहित्यम्, गात्रपुलकः, गात्रस्वेदः, मुखवर्णविकारः, गात्रकम्पः, अश्रु, स्वरभङ्गः, इत्यष्टौ सात्त्विकभावा अपि भगवत्पराणां भक्तानां सम्भवन्तीति ज्ञेयम् ।

***कुलं पवित्रं जननी कृतार्था विश्वम्भरा पुण्यवती च तेन ।***
***अपारसंवित्सुखसागरे सदा विलीयते यस्य मनःप्रचारः ॥***

इति सूतसंहितायां (२-२१-४५) भक्तमाहात्म्यमभिवर्णितम् ।

## तीर्थीकुर्वन्ति तीर्थानि सुकर्मीकुर्वन्ति कर्माणि
## सच्छास्त्रीकुर्वन्ति शास्त्राणि ।।६९।।

१२८. तीर्थक्षेत्रेषु परमात्मनः सान्निध्ययोगात् तत्र स्नानदानादिभिः पापपरिहारो भवति, मनश्शुद्धिरपि सिद्ध्यतीति आस्तिकानां दृढ-विश्वासो भवति । वस्तुतस्तु तत्र तीर्थत्वसिद्धौ भक्तानां स्नानसन्दर्शन-सम्पर्कादिकमेव कारणमिति मन्तव्यम् ।

*भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो ।*
*तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ।।* (भाग. १-१३-१०)

द्वारकायाः प्रतिनिवृत्तं विदुरमुद्दिश्य युधिष्ठिरस्य वचनमिदम् । भवादृशाः भगवद्भक्ताः स्वयं तीर्थरूपाः विद्यन्ते । ते स्वहृदये प्रतिष्ठितस्य श्रीहरेः सान्निध्येन तीर्थानि तीर्थीकुर्वन्ति इति । परीक्षिदपि यदा गङ्गातीरे प्रायोपवेशाय सङ्कल्प्य स्थितस्तदा -

*तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ।*
*प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ।।*

(भाग. १-१९-८)

भुवनं पुनाना महानुभावा मुनयः स्वस्वशिष्यैः सह तत्र समाययुः । महात्मानस्ते तीर्थयात्राव्याजेन तीर्थानि स्वयं पावनानि कुर्वन्ति किलेति कथाप्रसङ्गतः सूतोऽकथयत् । भगवद्भक्ताः तत्र तत्र स्नानादिपवित्र-कर्मणा तस्य तस्य तीर्थस्य महिमानं वर्धयन्ति । एवं च भक्तानां तीर्थयात्रादिभिः तीर्थस्यैव गौरवं प्रथते, न तु तीर्थैः भक्तानां फलं किञ्चित् । अगस्त्यतीर्थम्, गौतमतीर्थमिति अद्यापि ऋषिनामभिः प्रसिद्धानि तीर्थान्येव तत्र निदर्शनानि सन्ति ।

स्वयं शुद्धचित्ताः भक्ताः धर्मकर्मादि कृत्वा चित्तशुद्धिं सम्पादयन्तीतीदं नास्ति । अथापि ते शिष्टाचारं पालयन्तः पूर्वैराचरितं

सदाचारमेव अनुवर्तमाना आसते । एते ते महनीयाः अत्रैतानि कर्माणि कृतवन्तः इतीमां पुराणोक्तिं श्रुत्वा अथवा भक्तकृतकर्माणि दृष्ट्वा अन्येऽप्यद्यतना जनाः स्वयमपि तेषु कर्मसु प्रवर्तिष्यन्ते । यतः -

*यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।*
*स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥* (गी. ३-२१)

इह श्रेष्ठपुरुषैः आचरितान्येव जनाः अनुकरिष्यन्ति । अतो भक्ताचरितान्येव कर्माणि प्रथितानि भवन्ति ।

एवमेव महनीयास्ते यानि यानि शास्त्रवचनानि प्रमाणानीति उदाहरन्ति तानि तान्येव सच्छास्त्राणीति प्रथन्ते । महात्मानः एवं कृतवन्तः, इदं वचनं प्रमाणमिति उदाहृतवन्त इति उल्लिख्य उल्लिख्य अद्यतना जनाः तत्तत्कर्माणि सत्कर्माणीति, तानि तानि वचनानि सच्छास्त्राणीति च विश्वसन्तीतीदं प्रसिद्धमेव ।

## तन्मयाः ॥७०॥

ते परभक्ताः भगवन्मया एव भवन्ति ।

१२९. भक्तानां इदमेव तीर्थं पवित्रतीर्थम् इति, इदमेव कर्म सत्कर्म इति, इदमेव शास्त्रं सच्छास्त्रमिति च आग्रहो न भवति ।

*वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।*
*बहवो ज्ञानतपसा पूता मद्भावमागताः ॥* (गी. ४-१०)

इति भगवदुक्तिरीत्या ते भगवत्तत्त्वं सम्यगवगम्य भगवन्तमेवाऽऽश्रित्य रागभयक्रोधादीन् चित्तदोषान् सर्वात्मना परिमृज्य भगवन्मया एव भवन्ति । बाह्ये जगद्व्यवहारेऽपि तैः न कोऽपि दोषो विभाव्यते ।

*सम्पूर्णं जगदेव नन्दनवनं सर्वेऽपि कल्पद्रुमाः*
*गाङ्गं वारि समस्तवारिनिवहाः पुण्याः समस्ताः क्रियाः ।*

*वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी*
*सर्वावस्थितिरस्य वस्तुविषया दृष्टे परब्रह्मणि ।।*

महात्मनां जगदेव नन्दनवनम्, सर्वे वृक्षाः कल्पवृक्षाः, नदीजलं सर्वं गङ्गाजलमेव, सर्वाणि कर्माणि पुण्यकार्याणि, संस्कृतप्राकृत-वाङ्मयं सर्वं वेदान्तरूपमेव । समग्रा पृथिवी काशीक्षेत्रम् । बहुना किमुक्तेन । ते यस्यां कस्यामप्यवस्थायां स्थिता अपि परतत्त्वानुभवरूपं आनन्दमेव निर्विशन्ति । अतस्ते परमपावनाः । तेषां महिमा अन्यानपि जनान् पूतान् कर्तुं प्रभवतीत्यत्र किमाश्चर्यम् ?

**मोदन्ते पितरो नृत्यन्ति देवताः सनाथा**
**चेयं भूर्भवति ।।७१।।**

ईदृशान् भक्तान् दृष्ट्वा पितृदेवताः हृष्यन्ति । वस्वादयो देवाः हर्षेण नाट्यं कुर्वन्ति । न भूमिरनाथा, किंतु सनाथा भवति ।

१३०. अत्र यः कोऽपि एवमाक्षेपं चोदयेत्-

***जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारि-वासी ।*** ***(तै.सं. ६-३-१०-५)***

इति हि श्रूयते । जातमात्रो ब्राह्मणः प्रत्येकं त्रिभिः ऋणैः बद्ध एव वर्तते । तत्र ब्रह्मचारी सन् वेदशास्त्राध्ययनेन ऋषिऋणात् आत्मानं मोचयेत् । यज्ञयागादिकर्मानुष्ठानेन देवर्णं अपाकुर्यात् । पुत्रानुत्पाद्य पितृऋणात् मुच्यते । एवं शास्त्रे स्थिते ऋणत्रयं अनपाकुर्वन्तो भक्ताः कथं श्लाध्यपदमर्हन्तीति । किं च स्मृतिरपि -

***ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । इति । (म.स्मृ. ६-३५)***

एवं च ऋणत्रयविमोचनेन विना कथं पुरुषार्थसिद्धिरिति ।

अस्याऽऽक्षेपस्य समाधानमुच्यते । ब्रह्मचर्ये च शास्त्राध्ययनविषये यद्वक्तव्यं तत् पूर्वमेवोक्तम् । तथाहि - सर्वात्मनि भगवति तत्परेभ्यो भक्तेभ्यः केऽन्ये अधिकाः ब्रह्मचारिणो भवेयुः ? भक्तानां वार्ताकथालापाः एव शास्त्राणि भवन्तीत्युक्तम् । किं च तेषामेव अनुमोदनेन शास्त्राणि सच्छास्त्राणि भवंतीति च गदितम् । यत एवं ततो भक्तानां ऋषिऋणं नास्ति ।

यज्ञयागाराधनादिभिः देवर्णं अपाकर्तव्यं खलु । देवान् अनाराध्य मोक्षमार्गे प्रयतमानस्य पुरुषस्य देवा एव विघ्नमाचरन्तीति श्रूयते -

तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः । (बृ.आ. १-४-१०)

इति श्रुतिराम्नातीति चेत् - शृणु, भक्तानां परमात्मनश्च भेदो नास्तीति पूर्वं ३० तमे तथा ७० तमे सूत्रे च निदर्शितम् । ततश्च भक्ताः देवानामपि आत्मभूताः भवन्ति ।

*तस्य ह न देवाश्च नाभूत्या ईशते । आत्मा ह्येषां स भवति ।*
*(बृ.आ. १-४-१०)*

इति तयैव श्रुत्या उक्तप्रकारेण परमात्माभिन्ना भक्ताः सर्वात्मत्व-सम्पादने प्रयतन्ते चेत् तेषां विघ्नं कर्तुं देवाः न शक्नुवन्ति । भक्तानां देवाः न विघ्नं कुर्वन्तीतीदमास्ताम् । भक्तो भोजनादिभिः तृप्तो भवति चेत् स्वात्मन एव तृप्तिर्भवतीति देवाः समाधानेन सन्तुष्टाः सन्तः तादृशान् परभक्तान् दृष्ट्वा सन्तोषेण नृत्यन्ति ।

लोके आस्तिक्यभावयुक्ताः मातापितरः स्वाचरितानि कार्याणि पुत्राः अनुकरिष्यन्ति चेत् तदा स्वात्मनः पितृलोकजयसिद्धिः स्यादिति विश्वस्य सत्सन्तानं अभिलषन्ति । तद्विरुद्धं पुत्राः पित्राचारं न कुर्वन्तो मूर्खाश्चेत् तेन पितरः सन्तप्ताः सन्तः पुत्रान् शपन्ति । अतः प्रजासन्तत्या पितृऋणं अपाकुर्यादिति श्रुतिः युक्तमेवाऽऽह । परंतु भक्ताः यस्मिन् कुले जाताः तत्कुलमेव पावनं भवतीति पूर्वत्र सूत्रे अभिहितम् । किंच

विचार्यमाणे भक्ताः पितृऋणस्य न अधमर्णाः, प्रत्युत उत्तमर्णा एव भवन्तीति वक्तुमुचितम् । यत्कारणं - अस्मत्कुले अयमेकोऽपि भक्तो जात इति पितरः प्रीयन्ते । अग्निष्वात्तादिपितृदेवानामपि भक्तःआत्मभूत एव भवत्यतः तेषां सन्तोषायाऽपि सः कारणं भवति । एवं च भक्तानां पितृ ऋणं नास्त्येव । अत एव करभाजनर्षिः राजानं निमिं प्रति एवमाह -

*देवर्षिभूताप्तनृणां पितृणां न किङ्करो नाऽयमृणी च राजन् ।*
*सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्तम् ।।*

*(भाग. ११-५-४१)*

हे राजन्, यस्तु सर्वकर्मसंन्यासपुरस्सरं भगवन्तं शरणं प्रपन्नः स भक्तः देवानां ऋषीणां प्राणिनां आप्तजनानां पितृणां चेति न कस्याऽपि किङ्करो न च ऋणी इति ।

१३१. ईदृशा भक्ताः लोके तिष्ठन्तीत्येव भूमिर्धरते सनाथा च भवति । लोके कुत्राऽपि भक्ता एव न सन्तीत्येष कालो नास्ति । यदि कदाचन केनाऽपि कारणेन लोके पापमधिकं, भक्तानां बाधा च प्रभूता भवति चेत् -

*परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।*
*धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।* *(गी. ४-८)*

इति किल भगवान् प्रतिजज्ञे ।। एतावत्पर्यन्तं परभक्तानां वैशिष्ट्यमुद्गृह्य प्रशंसितेन ज्ञातव्यं किमिति चेत् -

*स्नातं तेन समस्ततीर्थसलिले सर्वाऽपि दत्ताऽवनिः*
*यज्ञानां च सहस्रमिष्टमखिला देवाश्च सम्पूजिताः ।*
*संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ*
*यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ।।*

भगवच्चिन्तने यस्य मनः क्षणमात्रमपि एकाग्रं तिष्ठति तस्य न

ततोऽन्यत्किञ्चित्कर्तव्यमवशिष्यते । तावन्मात्रेण भक्तः समस्तक्षेत्रतीर्थेषु स्नात एव भवति । समुद्रपर्यन्तसकलभूमिदानेन यत्फलं तत्फलं तस्य भवति । सहस्रयागानुष्ठानेन यत्प्राप्यं फलं तत्तस्य भवति । तावतैव सर्वे देवाः विधिवत् सम्पूजिताः स्युः । तादृशो भक्तः स्वपूर्वपितॄन् संसारनरकादुद्धृत्य तारयति । बहुनोक्तेन किम् ? त्रिलोकस्याऽपि सः पूज्यो भवति । इति अभियुक्तवचनं उद्घोषयति ।

## नास्ति तेषु जातिविद्यारूपकुलधनक्रियादिभेदः ।।७२।।

भक्तेषु जात्यादिनिमित्तकृतं वैलक्षण्यं तारतम्यं वा नास्ति ।

## यतस्तदीयाः ।।७३।।

यतस्तदीयाः, सर्वेऽपि भगवदीया एव अविशेषेण ।

१३२. भक्ताः एवम्महिमानः इति प्रथां प्राप्तुं तेषु अन्येभ्यो यत्किमपि अपूर्वं वैशिष्ट्यं स्यादिति कश्चिन्मन्येत । तथा न किमपि । उत्तमा जातिः । अनुपमं रूपम् । अद्वितीयं शास्त्रपाण्डित्यम् । उन्नतकुलप्रसूतत्वम् । अन्यदुर्लभा धनराशिः । अन्यदुष्करं कर्मानुष्ठानम् । इत्येतेषु यः कोऽपि विशेषः तेषां उत्कर्षे निमित्तं स्यादिति मूढभावनां अपवदितुं सूत्रकार एवमाह । अत्रोद्भाविताः ये केचिद्विशेषाः ते भक्तेषु न भवन्ति । तथा हि - गजेन्द्रहनूमद्विभीषणविदुरशबरीप्रभृतयः गजकपिराक्षसशूद्रकिरातकुलजाता अपि परमभक्ता अभूवन् । गजेन्द्रस्य का विद्या ? कुब्जायाः किं रूपम् ? कुचेलस्य किं धनम् ? धर्मव्याधस्य कः धर्मकर्माचारः ? इति । सूत्रस्थादिशब्देन वयःपौरुषादयो गृह्यन्ते । ध्रुवस्य किं वयः ? उग्रसेनस्य किं पौरुषम् ? इत्येते विशेषरहिता अपि भगवत्प्रियाः अभूवन्नितीदं श्लोकेऽस्मिन् सङ्गृह्योच्यते -

*व्याधस्याऽऽचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का*
*का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम् ।*

*कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनं*
*भक्त्या तुष्यति केवलं न तु गुणैर्भक्तिप्रियः श्रीहरिः ।। इति ।*

अथ उदाहृताः भागवतपुराणोक्तयोऽपि तमर्थमेव अनुमोदन्ते ।

*नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः ।*
*प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ।।*
*न दानं न जपो नेज्या न शौचं न व्रतादि च ।*
*प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम् ।।* *(भाग. ७-७-५१)*

तत्रैव पुनरन्यस्मिन् प्रकरणेऽभिहितम् -

*मन्ये धनाभिजनरूपतपःश्रुतौज -*
*स्तेजःप्रभावबलपौरुषबुद्धियोगाः ।*
*नाऽऽराधनाय हि भवन्ति परस्य पुंसो*
*भक्त्या तुतोष भगवान् गजयूथपाय ।।* *(भाग. ७-९-९)*

इति ।।

## तदीया इति

१३३. भक्तानां महत्वे जातिकुलादिविशेषाः न खलु कारणमित्युक्तम् । भक्तो यज्जातीयः, यत्कुलीनः, यद्रूपः, यावद्विद्याहीनः यावद्दरिद्रः इत्येतत्किमपि न गणयति भगवान् । जात्यादिषु एते उत्तमाः इति वा एतेऽधमाः इति वा इत्येतदपरिगणय्य प्रेम्णा ये ये भजन्ते तान् सर्वानपि सः एते आत्मीया इति सममेव पश्यति । यथोक्तम् -

*समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।*
*ये भजन्ति तु मां भक्त्या मयि ते तेषु चाऽप्यहम् ।।* *(गी. ९-२९)*

अहं सर्वेषु प्राणिषु समोऽस्मि । जीवेषु यः कोऽपि स्वतः मम

शत्रुरिति वा मित्रमिति वा नास्ति । ये मां भक्त्या भजन्ति ते मयि भवन्ति । तेषु चाऽहं भवामि । इति भगवान् स्वस्य पक्षपातराहित्यं समं प्रेम च प्रकटीचकार । अतो भक्तानां जातिविद्यारूपकुलधनकर्मादिषु न्यूनतां आधिक्यं वा न प्रेक्षेत । सर्वे भक्ता इत्येव समताहेतुविशेषः ।

## सूत्रयोरन्योऽर्थः

१३४. अनयोः सूत्रयोः अन्यरीत्या व्याख्या स्यात् । भक्तानां दृष्ट्या जाति कुलादिभेदो नास्ति ।

*विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।*
*शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥* (गी. ५-१८)

विद्याविनयसम्पन्नो ब्राह्मणः गौः गजः श्वा तथा चाण्डालः इत्येते जन्मतः सात्त्विकराजसतामसगुणमूलतया भिन्नाः एव । अथाऽपि भक्तः स्वदृष्ट्या वासुदेवः सर्वमिति समं पश्यति । बहिः दृश्येषु प्राणिषु यद्यपि जात्यादिकृतो भेदः स्यात् परंतु एक एव भगवान् सर्वत्र परिपूर्णोऽस्तीति भक्ताः समबुद्धिमेव कुर्वन्ति । स्वपरभेदं वा उत्तमाधमभेदं वा न कुर्वन्तीति प्रथमसूत्रस्य अर्थः ।

*इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।*
*निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥* (गी. ५-१९)

निर्दोषो हि परमात्मा सर्वान् समं पश्यति । नीचोच्चभावः तस्य नास्ति । स्वकीयपरकीय भेदोऽपि नास्ति । अतस्तदीया वैषम्यरहिताः तस्मिन्नेकाग्रमनसो भक्ता अपि न क्वचिदपि भेदभावनां कुर्वन्ति । अत एव तेषां एषा समबुद्धिः साध्या भवतीति द्वितीयसूत्रस्य अर्थः ।

एवं प्राणिषु भेदेषु विद्यमानेष्वपि तान् विशेषान् न परिगणयन्तो भक्ताः समदृश्ट्या सर्वेषु एकं परमात्मानमेव परिपश्यन्तः स्वयं

जात्यादिमूलकत्वेन ख्यातिमनिरीक्षमाणा अपि भगवद्भक्त्यैव लोक-मान्या भवन्तीति समुदितोऽर्थः ।

एवं वस्तुस्थितिं परिदृश्य भक्तौ सर्वेऽधिकारिण इत्यवगन्तव्यम् । साधका अपि स्वजात्यादिविषयमचिन्तयन्तो भक्तावेकत्रैव मन आदधीरन्निति विज्ञेयोऽर्थ इति ।

## १८. साधकाः कथं वर्तेरन्

### वादो नाऽवलम्ब्यः ।।७४।।

### बाहुल्यावकाशत्वादनियतत्वात् ।।७५।।

यतो वादः उत्तरोत्तरं बहुलीभवति न च पर्यवस्यति । तस्मात् साधकः वादं न समाश्रयेत ।

१३५. साधकैः सदा मनसि निध्यातव्याः केचन विचाराः प्रस्तूयन्ते । भक्तिं सम्पादयिष्याम इति प्रवृत्ताः साधकाः प्रथमतः अन्यैः सह वादं न कुर्युः । अत्र वादशब्देन शुष्कतर्कमात्रं गृह्यते । अरागद्वेषिणो अभियुक्ताः तत्त्वनिश्चयाय परस्परं विचारं कुर्वन्ति । सोऽपि वाद एव । "तत्त्वबुभुत्सोः कथा वादः" इति हि न्यायसूत्रम् । "वादः प्रवदताम्हम्" इति वादं स्वविभूतिमाह भगवान् । अतः तत्त्वनिश्चयावश्यकं तर्कमेकं वर्जयित्वा यः शुष्कतर्करूपो वादः, सःत्याज्यः । शुष्कवादं परित्यजेदित्यर्थः ।

कस्तर्को नाम इति चेत् - प्रमाणपरिच्छेदाय तथा अविरोध-मवगमयितुं च अनुभवानुसारिणी युक्तिः तर्क इत्युच्यते । प्रत्यक्षनामक प्रमाणस्य कारणानि इन्द्रियाणि, प्रत्यक्षेण, असाधारणलिङ्गस्य ज्ञानेन क्रियमाणा अनुमितिनाम्नी ज्ञानसाधनं व्याप्तिपरामर्शः, तुलनया समुद्भूतायाः उपमित्याः साधनम् उपमानम्, परोक्षरूप वस्तुनः ज्ञानसाधनं आप्तवाक्यम् इत्यादीनि प्रमाणानि किल ज्ञानस्य साधनानि । तर्केण

किमपि अपूर्वं ज्ञानं न भवति । प्रमाणेन अनुभवरूपं ज्ञानं उत्पद्यते । किं तु तत्र प्रमाणं साधु वा असाधु वेति तर्केण परीक्ष्यते । तथा प्रमाणोत्पन्नेषु ज्ञानेषु संशयपरिहाराय तत्त्वनिर्णयाय च तर्कः उपयुज्यते । निस्संशयानुभवानन्तरं तर्कस्य उपयोगो न । अत एव परभक्तिः यतोऽनुभवरूपा अतः सिद्धानां भक्तानां तर्कापेक्षा नास्ति । साधकैस्तु शास्त्रार्थनिश्चयाय आश्रयणीयस्तर्कः न परिह्रियते । शुष्कवादस्तु वर्जनीय एव । यतः -

*आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।*
*इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥* (म.भा.)

शास्त्रवचनानि सम्यक् मथित्वा मनसि च पुनः पुनर्विचार्य श्रीमन्तं नारायणं सदा ध्यायेदिति सिद्धान्तोऽधिगन्तव्य इति व्यासवचनम् । एवं सिद्धान्तावगमानन्तरं को वा शुष्कवादेऽवतरेत् । भागवते सर्वाणि कर्माणि संन्यस्य परमात्मचिन्तने एव निष्ठानां धर्मोपदेशप्रसङ्गे भगवानेवमाह -

*वेदवादरतो न स्यान्न पाखण्डी न हैतुकः ।*
*शुष्कवादविवादे न कञ्चित्पक्षं समाश्रयेत् ॥* (भाग. ११-१८-३०)

वेदस्य अर्थवादवाक्ये न निर्भरो भवेत् । पाखण्डजनमतमाश्रित्य नास्तिको न भवेत् । सर्वत्र हेतुः पक्षः साध्यमिति अनुमानप्रमाणं नाऽवलम्बेत । शुष्कवादविवादे पतित्वा न कञ्चित्पक्षं समाश्रयेत् इति । एवं तर्कवादान् परित्यज्य सततं श्रीहरिं ध्यायेत चेत् -

*तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।*
*ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥*
*तेषामेवाऽनुकम्पार्थमहमज्ञानजं तमः ।*
*नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥* (गी. १०-१०, ११)

एवं भगवान् स्ववाग्दानरीत्या अस्माकं बुद्धिदिग्दर्शनं कृत्वा अस्मासु कारुण्येन अस्मद्धृदयावरणतमोऽज्ञानं देदीप्यमानेन स्वरूप ज्ञानदीपेन स्वयमेव अपनुदति । इममर्थं मनसि कृत्वा साधको न कदाचिदपि शुष्कवादं न बहुमन्येत । न कञ्चिदपि पुरुषं वादविवादे प्रसञ्जयेत् । यदि कश्चिद् वादायाऽऽह्वयति तदाऽपि मौनमेवाऽऽश्रयेत । अथवा तत्स्थानं त्यक्त्वा स्वमार्गमनुसृत्य अपगच्छेत् ।

१३६. शुष्कतर्के न पतेदित्यस्य कारणं, तेन तत्त्वज्ञानानुभवो न भवतीत्येव केवलं न, किं तु तत्र अन्यद्दोषद्वयमपि लगतीति । प्रथमं तावत्कारणं उत्तरोत्तरं वादे जायमाने वाग्जालं संवर्ध्य वाक्कोलाहलो भवति । केवलशब्दजालमग्नस्य मनुष्यस्य वाचः कुत्र समापयितव्याः- इत्येव न प्रतिभाति । मनश्च बहुविक्षिप्तं भवति । द्वितीयं कारणं तु शुष्कतर्कस्य अन्त एव नास्ति । तत्र चैको वादी कञ्चन बलवद्धेतुं निर्दिश्य तेन तर्कबलेन सर्वान् पराजयते चेत् तत्र ततः परमपि प्रतिवादी वाऽन्यो वा प्रथमवादिना निर्दिष्टं तर्कं ततः प्रबलतरयुक्त्या खण्डयितुं न शक्नोतीति निश्चेतुं न शक्यते एव । अतोऽध्यात्मविचारः अनुभवेनैव निश्चेतव्यो भवति । न तु तर्केण । अन्यथा अपमार्गेण यतित्वा मुधा मनसः शान्तिं न शातयेत् ।

## भक्तिशास्त्राणि मननीयानि तदुद्बोधककर्माणि करणीयानि ।।७६।।

शास्त्रार्थं शास्त्रपठनं, तर्कार्थं तर्ककरणं च त्यजेदित्यनेन अनुभवायाऽपेक्षितं शास्त्राध्ययनादिकं त्यजेदिति न मन्तव्यम् । भक्तिविषयाणि शारत्राणि अवश्यमधीत्य अर्थनिश्चयः कर्तव्य एव । तथा निश्चितस्याऽर्थस्य पुनः पुनः मनस्यालोडनेन महान् लाभो भवति । भगवद्गीता, विष्णुपुराणं, श्रीमद्भागवतं इत्यादीनां भक्ति-

प्रधानानां ग्रन्थानां पठनेन हृदये भक्तिरुल्लसति । अद्यतनाः साधकाः भारतीयानां अतीतानां साधुसत्पुरुषाणां चरित्रं तथा तदुपदेशान् च पठित्वा, सन्मार्गवर्तिनां महनीयानां साहाय्येन भक्तिशास्त्रतात्पर्यं निश्चित्य स्वप्रयत्नेऽग्रेसराः भवेयुः । तेन महत्प्रयोजनं भविष्यति । शास्त्रस्य शास्त्रत्वं मननस्य मननत्वं च भगवत्सम्बन्धमात्रादेव प्रवृत्तमिति तदा विज्ञायते ।

भक्त्युद्बोधकानि कर्माणि कानीति चेत् - भगवदाराधनबुद्ध्या स्वधर्मकर्माचरणं, भगवन्महिमवर्णनपराणां पुराणादीनां श्रवणं, भक्तोपदेशयुक्तानां भक्तविजयादि ग्रन्थानां पारायणं, स्तोत्रपाठः मन्त्रजपः, भगवन्नामसङ्कीर्तनं, तीर्थक्षेत्रादियात्रा, महापुरुषसन्दर्शनं, तत्सेवा, इतीदृशानि कर्माणि भक्तिं संवर्धयन्ति । अत एतादृशानि कर्माणि कर्तव्यानि ।

## सुखदुःखेच्छालाभादित्यक्ते काले प्रतीक्ष्यमाणे क्षणार्धमपि व्यर्थं न नेयम् ।।७७।।

अपरिहार्ये व्यवहारे संलग्नोऽपि साधकः सुखादिचिन्तारहितं कालं प्रतीक्षमाणः सन् तादृशे काले लब्धे तं कालं वृथा न निनयेत् ।

१३८. यावच्च लोकव्यवहारे मनः संलग्नं भवति तावत् सुखदुःखेच्छाद्वेषादिद्वन्द्वसङ्कुलास्पदं भवतीति सहजमेव । यतो मनुष्यः मनःप्रधानः तस्मादेव मनुष्यः क्षणे क्षणे मनःकृतं वैषम्यविकारं अनुभवति । एकदा वाञ्छति । अन्यदा द्वेष्टि । कदाचित् स्मयते । जातुचित् विषीदति । पुनः आक्रोशते । शपते । इत्येवं चित्तविक्षेपेण आयास्यते । क्षणमपि शान्तिर्नास्ति । एवमेव शीतं उष्णं जयः पराजयः इत्यादि द्वन्द्वाघातेनाऽपि अभिभूयते ।

*इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।*
*सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ।।* (गी. ७-२७)

इति गीतोक्तेः मनुष्यस्य जन्मप्रभृति रागद्वेषादयः अविनाभूताः सन्ति । इदं साधु, इदमसाधु, इदमिष्टम्, इदमनिष्टमिति भेदबुद्ध्यैव नराः संसरन्तः सन्ति ।

*येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।*
*ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥* *(गी. ७-२८)*

इत्येवं प्रकारेण साधकः इच्छाद्वेषादिरहिते काले, यः कालः पुण्यवशात् लभ्यते, तस्मिन् सदवकाशे भगवच्चिन्तनं प्रारभेत । तदा भक्तिरङ्कुरिता सती रजस्तमोभावं न्यग्भावयति । क्षणे सात्त्विकं मनः परमात्माभिमुखं प्रवृत्तं भवति । अतस्तादृशः कालावकाशः केनापि सुकृतिना प्राप्यते । वयं तु तादृशपुण्यरहिताः इत्यात्मनि अनधिकारं कल्पयित्वा आलस्येन भक्तिसाधनानि अननुष्ठाय वृथा कालं न नयेत् । क्षणमपि कालावकाशो लभ्यते चेत् तदात्वे एव भगवन्नामस्मरणमित्यादि कर्तुं व्यवस्येत । भगवच्चिन्तनाभाव एव बाह्यसंसारव्यासङ्गस्य द्वन्द्वमोहस्य च आस्पदं कल्पयति इति ।

## अहिंसासत्यशौचदयास्तिक्यादिचरित्राणि पालनीयानि ॥७८॥

१३९. अहिंसेत्यादीन् भक्त्युद्बोधकसामग्रीषु अन्तर्भूतान् अपि अत्र पुनः पृथग्गणने कारणं किमिति चेत्, ईदृशेषु कर्मसु शरीर-प्रधानाः नियमाः, मनःप्रधानाः यमाः इति विशेषेण प्रदर्शयितुमिति मन्तव्यम् । तत्र - "(मनुस्मृतिः) यमान् पतत्यकुर्वाणो नियमान् केवलान् भजन्" इति स्मृतिवचनात् यमसंज्ञकानि साधनानि अवश्यं अनुष्ठेयानि भवन्ति । अन्यथा पातित्यप्रसङ्गात् । यमानुष्ठानं विना केवल नियमानुष्ठानेन प्रयोजनं न प्राप्नोति । तत्सूचनायैवाऽत्र यमान्तर्भूतानां अहिंसादीनां पुनर्गणना कृता ।

तत्र अहिंसा नाम प्राणिहिंसायाः निवृत्तिः । विना कारणेन मनुष्यादीनां केषाञ्चिदपि प्राणिनां शरीरस्य मनसो वा यथा हिंसा न भवति तथा स्ववर्तनं प्रकल्पयेत् । इदं सुकरमिति न मन्तव्यम् । के-चन प्राणिदयां नटन्तो वाचा वदन्तश्च मनुष्यादिभ्यः अन्नदानं वस्त्र दानमित्यादीनि कुर्वन्तो दृश्यन्ते । तावन्मात्रेण ते सकलभूतहितकर्तार इति न विभावनीयाः । तेषां अहिंसाव्रतमपि न सिद्ध्यति । अहिंसात्मक स्वकर्मणा यस्य कस्यचिदपि पीडा न भवेदिति प्रथमं मनसि दृढसङ्कल्पो भवेत् । शत्रावपि अहितं न कार्यमिति प्रज्ञासङ्कल्पो यावत् तावती अहिंसायाः व्याप्तिर्मन्तव्या ।

सत्यं नाम चक्षुषा दृष्टं दृष्टवदेव, श्रोत्रेण श्रुतं श्रुतवदेव व्याहारः । यथा च मनसि स्थितं तथैव वचने वर्तनेऽपि व्यवहृतिः । अत्र च -

*सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।*
*प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥* (मनुस्मृतिः)

इत्यभियुक्तोक्तरीत्या सत्यं भाषेत, प्रियं भाषेत । अप्रियं सत्यं भाषितुं नोत्सहेत । प्रियमप्यसत्यं न वदेत् । तथा स्वकृतवाग्दानं अनृतं न कुर्यात् । एवं भवति सत्यव्रतपरिपालनक्रमः ।

शौचं नाम - स्वशरीरं स्ववस्त्रादिकं स्ववेषं च सदा शुचि निदध्यात् । अशुचि स्याद्यदि तत्क्षणे मृज्जलादिभिः क्षालयित्वा शुचि सम्पादयेत् । सर्वदा शुचिर्भूत एव तिष्ठेत् । तथा मनोऽपि शुचि स्थापयेत् । दुर्विषयं दुश्चिन्तां च मनसि नाऽऽनयेत् । भगवन्नाम-स्मरणादिना मनश्शुद्धिं सम्पाद्य शुद्धचारित्रं च संरक्षेत् ।

दया नाम सकलप्राणिदया । सकलप्राणिषु दयेत । दुःखिनां दुःखापनोदनाय स्वयमग्रेसरो भूत्वा उपकारं कुर्यात् ।

आस्तिक्यं नाम ईश्वरास्तित्वे पुण्यपापविषये परलोके पुनर्जन्मविषये

च विश्वासः । शास्त्रगुरुवचनेषु प्रामाण्यबुद्धिः । तदनुवर्तने श्रद्धा च । सूत्रे आदिशब्देन गीतासु आसुरसम्पन्निरूपणप्रकरणे सङ्गृहीतानां कामक्रोधादीनां जयाय आवश्यकान् मनःप्रधानान् यमप्रकारान् गृण्हीयात् ।

## सर्वदा सर्वभावेन निश्चिन्तैर्भगवानेव भजनीयः ।।७९।।

१४०. भगवद्भजनमिदं मुख्यं साधनम् । सर्वभावशब्दस्य द्विधा अर्थविवरणं सम्भवति ।

***यस्मिन् सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः ।***
***यश्च सर्वमयो नित्यं तस्मै सर्वात्मने नमः ।।*** *(भीष्मस्तवराजे ८३)*

इति भीष्मोक्तेः । यस्मादिदं जगत्सर्वमागतं, यस्मिन्नाधारे तिष्ठति, य एव नामरूपात्मकं सर्वं, यः सर्वत्राऽवस्थितो, यश्च सर्वरूपेण प्रकाशते स एव भगवानिति परभक्तस्य यो भावः स एव सर्वभाव इति प्रथमः अर्थः । इमं सर्वभावं गीतासु भगवान् निर्दिशति यथा -

***यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।***
***स सर्वविद्भजति मां सर्वभावेन भारत ।।*** इति ।।

*(गी. १५-१६)*

एषः सर्वभावः साधकस्य आदावेव न प्राप्त इति तत्प्राप्त्यर्थमेव तावत्पर्यन्तं इन्द्रियैर्मनसा च यद्यद्गृह्यते तत्सर्वं भगवद्विभूतिरेव, अतो मम स एव गतिरित्येकभावनया तं भजेत । अथ सर्वभावशब्दस्य द्वितीयः अर्थः । अस्याऽपि गीतासु निर्देशो दृश्यते । यथा -

***ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।***
***भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।।***

*तमेव शरणं गच्छ सर्वभावेन भारत ।*
*तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥*

(गी. १८-६१, ६२)

हे अर्जुन, ईश्वरः सर्वप्राणिनां हृदये समास्ते । सः स्वमायाशक्त्या सर्वान् जीवान्, यन्त्रे कश्चित् पुत्तलिकाः समारोप्य यथा भ्रामयेत् तथैव तत्तत्कर्मानुगुणं अस्मिन् जगत्संसारे भ्रामयति । अतस्तमेव सर्वभावेन त्रिकरणपूर्वकम् शरणमुपगच्छ । तर्हि तस्याऽनुग्रहेण शाश्वत्तं स्थानं परमशान्तिं च प्रपत्स्यसे । इत्यस्मिन् भगवद्वचने एतस्य द्वितीयार्थस्य सर्वभावस्य परामर्शो दृश्यते ।

अतः साधको भक्तः इमं सर्वभावं समाश्रित्य स्वसकलेन्द्रियाण्यपि परमात्मनो भजने विनियोजयेत् । भागवते - (१०-८०-३) यथोक्तम् -

***सा वाग्यया तस्य गुणान् गृणीते करौ च तत्कर्मकरौ मनश्च ।***
***स्मरेद्वसन्तं स्थिरजङ्गमेषु शृणोति तत्पुण्यकथाः स कर्णः ॥***
***शिरस्तु तस्योभयलिङ्गमानमेत्तदेव यत्पश्यति तद्धि चक्षुः ।***
***अङ्गानि विष्णोरथ तज्जनानां पादोदकं यानि भजन्ति नित्यम् ॥***

मनुष्यस्य वागादिबहिरिन्द्रियाणि मनश्च भगवत्सेवायां तथा भगवद्भक्तसेवाकार्ये उपयुक्तानि चेत्तदा तानि सार्थकानि भवन्ति । अन्यथा व्यर्थानीति मन्तव्यम् ।

निश्चिन्तैर्भजनीय इति । इह लोके स्वयोगक्षेमार्थं कर्तव्यकर्मभिः परलोके पुण्यपापकर्मभिः प्राप्याणां सुखदुःखानां चिन्तां च मनसि अकृत्वा निरन्तरं भगवच्चिन्तनमेव कुर्यादित्यर्थः ।

सर्वदा भजनीय इत्यस्याऽभीप्रायः क इति चेत् - सर्वदा भगवन्तं चिन्तयितुं शक्यते वा इत्यस्य उत्तरं ६१ तमे सूत्रे अभिहितम् । यतो भक्तानां योगक्षेमं स्वयं भगवान् वहति, तस्मादिहलोके योगक्षेम

चिन्ता न कार्या । तस्मादेव कारणात् परलोके कृतधर्माधर्मनिमित्तेन प्राप्यमाणानां सुखदुःखानां चिन्तां कर्तुं नाऽऽवश्यकम् । कुत इति चेत् - भक्तः परलोकार्थं पुण्यं कर्म न करोत्येव । पापकर्मविषये तु -

*किङ्कराः पाशदण्डाश्च न यमो न च यातनाः ।*
*समर्थास्तस्य यस्याऽऽत्मा केशवालम्बनः सदा ।।* (वि.पु. ३-७-३८)

इति स्मृतिप्रामाण्येन भक्तस्योपरि यमादीनां नाधिकारः प्रवर्तते । भगवच्चिन्तनया तस्य पापानां नष्टत्वाच्च । अतो निश्चिन्तता सम्भाव्यते ।

## सङ्कीर्त्यमानः शीघ्रमेवाऽऽविर्भवत्यनुभावयति भक्तान् ।।८०।।

सततसङ्कीर्तनेन भगवान् प्रत्यक्षो भवति । स्वभक्तान् अनुगृण्हाति च ।

१४१. पूर्वं भजनीय इति सामान्यवाचिशब्देन उक्त्वा अत्र सूत्रे सङ्कीर्त्यमान इति विशेषाभिधानशब्दप्रयोगेन भगवद्गुणानां तत्तन्नामसङ्कीर्तनद्वारा यत्संस्मरणं तद् विशेषेण भगवदनुरागप्राप्तेः तथा तदनुग्रहस्य च विशिष्टं कारणं भवतीति उक्तप्रायमेव ।

**'स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।'** (गी. ११-३६) इत्यत्रोक्तरीत्या भगवन्माहात्म्यस्य सङ्कीर्तनेन तच्छ्रवणेन च भक्तानां महान् हर्षस्तथा भगवति प्रभूतोऽनुरागश्च उत्सिच्यते । अत एव -

*सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।*
*नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ।। (गी. ९-१४)*

मम शुभनाम ये सङ्कीर्तयन्ति ते भक्ताः इन्द्रियोपरमशमदमाहिंसादिरूपयमनियमैर्युक्ताः यत्नपुरस्सरं अविच्छिन्नरूपेण मां भजन्तो नमन्तश्च उपासते इति भक्तान् भगवान् मुक्तकण्ठं प्रशंसति ।

*तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।*
*ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।*
*तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।*
*नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।।* (गी. १०-१०)

इमौ श्लोकौ पूर्वमुदाहृतौ । इत्थं च निश्चलेन मनसा नाम सङ्कीर्तनपुरस्सरं भजतां भक्तानां भगवान् हृदये एव दर्शनं दत्वा अनुगृण्हातीति ।

शीघ्रमेव आविर्भवतीत्यनेन मरणानन्तरं लोकान्तरे कलान्तरे प्राप्यादृष्टफलवत् न, इह जीवितकाले एव इष्टोर्थमनुगृण्हातीत्यर्थः । अनुभवमनुगृण्हातीत्यनेन तत्फलं अनुभवगम्यमिति च संसूचितं भवति ।

निरन्तरभगवद्भजनेन यत्फलं प्राप्यते तद्वृत्तान्तं श्रीनारदः स्वपूर्व-जन्मकथयैव व्यासाय समाचख्याविति श्रीमद्भागवते वर्णितमस्ति । नारदः पूर्वजन्मनि दासीपुत्रः आसीत् । तदा महर्षिशुश्रूषया तस्य ज्ञानोपदेशो लब्धः । मातुर्देहान्तादनन्तरं सः निर्जनमरण्यं गत्वा तत्र अश्वत्थवृक्षस्य अधः उपविश्य एकाग्रमनसा भगवन्तं ध्यायतिस्म ।

*ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा ।*
*औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ।।*
*प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः ।*
*आनन्दसंप्लवे लीनो नाऽपश्यमुभयं मुने ।।* (भाग. १-६-१७)

तस्यं मनस्येव भगवद्दर्शनमभवत् । तदा सः कुतूहलानन्दबाष्पपूर्णो भावसमाधौ आनन्दसागरे निमग्नोऽभूत् । द्वितीयं वस्तु नाऽपश्यच्च ।

## त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी ।।८१।।

१४२. अत्र त्रिसत्येत्यस्य अर्थनिर्णयो न सुगमः । केचित्

त्रीन् गुणान्, अवस्थात्रयं, त्रिपुटीं च भक्तिः अतिवर्तत इति अर्थं वर्णयन्ति । परंतु तथा निर्णये गमकं नास्ति । यत इदं न परभक्ति प्रकरणम् । अत एतद्व्याख्यानं न समञ्जसमिव । ततश्च कर्म ज्ञानं उपासनं चेति त्रयः श्रेयोमार्गा इति प्रसिद्धाः शास्त्रेषु । ते सत्यमार्गमेव बोधयन्ति, अथापि तेभ्यो भक्तिरधिका इति अस्य वाक्यस्य अर्थं निर्वक्तुमुचितमिति प्रतिभाति ।

गृहागतं कविं नामर्षिं प्रति राजा निमिरेवं प्रश्नं चकार -

*धर्मान् भागवतान् ब्रूत यदि नः श्रुतये क्षमम् ।*
*यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ।।* *(भाग. ११-२-३१)*

इति पृष्टः कविः प्रत्युवाच एवम् -

*ये वै भगवता प्रोक्ता उपाया आत्मलब्धये ।*
*अञ्जः पुंसामविदुषां विद्धि भागवतान् हि तान् ।।३४।।*
*यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित् ।*
*धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ।।३५।।* इति ।।

अस्मिन् विषये उद्धवं प्रति भगवानेवमुपदिदेश -

*तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।*
*न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ।।*
*यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ।*
*योगेन दानधर्मेण श्रेयोभिरितरैरपि ।*
*सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ।।* *(भाग. ११-२०-३१)*

उद्धव, मयि भक्तिमान् योगी मय्येव मनो निदधाति यतोऽ तस्तस्य ज्ञानं वा वैराग्यं वा प्रायः न मुख्यम् । किं तु श्रेयस्साधनैः यद्यत्फलं प्राप्यते, तत्सर्वं भक्तियोगेनैव प्राप्नोति भक्त इति ।

१४३. अथवा त्रिसत्यस्येति व्यत्ययेन षष्ठी । त्रिष्वपि

कालेष्वित्यर्थः । भक्त्युदयात् प्राक् ततो गौणभक्त्यनुष्ठानसमये तथा परभक्तिप्राप्त्यनन्तरं चेति तिसृष्ववस्थासु भक्तिरेवैव गरीयसीत्यर्थः । प्रायेण मनुष्यः प्रथमतः कर्माणि शास्त्रविहितानीति तान्यनुतिष्ठति । अनन्तरं चित्तशुद्धिकराणि, तथा भक्तिसाधनानि चेति ज्ञात्वा कर्माणि करोति । परभक्तिप्राप्त्यनन्तरं तु भक्तावेव सुनिष्ठितो भवति । एवं च यस्यां कस्यामप्यवस्थायां भगवत्प्रेमसम्बन्धं विना यत्किमप्यनुष्ठानं परमपुरुषार्थहेतुर्न भवति । अत एव तिसृषु चावस्थासु भक्तिरेव श्रेयस्साधनमिति सूत्रस्याऽभिप्रायः ।

१४४. केचित्तु -

***कलौ कल्मषचित्तानां पापद्रव्योपजीविनाम् ।***
***विधिक्रियाविहीनानां गतिर्गोविन्दकीर्तनम् ॥***

इति वाक्यं प्रमाणीकृत्य कलियुगे जनाः प्रायेण पापचित्ताः भवन्ति । पापद्रव्येण उपजीवनं कुर्वन्ति । त्यक्तविधिक्रिया वर्तन्ते । अतस्तादृशानां गोविन्दकीर्तनमेव गतिरित्यभिप्रायमुद्भाव्य केवल-पापिनामेव कलियुगे कीर्तनादिसाधनं गतिरिति अगतिकगतिं कल्पयन्ति । सर्वथा न साध्वेतत् । घोरे पापबहुले कलियुगे भगवत्कीर्तनमेकमेव साधनमवशिष्टम् । अस्मिन् युगेऽपि भक्तिर्महत् साधनं सती पापिनां गतिश्चेत् किमु वक्तव्यम्, सदाचारसत्कर्मनिरतानां भक्त्या महत्फलं सिद्ध्यतीति व्याख्यानमेवोचितम् । गीतासूक्तम् - **'किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा'** (गी. ९-३३) इति वर्णाश्रमधर्मनिरतानां भक्त्या महत्फलं प्राप्यते इत्यत्र किमु वक्तव्यमिति भक्तिप्रशंसापरमिदं वाक्यम् । ततश्च पूर्वकाले इदानीन्तने काले भविष्यत्काले चेति त्रिष्वपि कालेषु भक्तिरेव गरीयसीति त्रिसत्यस्येति शब्दस्याऽर्थः उचितः । भक्तिरेव गरीयसीति द्विरुक्तिः साधनस्य फलस्य च प्रकरणमवसितमिति सूचनायेति विज्ञेयम् ।

# १९. भक्तेरेकादशप्रकाराः

*गुणमाहात्म्यासक्ति रूपासक्ति पूजासक्ति*
*स्मरणासक्ति सख्यासक्ति दास्यासक्ति वात्सल्यासक्ति*
*कान्तासक्ति आत्मनिवेदनासक्ति तन्मयतासक्ति*
*परमविरहासक्तिरूपैकधाऽप्येकादशधा भवति ॥८२॥*

भक्तिरेकाऽपि गुणमाहात्म्यासक्त्यादिरूपैः एकादशधा समुल्लसति ।

१४५. सम्यग् विभाव्यमाने वस्तुतः एकैव भक्तिः लोके नानारूपैर्विभाति । अतश्चात्र विभक्ता भेदाः केवलं प्रसिद्धभेदमनुरुद्ध्येति ध्येयम् । एवमेषां विशेषाणां विवरणेन भक्तिरेकाऽपि यथा विविधंरूपं प्राप्नोतीतीदं व्यक्तं भवति । भवभूतिर्नाम महाकविः स्वंकृते करुणरसप्रधाने उत्तररामचरितनाटके प्राह -

*एको रसः करुण एव निमित्तभेदाद्*
*भिन्नः पृथक्पृथगिवाश्रयते विवर्तान् ।*
*आवर्तबुद्बुदतरङ्गमयान् विकारान्*
*अम्भो यथा सलिलमेव तु तत्समस्तम् ॥* (उ.च. ३-४७)

वस्तुतः करुणो नाम एक एव रसः । जलं नामैकं वस्तु तरङ्गावर्तबुद्बुदादि रूपैः प्रतीयमानमपि वस्तुतस्तत्सर्वं जलमेव भवति यथा तथाऽन्ये सर्वे रसाः करुणरसे एव अन्तर्भवन्तीति । इयं वर्णना भक्तिविषये युक्ततरेणाऽन्विता भवति । तथाहि - भक्तिर्नाम प्रेम । एतत्प्रेमैव रस इति सर्वेषामनुभवः । श्रुतिश्च - "रसो वै सः" इति । प्रेम रसः रागः इत्येते शब्दाः गीर्वाणभाषायां घटः कलशः कुम्भः इतिवत् पर्यायवाचिनः । परीक्ष्य निध्याय्यते चेत् प्रेमैव नानाभावरूपेण विवर्तते ।

तत्कथमिति परिशीलयन्तु । प्रेम सर्वतः नप्रसरत् सत् स्वस्मिन्

एकत्रैव तिष्ठति चेत् सा स्वार्थतायां पर्यवस्यति । एषा स्वार्थतैव अन्यान् द्वेष्टुं कारणं भवतीत्यतः प्रेम्णः रूपान्तरमेव द्वेषो नाम भवति । भयं नाम अविचारितं विनाकारणं एकत्र स्थितं प्रेमैव । अन्यथा प्रेम्णा भयं जेतुं कथं शक्येत । धनकनकादिषु स्थितं प्रेमैव किल चोरेभ्यो भयमुत्पादयति । विषयेषु स्थितं प्रेम राग इत्युच्यते । रागविषयप्राप्तौ यः कोऽपि प्रतिरोधं करोति चेत् तस्मिन् क्रोधः द्वेषश्च उद्भवति । अथ च प्रेम्णः प्रतिद्वन्द्वरूपमेव द्वेषः क्रोधश्च । शिशुबालविषयकं प्रेमैव वात्सल्यमुच्यते । गुरुमहत्तराणां उपदेशे विश्वासरूपं प्रेमैव श्रद्धा । स्वदोषदौर्बल्यादिषु यत्प्रेम भवति तान् दोषादीन् कदाचिदन्ये जानीयुरित्यातङ्क एव लज्जा । एकस्मिन्नेव वस्तुनि यदि प्रेम केन्द्रीकृतं तर्हि तद् वस्त्वन्तरविस्मृतिकारणं भवति । ततश्च प्रेमप्रतियोगिरूपा विस्मृतिः । आर्तेषु प्रेमैव करुणा । अन्येषु दुःखितेषु सत्सु आत्मन्येव प्रेम क्रौर्यम्, प्रेम्णः एकदेशविवर्तित्वम् । शत्रूणां मर्दने उत्साहरूपं प्रेमैव शौर्यम् । दुर्गतेषु प्रेमैव औदार्यम् । एवं विचारपदवीमध्यारुह्य निरूपयाम चेत् एतत्प्रेम यावन्त्यगणितानि रूपाणि बिभर्ति, तानि निश्चित्य कथयितुं न कोऽपि शक्नोति । पक्षपातेन उदीरयाम चेत् प्रेम समग्रस्य जगतः प्रशासने सर्वसमर्थं सम्राडिति । भक्तिशास्त्रं च प्रेमविद्यैव ।

## १. गुणमाहात्म्यासक्तिः

१४६. भगवत्प्रेम प्राधान्यतः एकादशरूपेण प्रख्यायते । एतेषु प्रथमा गुणमाहात्म्यासक्तिरिति । लोके यस्य कस्याऽपि वस्तुनो गुण वर्णनश्रवणेन तस्मिन्वस्तुनि प्रेमाऽधिकं भवति । मनस्तत्रैव संलग्नं भवति । अनन्तकल्याणगुणाकरस्य भगवतो गुणानां श्रवणेन भक्तानामप्येवमेव तस्मिन् मनोऽधिष्ठितं भवति । यथोक्तम् -

*निवृत्ततर्षैरुपगीयमानाद्*
*भवौषधाच्छ्रोत्रमनोभिरामात् ।*

*क उत्तमश्लोकगुणानुवादात्*
*पुमान् विरज्येत विना पशुघ्नात् ॥* (भाग. १०-१-४)

श्रीकृष्णावतारे प्रदर्शितानि भगवतो वीर्याणि श्रोतुकामो राजा परीक्षित् सम्भ्रमेण त्वर्यमाणः प्रश्नप्रसङ्गे एवमाह । परित्यक्त सर्वकामैर्योगिभिः संस्तूयमानस्य संसाररोगौषधस्य श्रोतृणां मनः स्वाभिमुखमेव समाकृष्य तत्रैव रमयतः परमयशस्विनो वासुदेवस्य कथानुवादं श्रोतुं पशुघ्नमेकं वर्जयित्वा कोऽन्यो विगतेच्छो भवेत् ? इति ।

भगवतः गुणकर्माण्येव न सन्ति, सः निर्गुणः निष्क्रिय इति शास्त्रेषु वदत्सु तस्य गुणेषु आसक्तिरितीदं कथं घटते इति केचिदाक्षिपन्ति । परं तु असार एष आक्षेपः । यतो लोके प्रतीयमानानां वस्तूनां प्राणिनां च गुणाः कुतः समागताः ? जगन्मूलं तं भगवन्तं विना जगद्वस्तूनां गुणाः कथं सम्भवेयुः ? दीपं विना प्रकाशः कुत्रत्यः ? यदुक्तं गीतासु -

*बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः ।*
*सुखं दुःखं भवोऽभावो भयं चाऽभयमेव च ॥*
*अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।*
*भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥* (गी. १०-४)

सूक्ष्मग्रहणसामर्थ्यं बुद्धिः, आत्मादिपदार्थावबोधशक्तिः ज्ञानं, प्रवृत्ति निवृत्तिविषये द्रुतपरिच्छित्तिः असम्मोहः, परैः आक्रोशे ताडनेऽपि सहनरूपः क्षोभरहितश्चित्तधर्मः क्षमा, दृष्टस्य वा श्रुतस्य वा यथा-वदविकारेण व्याहारः सत्यम्, बहिरिन्द्रियजयो दमः, अन्तःकरणस्य स्ववशे स्थापनं शमः, अनुकूलवेदनीयं सुखम्, प्रतिकूलवेदनीयं दुःखम्, स्थितिधर्मो भवः, अदर्शनं अभावः, त्रासो भयम्, अत्रासोऽभयम्, प्राणिमात्रस्य अप्रपीडनं अहिंसा, मनस्समाहारः समता, प्राप्तेषु अलम्बुद्धिः तुष्टिः, मनःकायदण्डनं तपः, पात्रे काले उत्सर्गो दानम्,

साधुनाम कीर्तिः, असाधुनाम अयशः, इत्यादयः सर्वे गुणाः प्राणिनां मयैव सम्भवन्तीत्याह भगवान् ।

एवं तर्हि भगवान् यथा गुणानामाश्रयः तथा दोषाणामपीत्यतः सः सदोषः इत्यपि स्यादिति चेत्, यथा गुणाः तथा दोषा अपि परमात्मसम्बन्धिनः सन्तीत्यतः तं सदोषं कथयितुं शक्यम् । अथापि सः सगुण इत्येवाऽऽख्यातुं अर्हति । यतस्तत्राऽधिकं औचित्यमस्ति । यस्मात्कारणात् - प्रेमास्पदो भगवान् आनन्दरूपो यतोऽतः लोके यत्र यत्र गुणाः सन्ति तत्र तत्र प्रेमोद्भवो भवति । न तथा दोषवति प्रेम जायते । दुर्जनेष्वपि परमात्मा सन्नपि घटान्तर्वर्तिदीपवत् न प्रकाशते । अतस्तत्र प्रेमाऽपि न दीप्यते । परं तु गुणवत्सु काच-पात्रस्थितदीप इव अन्तर्बहिश्च चकास्ति । अतो भगवान् गुणवा-नित्येव कथयितुं युक्तम् ।

अपरमिदमत्र चिन्तनीयम् । परमात्मा सत्त्वरजस्तमसां गुणानां आधारभूतोऽपि, तत्र तेषु गुणेषु प्रतीयमानेष्वपि वस्तुतः सः तेषां गुणानां सम्बन्धी न भवत्येव । गीतासु भगवत्स्वरूपनिरूपणायाम् -

*ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।*
*मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि ।।*
*त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।*
*मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ।।* (गी. ७-१२)

इत्युक्तम् । गुणमयबुद्धिप्रधाना जनाः गुणाधारमपि गुणातीतं तं न परिजानन्त्येव । ये तु गुणातीता महात्मानः, ते तं भगवन्तं गुणातीतमेव विजानन्ति । व्यवहारे तु ते साधका एव भवन्ति ।

*मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।*
*स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ।।* (गी. १४-२६)

इति भगवदुक्तिप्रकारेण ये अव्यभिचारिण्या सगुणभक्त्या तं भजन्ते ते भक्ताः त्रीन् गुणान् समतीत्य गुणातीतपरब्रह्मस्वरूपस्यैव भगवतः सायुज्यं प्राप्य तन्मया भवन्ति । यथोक्तमध्यात्मरामायणे -

*यः सेवते मामगुणं गुणात्परं*
*हृदा कदा वा यदि वा गुणात्मकम् ।*
*सोऽयं स्वपादाञ्चितरेणुभिः स्पृशन्*
*पुनाति लोकत्रितयं यथा रविः ।।* *(अ.रा.उ.कां. ५-६१)*

योऽपि भक्तः निर्गुणं सन्तं मां गुणातीत इति वा सगुणं इति वा विश्वस्य स्वहृदये उपास्ते सः मद्रूप एव भवति । सः स्वपादरेणुभिः लोकत्रयमपि सूर्यः स्वकिरणैर्यथा तथा पवित्रीकरोतीति श्रीरामः प्राह ।

एवं गुणमाहात्म्यासक्तिविषयं विस्तरेण अभिधायाऽपि पुनस्तत्र अभिधेयांशोऽवशिष्यते एव । लोके यस्मिन् पात्रे इमे सद्गुणा इति परिभावयामः तेते गुणाः तस्मिन् तस्मिन् महापुरुषे पृथगनुपमरूपेण प्रकाशमानाः सन्तोऽस्माकं मनसि तत्तन्माहात्म्यं विशेषरूपेण मुद्रितं कुर्वन्ति । गौतमबुद्धे अहिंसा, हरिश्चन्द्रे सत्यसन्धता, इत्येवं एकैकं गुणं दृष्ट्वा वा पुस्तके पठित्वा वा श्रुत्वा वा तत्तन्माहात्म्यं सम्यगवगम्यते । परं तु सर्वान् सद्गुणान् स्वचारित्र्ये प्रदर्शयितुं ईश्वरमेकं विना अन्यस्य कस्य वा सामर्थ्यं स्यात् ! महर्षिर्वाल्मीकिः सर्वान् सद्गुणप्रकारान् एकत्र काव्ये वर्णयित्वा लोकस्य प्रदर्शयितुमभिलषन् तादृशं महापुरुषं सुविचिन्त्याऽपि न विजानन् अन्ते श्रीनारदं परिपृच्छ्य तेन प्रोक्तं श्रीराम चरितं श्रुत्वा तस्मिन् महापुरुषे श्रीरामे सद्गुणाः सर्वे समुल्लसन्तीति निश्चित्य ततः श्रीमद्रामायणं व्यरचयदिति प्रसिद्धमेव । अथापि भगवतः सद्गुणाः कतीतीदं न कस्यचिदपि गणितगोचरं स्यात् । यतः -

*असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे,*
*सुरतरुवरशाखा लेखनी पत्रमुर्वी ।*
*लिखति यदि गृहीत्वा शारदा सर्वकालं*
*तदपि तव गुणानामीश पारं न याति ।।* *(शिवमहिम्नः स्तोत्रे)*

अञ्जनाद्रिप्रमाणं कज्जलमादाय तत् समुद्रपात्रजले मषीं सम्पाद्य कल्पतरुशाखां लेखनीं कृत्वा साक्षात्सरस्वती देवी लेखिका सती भूमण्डलमेव पत्रं विधाय सर्वदा लिखन्त्यपि हे परमेश्वर, तव सद्गुणाः साकल्येन न परिगाणीताः भवन्ति । इति । एवमस्ति भगवद्-गुणानामानन्त्यम् । अत एव भगवद्गुणाः कीदृशस्यापि जनस्य मनः समाकर्षन्ति इति स्थाने खलु । तेषु गुणेषु एकस्य अंशांशसद्भावेऽपि जनतायाः मनः प्रह्वं भूत्वा दासीकृतं भवति । परमात्मनो गुणच्छायायां प्रतिच्छायारूपेण प्रतीयमानेषु गुणवद्वस्तुषु जनाः मुग्धा भवन्तीति चेत् तर्हि साक्षाद्भगवतः कल्याणगुणान् महद्वर्णितान् श्रोत्रपुटैः ये आकर्णयन्ति चेत् तदा तेषां मनसि कीदृशः साधुपरिणामोऽभविष्यत् ! बाह्यवस्तूनां गुणाः मनः समाकर्षन्तीति मन्दाः प्रतियन्ति । सा भ्रान्तिः । परमार्थतस्ते भगवद्गुणप्रतिच्छायामात्रमेव । एवं जनानां मनः स्वकल्याणगुणैः तथा गुणाभासैश्च अपहरतीत्यतः भगवान् हरिरिति अन्वर्थनामा समास्ते ।

## २. रूपासक्तिः

१४७. रूपासक्तिरिति भक्तेः द्वितीयः प्रकारः । यः कोऽपि गुणो रूपवद्वस्तुन्येव प्रथते । अतो भगवतो गुणानां परिज्ञानाय प्रथमतस्तस्य रूपे आसक्तिर्विधातव्या भवति । परमात्मा स्वयं निर्गुणो नी-रूपोऽस्ति । किन्तु तत्सकाशादेव सर्वे गुणाः सर्वाणि च रूपाणि बहिः सम्भूय प्रतीयन्ते । तत्र न किमप्याश्चर्यम् । परमात्मा भक्तकार्यार्थं

मायामयं रूपं धारयति । तथाहि, पुरा श्वेतद्वीपं गतो नारदः तत्र भगवन्तं विविधैः नामभिः अस्तावीत् । तदा श्रीमान् नारायणो दिव्यं रूपं धृत्वा तस्य प्रत्यक्षोऽभवत् । प्रसन्नः सन् स नारदाय परमार्थमेवं बोधयामास -

*माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ।*
*सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि ॥* (मो.ध. ३३१-४५)

हे नारद, इदानीं त्वं मां प्रत्यक्षतः पश्यसि ननु । किं तु परमार्थतः इदं न मम रूपम् । इदं मम मायेति जानीहि । मां सर्वभूतगुणैर्युक्तं अर्थात् नामरूपयुतं देहिनं न मन्यस्वेति भगवानुपदिदेश । तत्र भक्तस्य नारदस्य अपेक्षां पूरयितुमेव स्वेच्छया दिव्यरूपं धृत्वा दर्शनं ददाविति अवगन्तव्यम् । अरूपोऽपि वायुः चण्डमारुतः सन् यदा महावृक्षानुन्मूलयति तदा तस्य स्वरूपं महाशक्तिश्च समूह्यते । जलोष्मणः अगाधशक्तिः यदा बृहन्नौकाः शकटश्रेणिं च चालयति तदा किल ज्ञायते । भूमण्डले सर्वत्रव्याप्य स्थिताया विद्युच्छक्तेः महिमा विद्युद्दीपैः तडिद्भिः स्तनितैः तथा बृहद्यन्त्रस्थावरचालनेन च सुविदितो भवति । एवमेव निर्गुणस्य निराकारस्य सतः परमात्मनो महिमा, स यदा अनेककल्याणगुणैर्युक्तं विविधं मायिकं रूपं धृत्वा अक्षिगोचरो भवति तदा किल अवगन्तुं शक्यः ।

परमात्मा स्वयं निर्गुणो निराकारोऽपि सन् गुणमयं रूपवदिदं जगत् सृजति । गुणवतो रूपवतो जगतः सृष्टिस्थितिलयाः तस्मात् कथं सम्भवन्तीतीदं अवगमयितुं पराशरो मैत्रेयं प्रत्येवं प्राह -

*शक्तयः सर्वभावानां अचिन्त्यज्ञानगोचराः ।*
*यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥*
*भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता ।*
*तन्निबोध यथा सर्गे भगवान् सम्प्रवर्तते ॥* (वि. पु. १-३-२)

हे तापसोत्तम, सर्वभावपदार्थानां अपि अचिन्त्यज्ञानमात्रस्य गोचराः शक्तयो भवन्ति । वह्नावुष्णत्वं यथा । तथैव ब्रह्मणः सृष्टिशक्तीत्यादयः अनन्ताः शक्तयः सन्ति । अतस्ताभिः शक्तिभिः स भगवान् निर्गुण एव सन् जगत्सृष्ट्यादिषु प्रवर्तते । एवमेव केशिध्वजेन प्रोक्तम् -

*विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा ।*
*अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ॥* (वि.पु. ६-७-६१)

विष्णुशक्तिरिति पराशक्तिः, क्षेत्रज्ञशक्तिरिति अपराशक्तिः, तथा कर्मसंज्ञिका अविद्याशक्तिः तृतीया । किं च -

*तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।*
*सर्वभूतेषु भूपाल तारतम्येन लक्ष्यते ॥६३॥*

अविद्यावृतत्वात् क्षेत्रज्ञशक्तिः सर्वभूतेषु तारतम्येन प्रतीयते ।

*शक्रः समस्तदेवेभ्यस्ततश्चाऽति प्रजापतिः ।*
*हिरण्यगर्भोऽपि ततः पुंसः शक्त्युपलक्षितः ॥६७॥*
*एतान्यशेषरूपाणि तस्य रूपाणि पार्थिव ।*
*यतस्तच्छक्तियोगेन युक्तानि नभसा यथा ॥६८॥*

इन्द्रः सर्वदेवेभ्योऽधिकः । ततोऽपि प्रजापतिः । ततोऽपि हिरण्यगर्भः । इत्येवं तारतम्येन पुरुषशक्त्या सर्वे उपलक्षिता भवन्ति । इदं सर्वं तस्य पुरुषस्यैव रूपं भवति । यथा आकाशेन सर्वभूतानि ओतप्रोतभावेन व्याप्तानि सन्ति, तथैव अस्य जगतः सर्वस्याऽपि विष्णुशक्तिसम्बन्ध एवाऽवष्टम्भः ।

*द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते ।*
*अमूर्तं ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः ॥६९॥*
*समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।*
*तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥७०॥*

तस्य विष्णुसंज्ञस्य परमात्मनो यद् द्वितीयं रूपं तद्योगिनो ध्यायन्ति । तद् ब्रह्मणः अमूर्तं रूपम् । तत्त्वज्ञाः तत् सदिति व्याचक्षते । एताः सर्वाः शक्तयः तदेवाऽऽश्रित्य तिष्ठन्ति । तद् विश्वरूपाद् विलक्षणं श्रीहरेः अन्यद्रूपम् ।

पुनस्तत्र तेन केशिध्वजेन खाण्डिक्यं प्रति योगी ध्यानकाले स्वचित्ते श्रीहरेर्यद्रूपं धारयेत तद्रूपमेवं वर्णितमस्ति -

*यच्च मूर्तं हरे रूपं यादृक् चिन्त्यं नराधिप ।*
*तच्छ्रूयतामनाधारा धारणा नोपपद्यते ॥७९॥*
*प्रसन्नवदनं चारु पद्मपत्रोपमेक्षणम् ।*
*सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ॥८०॥*
*समकर्णान्तविन्यस्तचारुकुण्डलभूषणम् ।*
*कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम् ॥८१॥*
*वलित्रिभङ्गिना मग्ननाभिना ह्युदरेण च ।*
*प्रलम्बाष्टभुजं विष्णुमथवाऽपि चतुर्भुजम् ॥८२॥*
*समस्थितोरुजङ्घं च सुस्थिताङ्घ्रिवराम्बुजम् ।*
*चिन्तयेद् ब्रह्मभूतं तं पीतनिर्मलवाससम् ॥८३॥*
*किरीटहारकेयूरकटकादिविभूषितम् ।*
*शार्ङ्गशङ्खगदाखड्गचक्राक्षवलयान्वितम् ॥८४॥*
*वरदाभयहस्तं च मुद्रिकारत्नभूषितम् ।*
*चिन्तयेत्तन्मयो योगी समाधायाऽऽत्ममानसम् ॥८५॥*
*तावद्यावद्दृढीभूता तत्रैव नृप धारणा ।* *(वि.पु. ६-७)*

एवं वर्णितप्रकारेण भगवतो दिव्यमङ्गलं रूपं अविच्छेदेन ध्यायन् तत्रैव हृदयं हृदये च धारणां दृढीकुर्यादिति । एतां रूपासक्तिं यावन्मात्रं दृढीकुर्यादिति चेत् -

*व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ।*
*नाऽपयाति यदा चित्तात् सिद्धां मन्येत तां तदा ॥८७॥* इति ।

## गुणमाहत्म्यासक्ति रूपासक्त्योर्वर्णनस्य उपसंहारः

१४८. भगवान् नानारूपवत्सु नानागुणवत्सु च भुतेषु सर्वेषु परिपूर्णो यतोऽ तः गुणवानिव रूपवानिव च प्रतीयते ।

*भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत् ।*
*धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥* *(वि.पु. ६-५-८२)*

सर्वेषुभूतेषु स्वयं वसति, एवं सर्वाणि भूतानि स्वस्मिन् वासयतीत्यतः तथा जगतः सर्वान् प्राणिनः सृष्ट्वा तान् रक्षतीत्यतश्च तस्य वासुदेवः इति नाम भवति ।

*स सर्वभूतप्रकृतिं विकारान्*
*गुणादिदोषांश्च मुने व्यतीतः ।*
*अतीतसर्वावरणोऽखिलात्मा*
*तेनाऽऽस्तृतं यद्भुवनान्तराले ॥* *(वि. ६-५-८३)*

सः सर्वभूतप्रकृतीः प्रकृतिविकारान् तद्‌गणान् तद्दोषांश्च अतीत्य वर्तते । तस्य न किञ्चनाऽऽवरणमस्ति । तं न किमप्याऽऽवृणोति । स सर्वस्याऽप्याऽऽत्मा भवति । जगत्स्थानि स्थावरजङ्गमानि सर्वाण्यपि तेन व्याप्तान्येव भवन्ति ।

*समस्तकल्याणगुणात्मकोऽसौ*
*स्वशक्तिलेशावृतभूतवर्गः ।*
*इच्छागृहीताभिमतोरुदेहः*
*संसाधिताशेषजगद्धितो यः ॥८४॥*

सः सकलकल्याणगुणाकरः स्वशक्त्यैकांशेन सकलभूतसर्गं व्याप्य

तिष्ठति । स्वेच्छामात्रेण स्वाभिमतं महाशरीरं गृण्हाति । जगद्धितं च साधयति ।

*तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः ।*
*परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥८५॥*

स भगवान् तेजः बलं ऐश्वर्यं महाज्ञानं सुवीर्यं शक्तिः एवमादीनां गुणानां एकस्थैकराशिः । सर्वमायापरप्रकृतेरपि परमः । तस्मिन् परमेश्वरे क्लेशकषायादिकं किमपि मलं नास्त्येव ।

*स ईश्वरो व्यष्टिसमष्टिरूपो व्यक्तस्वरूपोऽप्रकटस्वरूपः ।*
*सर्वेश्वरः सर्वदृक् सर्वविच्च समस्तशक्तिः परमेश्वराख्यः ॥८६॥*

स ईश्वरो व्यष्टिरूपेण समष्टिरूपेण च वर्तते । अव्यक्तरूपेण प्रकटरूपेण च भवति । सः सर्वेषामधिपतिः सर्वसाक्षी सर्वं विजानाति । सः सर्वशक्तीनां मूलम् । तस्य परमेश्वरः इति नाम । इत्येवं प्रकारेण केशिध्वजः खाण्डिक्यजनकाय भगवत्स्वरूपं समबोधयत् । इत्थं च स्वयं निर्गुणो नीरूपोऽपि सन् सः सर्वान् गुणान् समस्तानि रूपाणि च स्वेच्छामात्रेण प्रकाश्य प्रदर्शयितुं समर्थो महामहिमा समास्ते । यत्र यत्र भक्ताः प्रेम्णा आह्वयन्ति तत्र तत्र तत्तन्मनीषितरूपेण च प्रकटीभवति । इत्थं च -

*यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो*
*बौध्दा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।*
*अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः*
*सोऽयं वो विदधातु वांञ्छितफलं त्रैलोक्यनाथो हरिः ॥*

लोके नाना मतीया जनाः स्वस्वसंस्काराभिरुच्यनुगुणं शिवः विष्णुः ब्रह्मा बुद्धः कर्ता अर्हन् कर्म इति, तथा गणेशः दुर्गा सूर्यः

पराशक्तिः जेहोवः परमपिता अल्लाहः आर्मस्ड् इत्यादिभिः गुणनामभिः तं समाह्वयन्ति । इत्थं नानारूपैः कल्पितो भगवानेव नानानामभिः परिख्यायते । इति ।

## ३. पूजासक्तिः

१४९. अथ पूजासक्तिर्नाम भक्तेस्तृतीयः प्रकारः । भगवत्प्रियं स्वस्य चेष्टं मनोहरं भगवद्रूपं मनसि चिन्तयित्वा चिन्तयित्वा भक्तेन केवलं तूष्णीं आसितुं कथं शक्यते ? तथा सार्थक्यं च न लक्ष्यते । परमात्मनो दासेन स्वामिनः सेवाकैङ्कर्यं कर्तव्यं भवति खलु । अन्यथा भक्तजीवितमेव व्यर्थमपगच्छति । अतः पूजाराधनं समारभेत । भगवता भक्तजनानुग्रहार्थं परिगृहीतं द्विव्यरूपप्रतीकं काञ्चन मूर्तिं स्वलङ्कृत-मण्डपे उच्चासने संस्थाप्य मनः समाधाय सङ्कल्पपूर्वकं विधिवदाराधयेत् । इयमेव पूजासक्तिः । प्रीतिपुरस्सरमेव षोडशोपचारान् विदध्यात् । आदौ ध्यानम् । तत आवाहनम् । अनन्तरं आसनं प्रति-गृह्यताम् इति समर्पयेत् । स्वागतोपचारेण पूर्वं पादयोः पाद्यं, हस्तयोरर्ध्यं, मुखे आचमनीयं च समर्प्य मधुपर्कसत्कारं परिकल्पयेत् । ततः परिमलेन तैलेन साङ्गां मूर्तिं मार्जयित्वा अभ्यङ्गस्नानं विधाय अथ मन्त्रपुरस्सरं मलापकर्षणपञ्चामृताभिषेकस्नानं कारयित्वा पुनः शुद्धोदकाभिषेकं कुर्यात् । ततः पट्टवस्त्रं पीताम्बरं धारयित्वा यज्ञसूत्रं आरोपयेत् । ततो गन्धानुलेपनाक्षतारोपणभूषणाद्यलङ्कारं मङ्गल-द्रव्याणि च समर्प्य परिमलपुष्पं तुलसीदलानि बिल्वपत्राणि वैज-यन्तीमालां च समर्पयेत् । अथाऽङ्गपूजां नामपूजां च कृत्वा धूपमाघ्राप्य दीपमुद्योतयेत् । ततो महानैवेद्यं भक्ष्यभोज्यपक्वफलपानीयादिकं निवेदयेत् । ततो मुखवासितताम्बूलं पूर्णफलसुवर्णपुष्पदक्षिणाश्च समर्पयेत् । अथ वेदोक्तमन्त्रपूर्वकं मङ्गलवाद्यघोषपुरस्सरं आर्तिक्येन नीराजायेत् । मन्त्रपुष्पमन्त्रैः पुष्पाञ्जलिं अभिवर्षेत् । प्रणिपातपरस्सरं

दीर्घदण्डनमस्कारं साष्टाङ्गप्रणामं च कृत्वा ततः प्रसन्नार्ध्यं पुनरर्ध्यं च दत्वा प्रार्थयेदेवम् -

*संसारसागरे मग्नं सुदीनं करुणानिधे । (पुरुषोत्तम)*
*कर्ममोहपरीताङ्गं मामुद्धर भवार्णवात् ।। इति ।*

ततः पूजामध्ये सम्भावितन्यूनातिरिक्तदोषापराधं क्षमस्वेति प्रयाचेत । ततः कायेन वाचा मनसेति पूजाकर्म भगवति समर्पयेदिति । एवं प्रत्यहं प्रीतिपूर्वकं पूजाराधनकर्तारो ये धन्यास्त एव हि ।

एवं बाह्यपूजाविधाने दारिद्र्येणाऽथवाऽशक्ततया पूजासामग्रीषु न्यूनत्वसम्भवेऽपि मानसपूजाविधिना भगवदाराधने न किञ्चित् परिहीयते । समग्रमेव सम्पद्यते । किरातस्त्री शबरी परिशुद्धेन मनसा पूजार्थं केवलफलवस्तूनि समकल्पयत् । तावद्भिरेव पूजा साङ्गाऽभवदिति भगवान् श्रीरामः समतुष्यत् । यद्यपि भक्ताः भगवतः कियन्तं पूजोपचारं कृत्वाऽपि सन्तुष्टाः न भवन्ति ; परंतु भगवान् -

*पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।*
*तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।।* (गी. ९-२६)

इत्याह । अतो भगवान् पूजासक्त्या बहुसुलभः । इति ।

## ४. स्मरणासक्तिः

१५०. भक्तेश्चतुर्थः प्रकारः स्मरणासक्तिरिति । शरीरकृत-पूजासेवापेक्षया मनसा क्रियमाणं स्मरणं अधिकपरिणामकारि भवति । पूर्वमपि मानसपूजाविषय उक्तः । अथाऽप्यत्र विशेष उच्यते । क्लृप्ताकारपूजाभावेऽपि मनसि केवलस्मरणेन भक्तानां पुरुषार्थः सिद्ध्यति ।

*हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।*
*अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः ।।*

इत्युक्तप्रकारेण पापपुरुषैरपि श्रीहरिः स्मर्यते चेत् तेषामपि पापानि तत्कृपया नश्यन्त्येव । अज्ञात्वा स्पृष्टोऽपि वह्निः दहत्येव हि । महापातकिकृतभगवत्स्मरणे तत्फलं सद्यो नाऽवगम्यते । यथा पथि सञ्चारसमये कदाचिद् अणुकः स्फुलिङ्गः पादेन आक्रान्तश्चेत् तस्यौष्ण्यं तदानीमेव न ज्ञायते पादचर्मणः अतिमन्दत्वात् । तथा पापिकृतस्मरणस्य कालान्तरे फलं भवत्येव । उक्तं हि गीतासु -

*अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।*
*साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ।।*
*क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।*
*कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ।।*
*मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।*
*स्त्रीयो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ।।*
*किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।*

*(गी. ९-३० तः ३४)*

इति । पापयुक्तो दुराचारोऽपि पुरुषः भगवन्नामस्मरणमहिम्ना दैवाद्विवेकं प्राप्य पापात् विनिवृत्य पश्चात्तप्तः सन् "त्वमेव शरणमिति" भगवन्तं मनसा भजति चेत् तादृशोऽपि सः कालक्रमेण साधुमार्गमनुसरन् भक्तिमहिम्ना परमपुरुषार्थार्हो भवति । परंतु अहं भगवन्तं भजामि, अतो दुराचारी सन्नपि बाधकं नास्ति इति विपरीतबुद्धिं न कुर्यादेव । स्ववर्तनमसमीचीनमिति ज्ञाते अनुपदम् एव दुराचारात् संनिवर्त्य सद्यः भगवत्स्मरणे तत्परो भवेत् । भगवद्भक्ताः कदाचिदपि नाऽधोगतिमुपयान्तीति दृढं विश्वस्य ततः प्रभृति स्वचित्तं भगवदभिमुखमावर्तयेत् । मनसा कृतस्य स्मरणस्य फलमवश्यं भवेदेव । भगवत्स्मरणं त्रिविधम् । स्वरूपस्मरणम् । रूपस्मरणम् । नामस्मरणम् । इति । तत्र स्वरूपस्मरणं उत्तमम् । येन स्वरूपस्मरणं कर्तुं न शक्यते तस्य मध्यमं

रूपस्मरणं फलदायकम् । तत्राऽप्यशक्तस्य तृतीयं नामस्मरणं साधनम् । तेन क्रमशः परभक्तिप्राप्तिप्रत्याशा स्यात् । इति ।

## ५. दास्यासक्तिः

१५१. भक्तेः पञ्चमः प्रकारो दास्यासक्तिरिति । एतां दास्यासक्तिं लोकरूढ्या न मन्येत । लोके भृत्यपुरुषः केवलं वेतनानुगुणं स्वामिकार्यं करोति । न तथा दास्यासक्तिः । भृत्यपुरुषः अहमियत्कर्म कृतवानस्मि । अस्य वेतनमियत् प्रदातव्यमिति वदति चेत् तावन्मात्रप्रदानकार्यं सुकरम् । लोके तावत् प्रायो जनाः देवताराधनं कृत्वा मह्यमिमं वरं देहीति प्रयाचन्ते, ततः कामं च लभन्ते । एवं प्राक् प्राभृतं निश्चित्य प्रवृत्ता सेवा न दास्यभक्तिर्भवति । एष तु वणिग्व्यवहारः पूर्वत्रोक्तः । कश्चित् सेवकः स्वामिनः नित्यदास्यमङ्गीकृत्य दिवानिशं अनवरतं स्वामिसेवां करोति, तत्सेवाफलत्वेन सेवकाय स्वामी किमपि दातुमिच्छति । परंतु स सेवकः दीयमानमपि मम मास्तु इति ब्रूते यदि तादृशे किङ्करविषये कथमहं उपकारस्य अनृणी भवानीति प्राप्तोपकारस्य स्वामिनः महती चिन्ता प्रादुर्भवति खलु । एतदेवं नित्यदास्यं नाम लौकिकस्वामिनोऽपि इयतीं समस्यां जनयति चेत् तर्हि ब्रह्माण्डस्वामिनो दयामयस्य सतः भगवतः कियन्तं भावपरिणामं सञ्जनयेत् ? भगवत्सेवायाः अनर्घतां तथा भगवन्महिम्नः पारम्यं च विदितवतां परभक्तानां अभिप्रायस्तु -

*मज्जन्मनः फलमिदं मधुकैटभारे*
*मत्प्रार्थनीयमदनुग्रह एष एव ।*
*त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य*
*भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥* (मु.मा २५)

भगवतः साक्षाद्भृत्यो भवेयमिति न कोऽपि मम हठः । किं तु

तद्दासपरम्परायां अयमप्येको दास इति भगवान् मां प्रत्यभिजानाति चेत् तावतैवाऽलमिति । भगवद्भक्तिरेका दृढा स्याच्चेत् तदाऽन्यैः किं प्रयोजनं इति च भक्तानां भावना भवति । यः साधुर्भृत्यः स एव समर्थो भर्ता इतीयं लौकिकी गाथा । यतो भगवद्दासदासा अपि लोके मान्या भवन्ति ।

## ६. सख्यासक्तिः

१५२. सख्यासक्तिर्नाम भक्तेः षष्ठः प्रकारः । एतं प्रकारमनु वर्तमानाः भक्ताः भगवन्तं स्ववयस्यं क्रीडासखं मन्यन्ते । सख्यौ स्वदोषान् गोप्यार्थं च अनपवार्य प्रकाशयन्ति खलु । तथैव भगवति स्वापराधानुद्धाट्य हे दयाघन, मम सर्वापराधान् क्षमस्वेति प्रयाचन्तो विस्रब्धा भवन्ति भक्ताः । किं च, स एव मत्सखा परमात्मा इह जगद्व्यवहारं नाम नाटकखेलां आरब्धवानस्ति । तस्यां क्रीडायां वयं सर्वे पात्रधारिण इति भक्ताः सम्यग्जानन्ति । अहो पश्यत । स एवाऽत्र विश्वसंसाराख्यं नाटकसञ्जवनं निर्मितवानस्ति । अस्मिन् सञ्जवनविताने नानाविधाः वर्णरञ्जिताः अगणिताः अश्वकाः आन्दोलिताः सन्ति । तेषामुपरि असंख्याः जीवाः आरूढाः । इदमद्भुतं चक्रयन्त्रम् । कीलकचालनेनेदं चक्रं विश्वतः परिभ्रमति । एते अश्वकाः परितो भ्राम्यमाणाः तानारूढान् एकैकमनु सर्वांश्च भ्रामयन्ति । इमानि विचित्राणि चक्राणि । कानिचिदूर्ध्वं क्रामन्ति, कानिचिदधः अवतरन्ति । केचन अश्वारोहाः ममाऽश्वः ऊर्ध्वं गत इति उत्साहेन विजृम्भन्ते । अधोगताः विषीदन्ति । अन्ये केचित् गतिविभ्रंशिताः अधो निपतन्ति । तान् दृष्ट्वा अन्ये परिहसन्ति । एके व्यथन्ते । इतरे परिदेवयन्ति । एवमाक्रोशनिर्घोष-सङ्कटसङ्कुले तुमुलप्रायेऽपि कूर्दने तद् यन्त्रचक्रं निरन्तरं भ्रमत्येव । हन्त, चक्रं स्थगितम्, खेला अवसिता । एकः सृष्टिकल्पोऽतिगतः । एवं महाक्रीडायां वर्तमानायां भक्तः आत्मानमपि किञ्चन क्रीडनकमिति सुष्ठु संस्मरत्येव । तस्यां नाटकक्रीडायां जये पराजये च भवितव्यं

किमपि नास्ति । उभयमपि सममेव । क्रीडाकुशलः पुरुषः क्रीडायामवजितोऽपि रुष्यति किम् ? शोचति किम् ? नहि । एवं भक्ताः अस्मद्वयस्येन भगवता विचित्राः क्रीडाः प्रपञ्च्यन्ते इत्याश्वस्ता एव भवन्ति । स विभुः कदाचिन्नाटकं संविधाय कांश्चन राजरूपान् कांश्चन मन्त्रिरूपान् कांश्चन सेनापतीन् निर्मिमीते । अन्ये सैनिका इति अपरे प्रजा इति वेषान् धारयन्ति । नाटकखेलायां राजा वा चेटो वा न तारतम्यमस्ति । विनोदेन कालयापनमेव मुख्यम् । दरिद्रनेपथ्यमपि नाटकं, धनिकनेपथ्यमपि नाटकम् । सुरूपो वा कुरूपो वा । लोकः श्लाघन्तामथवा परिवदन्तु । सर्वं सममेव । अखिलं नाटकमेव हि । प्रेक्षकाणां मनस्तुष्टिमनु अभिनयः कर्तव्यः । तेन स्वस्व भूमिकायाः साफल्यं जातमिति नटो यथा तुष्टो भवति तथा भक्तोऽपि । अस्य नाटकस्य भगवानेव सूत्रधार इति सः संस्मरत्येव । एतेन तस्य सर्वत्र संविधाने आनन्द एव भवति । स भगवान् कदाचिन्निलायनक्रीडां वितनोति । तत्र कदाचित् स्वयं निलयते । कदाचित् सर्वे निलीनास्तिष्ठन्ति । एवं निरन्तरं परस्परान्वेषणप्रबन्धः प्रचलत्येव । स क्वचिदन्विष्टोऽपि न लब्ध इति रुदितं, कदाचित्तल्लाभेन हसितं च भवति । सर्वमिदं लीलाविनोदप्रहसितमेव । अहो, किमिदमाश्चर्यं भगवल्लीला विनोदवैचित्र्यम् । इति ।

## ७. वात्सल्यासक्तिः

१५३. परमात्मानं स्वपुत्रं मत्वा मातापित्रोः औरसे पुत्रे वात्सल्यमिव तस्मिन् लालनादिभिः प्रेमप्रदर्शनमेव वात्सल्यासक्तिरुच्यते ।

*कुञ्चितैः कुन्तलैर्भ्राजमानाननं*
*रत्नमौलिं लसत्कुण्डलं गण्डयोः ।*
*हारकेयूरिणं कङ्कणप्रोज्ज्वलं*
*किङ्किणीमञ्जुलं श्यामलं तं भजे ॥* (अच्युताष्टके ८)

माता यशोदा बालकृष्णस्य प्रीत्यासक्ता परिकर्म कृत्वा तस्य श्रीरूपं प्रेमनिर्भरा यथा पश्यति स्म, तथा भक्तो मनसि तादृशं रूपं निध्यायति । बालकृष्णस्य श्रीमुखं चूर्णालकैः परिशोभते । रत्नकिरीटं तत्सौन्दर्यं परिवर्धयति । कपोलयोः लम्बमाने रत्नकुण्डले विद्योतेते । ततश्च तस्य श्रीमुखलावण्यं अनुपमं विराजते । ग्रीवायां रुचक-मुक्ताहारौ, भुजयोः केयूरालङ्कारौ, करयोः प्रतिसरकङ्कणे, पादयोः किङ्किणिकानूपुरौ इत्येवं मनोहरालङ्कारमण्डितं श्यामसुन्दरं श्रीबालकृष्णं स्वसूनुरिति मनस्येव विभाव्य भक्तास्तं वात्सल्यातिशयेन उपलालयन्ति । तेन सार्कं क्रीडनाय सदोत्सुकाः भवन्ति । तस्मिन्नुत्साहे प्रेमरसः उदञ्चति ।

प्रायेण सर्वेषामपि मुग्धबालकेषु निमित्तं विना प्रेम उद्भवति । एतत्प्रेम न कामनाकृतं न वा भयकृतं । यतोऽर्भकान् दृष्ट्वा न भयसम्भवः । शास्त्रपण्डितेषु यथा गौरवबुद्धिरुदेति न तथा बालकेषु । बालाः अस्माकं कमप्युपकारं करिष्यन्तीति प्रतीक्षाऽपि न स्यात् । अथापि मातरः पितरश्च पुत्रेषु प्रीयन्ते । तद्धिताचरणायाऽनिशं प्रयतन्ते । पुत्रहितार्थं यत्किमपि कष्टं स्वयं निर्वोढुं सज्जास्तिष्ठन्ति । मुमूर्षुः पुत्रः उज्जीविष्यति चेत् स्वप्राणानप्युत्स्रष्टुं अध्यवस्य तथैव देवे प्राभृती-कृतवतोः पित्रोः कथा इतिहासेषु शृणुमः । बालो मुग्धवचनान्यालपन् सम्भ्रमादागत्य गात्राङ्कमारुह्य परिलुठन् मन्दस्मितेन मुखं पश्यति चेत् तदा तन्माता आनन्दाम्बुधौ निमज्जति । एतादृशबालदर्शनेन कस्य वा प्रीत्युद्गमो न स्यात् । मुग्धबालानां दर्शनमात्रेण कीदृशस्याऽपि जनस्य मनः सद्यो द्रवीभवति । अत एव सन्तानहीनानां गृहं पितृवनसदृशमिति वाचोयुक्तिः । एवं च ईदृग्बालोपलालनरूपं प्रेम भगवद्विषयं चेत् सा वात्सल्यासक्तिरिति ।

भगवानपि स्वभक्तविषये मुग्धबालवदेव आचरति । यतः स सर्वशक्तोऽपि भक्तहस्ताङ्गुलिमवलम्ब्य प्रचलति । गत्यागतिरहितः

सर्वव्याप्तोऽपि स्वभक्तप्रीत्यर्थं दोलामधिशेते । इत्येवमादीन् बाल-लीलाविनोदान् वितन्वन्तं तं पुनः पुनः अलङ्कारैरलङ्कृत्य नूतन वस्त्राकल्पैर्मण्डयित्वा केशचूडां सारयित्वा स्वादूनि भक्ष्यफलादीनि तस्मै दत्वा प्रीणयन् भक्तः सर्वदा स्वबालः स्वपुरतः एव तिष्ठत्विति वाञ्छति ।

*मत्सर्वस्व मदीयजीवित मम प्राणाम्ब तातेति तं*
*प्रेम्णा या हि मुहुश्चुचुम्ब जननी यो वा हरिर्बालिशः ।*
*स्मेरास्यः किमपि ब्रुवन् निजजनन्यालोकनादुल्लल -*
*ल्लीलाजालमधत्त चाऽऽदितनयस्तस्यै च तस्मै नमः ॥*

(चम्पूभागवते)

अत्र यशोदायाः वात्सल्यासक्तिः सुन्दरतयाऽभिवर्णिता । एवं प्रियजने भूयो भूयः किमपिकिमपि लीलाजालमातन्वतः अहो श्रीहरेः अनुग्रहभारः । एवमेव प्रायो भागवते अभिवर्णयतो महामुनेः शुकस्य हृदयस्थप्रेम्णोऽगाधता कियतीतीदं विषयासक्तचेतसां अज्ञेयमेव । अस्तु तत्, अद्यतनानामस्माकं मुग्धा बालाः सन्त्येव खलु । तेष्वेव परमात्मदृष्टिं कर्तुमभ्यस्यते चेत् सैव वात्सल्यासक्तिर्नूनम् । बालानां क्रीडालीलादिकं दृष्ट्वा तोषमनुभवितुं शिक्षेत । इतरेभ्यो बालेभ्यः स्वपुत्रोऽधिकसुन्दर इत्यभिमानं तु सन्त्यजेत् । योऽयं बालकृष्णः पूर्वं गवां वत्सानां तथा गोपबालानां च वेषं धत्ते स्म, तथाऽद्य स एवाऽस्मत्कृते सर्वबालरूपं धृतवानस्तीति भावनां हृदये आदध्यात् । तदानीं अस्मन्मन एव अन्यादृशं परिणामं समाप्नोति । तदैव खलु प्रेमार्थं प्रेम इत्यस्य अर्थः सम्यगवबुध्यते । तथा भगवति गौरवभीतिकामादिरूपं हित्वा प्रेममात्रं अवशिष्यते । एवं देवः सर्वज्ञः सर्वशक्तः नित्यशुद्धबुद्धमुक्तस्वभाव इति चिन्तयतां साधकानां स्वयं अवर एवेति, तथा दीनतार्ततारहितैः सः नैव प्राप्यते इत्यपि सुविदितं भवति । द्विव्यसुन्दरः सर्वकल्याणगुणसम्पन्नो भगवान्

अस्माकं मुग्धः कुमारः इति यस्मिन् क्षणे भावना उदेति, तदैव सा सर्वा भावना प्रेमनाम्नि एकस्मिन्नेव रूपे एकीभवति । परभक्तिर्नाम का इत्यपि मनसि संस्फुरति । इति सप्तमो वात्सल्यासक्तिप्रकारः ।

## ८. कान्तासक्तिः

१५४. भक्तेरष्टमो रूपविशेषः कान्तासक्तिर्नाम । अत्रत्यो विशेषः क इति चेत् । पूर्वोक्तेषु प्रकारेषु यत्र क्वाऽपि रूपे कान्तासक्तिवत् प्रेम नोज्ज्वलं प्रकाशते । लोके कान्तासक्तेः गरीयः प्रेम जनाः न जानन्त्येव । शृङ्गाररसप्रधानेषु कल्पितकथारूपेषु नायिकानायकयोः प्रेमसंविधानस्य वाचनसमये पाठकः सा कल्पिता कथा इतीदमपि विस्मृत्य क्षुधातृषानिद्रादिकं चाऽगणयित्वा पठतीतीदं दृश्यते चेत् कथञ्चि दभ्यूहितुं शक्येत यदस्य प्रेम्णो बलं कीदृगिति । अनेन प्रेममहिम्ना मनुष्यस्य स्वभाव एव व्यत्यस्यते । कान्तः प्रेयस्याः कृते यत्किमपि साहसं कर्तुं न बिभेति । यत्किमपि दुःसाध्यं कार्यं कर्तुं न परावर्तते । एव मेव कान्तास्त्री अपि रमणस्य कृते स्वजीवितमपि अगणयित्वा साहसं कर्म कर्तुमुद्युक्ता भवति । ईदृशं कान्तासक्तिरूपं प्रेम भगवति कुर्वीत । यतः स एवाऽस्माकं पतिश्च गतिश्च भवति । तस्य लोकपतेः अत्रत्याः सर्वे प्रेमकुर्वाणाः स्त्रीपुरुषाः यथार्थतः कान्ताः एव भवन्ति । कान्ताभक्तिरित्युक्ते पुमानपि स्त्रीवदाकल्पं धृत्वा शृङ्गारप्रियतया नैजं धैर्यं पौरुषं च क्वचिच्चँात्वालमूले विन्यस्येत् इति नाऽभिप्रायः । व्यवहारे सर्वत्र धीरःपुरुषः सन्नेव स्वहृदये स्त्रीजनवत् भगवति प्रेम कर्तुं शक्नोति एव । साध्वी स्त्री स्वहृदयसर्वस्वं कान्ताय समर्पयति खलु । तस्याः हृदयं कान्तं मुक्त्वा अन्यत्र न प्रचरति । तस्याः चिन्ताविषयः सर्वोऽपि स्वकान्तमेवोद्दिशति । कान्तो गृहे तिष्ठतु वा मा वा । स्वयं तु एकेन मनसा पतिगृहकार्याणि सर्वाणि सुरीत्या निर्वहति । कान्तः कदा नु गृहमागमिष्यतीति तं उपद्वारं प्रतीक्षते । आगतश्चेत् पादयोर्जलं दत्वा

उपाहारदानेन प्रीणयेयमिति त्वरते । तस्याः सर्वं लक्ष्यं पतिसुखं प्रति । स पतिः सर्वदाऽऽत्मानं पत्नीति विश्वस्य स्वकृतां प्रीतिं स्वीकरोति चेत् तावतैवाऽलमिति मन्यते इतीदं लोकप्रसिद्धम् । ईदृशी प्रीत्यासक्तिः स्त्रियाः वा पुरुषस्य वा भगवद्विषया चेत् सैव कान्तासक्तिः ।

अस्याः कान्तासक्तेः रहस्यं यो विजानाति स उपांशु एवं प्रार्थयते । "हे देव, मम न किमप्यपेक्षितम् । सर्वदा तव प्रीतिर्ममोपर्यस्तु । ममाऽन्यविषयरागविस्मारणं भवेत्, त्वय्येव प्रेम वर्धताम्" इति । लोके अस्मदीयं विवाहादिसुखं कियच्चिरं कियद्दूरं अनुवर्तेत ? केवलदेह-सम्बन्धनिमित्तकं बान्धव्यं विश्वसिमः चेत् तदपि कति दिनान्यव-तिष्ठेत ? किं च, सम्यङ्निभाल्यमाने दम्पत्योरपि प्रेम न पत्यर्थं न वा पत्न्यर्थं भवति । आत्मार्थमेव भवति । अर्थात् अस्माकं सर्वेषामात्मभूतौ यः परमात्मा तदर्थमेवेति वयं सर्वे अविदितक्रमेण तस्मिन्नेव प्रेम कुर्वाणाः स्मः । परंत्विमं परमार्थं सामान्या जना न जानन्ति । अपरं च मनुष्ये दृश्यमानं आकर्षकं सौन्दर्यं कुत्रत्यम् ? भौतिकस्य देहस्येति वक्तुं न शक्यते । वस्तुतो देहस्य चेत्तर्हि कुणपे किं न स्यात् ? कुणपं विकारं कथं ? मृण्मयरूपे देहे सौन्दर्यकान्तिः कुतः ? अतो यत्र यत्र लोके सौन्दर्यं दृश्यते तत्सर्वं भगवदीयमेवेति विनिश्चयः । गोपालकृष्णरूपेण षोडशसहस्रस्त्रीणां मनांसि युगपदेव समाकृष्टानीति चेत् तत्सौन्दर्यं कीदृशं भवेत् । अन्यच्च तस्य मोहिनीरूपेण त्रयस्त्रिंशत्कोटिदेवाः तथाऽसुराश्च सर्वे सम्मुग्धाः इति चेत्, तत्सौन्दर्यं किमिति मन्यामहे ? एवं इच्छामात्रेण दिव्यसुन्दराकारं धारयमाणो भगवानेव परमपुरुषः सर्वेषां प्रियदर्शिनां स्त्रीपुरुषाणां यथार्थतः पतिः भवति । तस्मिन् मङ्गलमूर्तौ प्रीयमाणाः मृदुहृदयाः सर्वे पुरुषा अपि तस्य कान्ता एव भवन्ति । हे प्रभो, "अद्यपर्यन्तमहं भवत्तत्त्वमजानन् त्वयि प्रणयं वहामीति तु तथ्यम् । किं त्वद्य तव याथार्थ्यं विदित्वा प्रीणयामीत्यतः अहं तव यथार्था कान्ताऽस्मि । भवदीयं प्रियजनमिमं

इतः परं अज्ञानतमसि मा पातय । मम हृदये सर्वदा विद्योतमानो भव ।" इति प्रार्थनमेव कान्तासक्तिरिति ।

## ९. आत्मनिवेदनासक्तिः

१५५. भक्तेर्नवमं रूपं आत्मनिवेदनासक्तिरिति । इमं स्तरमारूढो भक्तः कर्तृत्वाभिमानरहितो भवति । अतः परमात्मप्रीणनस्वातन्त्र्यमपि तस्मिन्नेव समर्पितवान् भवति । "तं महामहिमानं प्रीणयामीति वक्तुं अहं कियान् ? मयि प्रीत्यनुग्रहं कृतवान् स पुरुषोत्तमः । तदनुग्रहं विना अयं प्रीतिमार्गोऽपि मम कथं प्राप्येत ।" इत्येव चिन्तयति सः ।

*तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।*
*ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥* *(गी. १०-१०)*

मां प्रीणयतां भक्तानां अहं तेभ्यो मत्प्राप्तिबुद्धिमेव ददामीति खलु भगवन् प्राह । अतो भक्तिमार्गाश्रयप्रकारोऽपि यथा सुकरो भवेत्तथा प्रकर्तापि स एव । तेन मम दत्तानि देहेन्द्रियमनांसि तत्प्रेम्णि विनियुज्य अहं कृतार्थो भवामीति सङ्कल्पोऽपि "तटाकजलं तटाके निक्षिप्य सूर्याय अर्घ्यं दत्तवानहमिति" अभिमानसममेव स्यात् । इह अतदीयं वस्तु तस्मै दातुमशक्यमेव । अन्ततश्च अस्य मम आत्मैव तदीयोऽस्ति । अत इमं जनं सःस्वच्छन्देन विनियोक्तुं प्रभवत्येव । सः सर्वस्वतन्त्रः । मम प्राणाः इह धरन्तु, देहेन्द्रियादीनि व्यवहरन्तु इति नियमनकर्तापि स एवेति निश्चिनोति भक्तः ।

*एह्येहि देवेश जगन्निवास नमोऽस्तु ते माधव चक्रपाणे ।*
*प्रसह्य मां पातय लोकनाथ रथोत्तमात् सर्वशरण्य संख्ये ॥*

(म.भा.भी.प. ५९-९७)

इति भीष्मोक्त्यनुसारेण सः यथेष्टं मामवपातयति चेत्तदपि ममाऽनुग्रह एव भविष्यतीति भक्तो मन्यते । महाभारतानुशासनपर्वणि

(१४-१८३) भक्त उपमन्युः कथयति एवं - **"अपि कीटः पतङ्गो वा भवेयं शङ्कराज्ञया"** इति । तथा भक्तोऽपि यदा स्वात्मानमेव तस्मै समर्पितवान् तदा किमर्थं बिभेति ? एवं भवति किल आत्मनिवेदनासक्तिरूपा भक्तिरिति ।

## १०. तन्मयतासक्तिः

१५६. तन्मयत्वेन आसक्तिर्या सा भक्तेर्दशमं रूपम् । एषा तन्मयतासक्तिरेव आत्मनिवेदनासक्तेः परा काष्ठा ।

***प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।***
***अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥*** *(मु.उ. २-२-४)*

इति श्रुत्युपदेशः । धनुरारोप्य लक्ष्याभिमुखमायम्य शरः अस्यते चेत् स शरः लक्ष्यं प्राप्य तत्र अन्तर्भवति । तथैव ॐ कारे भगवत्पुण्यनामाख्ये धनुषि आत्मानमेव शरं कृत्वा भगवन्तमेव लक्ष्यं कृत्वा अप्रमादेन विध्यते चेत्, बाणभूतः साधकः वेगेन गत्वा लक्ष्यभूते परमात्मनि संयुज्य तेन एकीभवति ।

***यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।***
***एवं मुनेर्विजानत आत्मा भवति गौतम ॥*** *(का.उ. ४-१५)*

इति श्रुत्युक्तवत् निर्मलं जलं निर्मलजले प्रक्षिप्यते चेत् तदा तत्र इदमागन्तुकं जलं, इदं पूर्वस्थितं जलमिति विभागो न विद्यते । नवं जलं पुराणजलमेव भवति । तथैव आत्मनिवेदनं कृतवतो भक्तस्य ऊर्ध्वमधः, पुरतः पश्चात्, पार्श्वयोरिति भेदराहित्येन आत्मना सह सर्वमपि भगवन्मयं एव भवति । प्रेममयस्य भक्तस्य प्रेमरूपायां भक्तौ परमप्रेमरूपेण भगवता अभिन्नतयामापद्यमानायां सत्यां प्रेममात्रं विना किमन्यदवशिष्यते ? प्रेमानन्दो हि भगवान् ।

## ११. परमविरहासक्तिः

१५७. परमविरहासक्तिर्नाम एकादशतमप्रकारो भक्तेः । प्रेम नाम महाप्रबलं वस्तु इति विचारः शान्तस्थितिकाले न प्रकटीभवति । इष्टस्य वस्तुनो मौल्यं तस्मिन् वस्तुनि सन्निहिते स्फुटं न ज्ञायते । तदेव वस्तु कारणान्तरेण नष्टं सत् तद्वियोग आपतति चेत् तदा प्रियं वस्तु अपगतं किलेति दुःसहं दुःखमापद्यते । प्रीतिपात्रभूताः पिता वा माता वा पत्नीपुत्रादयो वा अकस्माददर्शनं गताश्चेद् अथवा मृताः स्युर्यदि तदा तद्विरहितानां बन्धूनां इह चित्तदुःख-पारवश्यं सीमातीतं भवति । दुःखपरवशानां तु स्वशरीरोपरि प्रज्ञैव परिहीयते । तथा शोकार्ताः प्ररोदनकाले द्रष्टारोऽन्ये किमभिमन्यन्ते इतीदं न लक्षयन्त्येव । रोदनेन देहायासो भवतीत्यपि न चिन्तयन्ति । धृतवस्त्राणि कच्चिच्छिथिलानि, कच्चिदधः स्रस्तानि चेत् तत्समीकर्तुं विचार एव मनसि न स्फुरति । तान् समाश्वासयितुं यः कोऽपि समीपं आगच्छति चेत् पुनश्च तद्दुःखमुल्बणमेव भवति । एवमेव कामिन्याः प्रियकरो निरीक्षिते समये तत्समीपं नोपसर्पति चेत् तस्याः मनः क्षुभ्यति । चिन्ताज्वरः तपति । तद्व्यथया देहे कार्श्यमुपजायते । तदा आहारो न रोचते । देहे औष्ण्यं वर्धते । तदात्वे पूर्वं मनसः प्रियाण्यपि वस्तूनि अप्रियाणि भवन्ति । यः कोऽपि समीप-मागच्छति चेत् अशान्तिरधिका भवति । तादृशानामन्यो विचार एव अनपेक्षितः स्यात् । प्राय एवं भवति प्रियवस्तुवियोगव्यथावेगः । एवमेव स्वस्य भगवत्प्राप्तिं प्रति ये केचित्प्रतिबन्धकाः स्युर्यदि तान् सर्वान् परिहृत्य सर्वथा परमात्मा प्राप्तव्य इत्यभ्यासपूर्वकं क्रियमाणस्य उत्कण्ठारूपस्य प्रेमप्रकारस्य परमविरहासक्तिरिति नाम । यस्य तु भक्तिस्वरूपस्याऽवबोधः ईषदपि नास्ति तस्य एतन्मार्गानुसरणेन किमपि प्रयोजनं न भवति इति स्पष्टमेव । जारिणी स्त्री गृहजनान्

वञ्चयित्वा प्रियकरं सदा चिन्तयति, तमेवाऽनुधावति च । मार्गमध्ये यः कोऽपि सुधीः विवेकमुपदिशति चेत्तदनाकर्ण्य रात्रावन्धकारे मार्गस्थान् गिरिगर्तादीन् शिलाकण्टकादीन् च अनालक्ष्य एकाकिन्येव स्वप्रियाश्रयं प्राप्स्यतीत्यत्र प्रेमवेगबलं यादृग् भवति, ततोऽप्यधिक बलं प्रेम भगवति य उत्कटरूपेण करोति सः कीदृङ्न्महात्मा स्यादिति मनस्येव पर्यालोच्यताम् । तुच्छान् विषयानुद्दिश्य चिन्तया अश्रुपातं कुर्वन्तो बहवो जनाः लोके मिलन्ति । परं तु लोकविषयाः सर्वे निस्सारा इति ज्ञात्वा तान् त्यक्त्वा च यावत्परमात्मदर्शनं भविष्यति तावत्पर्यन्तं विना मनश्शान्तिं दृढव्यवसायिनां भक्तानां दशाविपाकं विरलाः सहृदया एव जानन्ति ।

## १२. तन्मयत्वरहस्यम्

१५८. अत्र विचार्यमाणे तन्मयतासक्तिमेव अन्ते वक्तुमुचितमासीत् । यस्मात् परमात्मन्यात्मसमर्पणं कृत्वा तस्मिन्नेकीभावप्राप्तेरनन्तरं कर्तव्यं किमपि नाऽवशिष्यते । अथाऽप्यत्र परमविरहासक्तिमेवाऽन्ते विन्यसने कारणं किमिति चेत्, यदा भक्तोऽत्रोक्तेषुभक्तिप्रकारेषु यं कञ्चित्प्रकारं अवलम्बते, तदा स्वयं भगवतः सकाशात् पृथगेव स्थित्वा भक्तिं कर्तुमिच्छति । न तु क्वचित् तस्मिन्नेकीभावमाप्तुमिच्छति तथा न विभावयति च । शर्कराया माधुर्यमनुभवितुकामः पुरुषः शर्करयाऽभेदभावं प्राप्तुमिच्छति किम् ? न खलु । एवमेव भक्तस्येङ्गितं भवतीत्यनेन सूचितम् ।

*सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।*
*सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥* *(षट्पदीस्तोत्रे)*

हे प्रभो ! तत्त्वज्ञानप्राप्त्या आवयोः भेदभावे अपगतेऽपि अहं त्वदीय एव । त्वं मदीय इति तु न । तरङ्गः समुद्रसम्बन्धी भवति,

तरङ्गसम्बन्धी समुद्रः इति तु न । एवं किल विज्ञापयति भक्तः । अथापि भगवान् प्रीतिं कुर्वद्भ्यो भक्तेभ्यः स्वात्मानमेव प्रददाति । एषोऽयाचित आनन्दलाभः । वन्हिस्पर्शे दहनाभावो यथा असंभवः एवमेव भगवति उत्कटप्रेम चेत्, तत्प्रेम भक्तं भगवन्तं च न पृथग् भावेनाऽवस्थापयति । एवं स्थितेऽपि भक्तः स्वयं पृथगेव स्थित्वा भगवन्तं प्रीणातीति तथ्यमपि, अन्ते सः भगवत्येव एकीभवतीति इदं व्यवहारदृष्ट्या उक्तम् । परमार्थदृष्ट्या तु भेदभावनाकालेऽपि भक्तो भगवान् च एकः परमात्मैव भवति । भक्त्या पर्यन्ते एकीभावः प्राप्तव्य इति तु न । घटे भिन्ने घटाकाशो महाकाशेन संयुज्यैकीभवतीति लौकिकदृष्ट्या युक्तमपि वस्तुतः स घटो नाम उपाधिः आकाशकार्यमेवाऽस्तीत्यतः प्रतीतिकालेऽपि घटाकाशः महाकाशमात्रमेव भवति । आकाशात् पृथक् प्रतीयमानानि वायुः अग्निः आपः पृथिवीति भूतान्येव न पृथक्परमार्थाः खलु । कार्यस्य कारणानन्यत्वात् । तथा परमात्मना सर्वाणि भूतकार्याणि उद्भूतानीति कृत्वा परमार्थादात्मनः पृथक् किमपि वस्तु नास्त्येव । अत एव गीतासु भगवान् -

*बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।*
*वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥* *(गी. ७-१९)*

बहुजन्मनामन्ते तत्त्वज्ञानं प्राप्य वासुदेव एव सर्वमिति अपरोक्षज्ञानेन मम भक्तो भवति । स महात्मा सुदुर्लभ इति प्राह । ज्ञान दृष्ट्या विभाव्यमाने आत्मनो जन्माभावादेव एक एव वासुदेवः भगवान् भक्तः भक्तिः इति विभक्तरूपेण परिख्यायते इत्येषः परमार्थः ।

## विविधभक्तिप्रकारमनुवर्तमाना भक्ताः

१५९. एतावत्पर्यन्तमभिवर्णिताः एकादशभक्तिप्रकाराः एकस्मिन्नेव पुरुषे नियतक्रमेण वर्तेरन्निति न मन्तव्यम् । प्रारब्धकर्मवासनया एकै-

कस्य भक्तस्य एकैकस्मिन् भक्तिप्रकारे आदरः समुल्लसति । अथापि तेषां सर्वेषां भक्तिस्वरूपे न किञ्चन तारतम्यं भवति ।

*श्रीकृष्णश्रवणे परीक्षिदभवद्वैयासकिः कीर्तने*
*प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।*
*अक्रूरस्त्वभिवन्दने कपिपतिर्दास्ये च सख्येऽर्जुनः*
*सर्वस्वात्मनिवेदने बलिरभूत्कैवल्यमेषां समम् ॥*

इत्येकं श्लोकमत्र स्मरन्त्यभियुक्ताः । परीक्षिदादीनां सर्वेषां परमानन्दप्राप्तिर्नाम कैवल्यं समं प्राप्तमिति । किं च अत्रोक्तं भक्तिप्रकारं अनुवर्तमानानां नामान्येवमुदाहरन्ति चैके । नारदो व्यासश्च भगवन्महिमानं सङ्कीर्तयतः । गोपिकाः श्रीकृष्णस्य रूपलावण्येनाऽऽकृष्टा अभूवन् । अम्बरीषः भगवत्पूजायामासक्तोऽभवत् । प्रह्लादः स्मरणे तत्परः । हनूमान् दास्ये निरतः । अर्जुनः सख्येऽनुरक्तः । रुक्मिणीसत्यभामे कान्तं मत्वा तमसेवेताम् । कौसल्या च देवकी च तं पुत्रमभावयताम् । विभीषणो बलिश्च आत्मनिवेदनमकुरुताम् । सनत्कुमारो याज्ञवल्क्यः इत्यादयो महर्षयः आत्मानन्दे निर्भरा अभवन् । एवमेकैकस्मिन् एकैकः प्रकारः प्राधान्येन प्राकाशत । सर्वत्र परमविरहासक्तिः समाना । तत्रापि राधायां व्रजाङ्गनासु च सा प्राधान्येन व्यद्योतत ।

इत्थं च भक्तिप्रकारविषये अनेकान्युदाहरणानि भवन्ति । व्यवहारे सामान्यजनेषु परिदृश्यमानान् प्रेमप्रकारान् दृष्ट्वा साधकः भगवद्विषये तान् प्रकुर्यादिति तथा भगवत्येव मनः संस्थापयेदिति च ज्ञापयितुं इमे दृष्टान्ताः इति । परन्तु तेषु सर्वेषु प्रकारेषु भगवत्प्रेम समानमेवेति निदिध्यासितं उचेत् अस्य सूत्रस्य उद्देशः सार्थकः स्यादिति ।

# २०. भक्त्याचार्याणां ऐकमत्यम्

## इत्येवं वदन्ति जनजल्पनिर्भया एकमताः कुमारव्यास शुक शाण्डिल्य गर्ग विष्णु कौण्डिन्य शेषोद्धवारुणि बलि हनूमद्विभीषणादयो भक्त्याचार्याः ॥८३॥

एवं सनत्कुमारादयो भक्त्याचार्याः लोकजनविप्रलापभयरहिताः भक्तिविषयं ऐककण्ठ्येन प्रवदन्ति । उद्घोषयन्ति च ।

१६०. अत्र अनेकेषां भक्त्याचार्याणां नामानि किमर्थमुल्लिखितानि इति चेत् - भक्तिरेव परमपुरुषार्थसाधनमिति ते सर्वेऽनुमन्यन्ते इति, तथाऽस्मिन् शास्त्रे निरूपितेषु विषयेषु तेषां सर्वेषां सम्मतिरस्तीति च ज्ञापयितुं इति मन्तव्यम् ।

पूर्वं भक्तिलक्षणनिरूपणप्रसङ्गे व्यास गर्ग शाण्डिल्यानां मतं पृथक्पृथक्प्रदर्श्य अत्र पुनः तन्नाम्नामपि सङ्कीर्तनेम भक्तिस्वरूपविषये न कस्याऽप्याऽऽचार्यस्य मतभेद इति दृढीकृतं भवति ।

यो हि शास्त्राभिप्रायं व्याख्याय तस्मिन्नाचारे जनान् स्थापयित्वा स्वयमपि तथैवाऽऽचरति स आचार्य उच्यत इति स्मृतिवचनम् । अत्र सङ्कीर्तिता आचार्याः भक्तिविषये स्वतन्त्रग्रन्थान् रचितवन्तः सन्तीति निर्धारयितुं आधारग्रन्थाः नोपलभ्यन्ते, अथापि एते सर्वे स्वाचरणेनैव भक्ताग्रेसरा आसन्निति तु एतेषां नाम्नां इतिहासपुरणेषूदाहरणादवगम्यते । भक्तितत्त्वं अनुभवगम्यमस्ति यतोऽतस्तेषां महात्मनां आचरणं भक्तिसाधकानां जनानां परमादर्शो भवतीत्यत्र न कोऽपि संशयः ।

अत्र जनजल्पनिर्भया इति विशेषणेन भगवच्छरणानां तन्मयानां भक्तानां स्वविषये अन्ये जनाः किमिव मन्यन्त इत्यत्र न क्वचिद् भयं वा चिन्ता वा इति विज्ञायते । तद्दृष्ट्या तु सर्वत्र भगवानेवाऽऽनन्द-

मयः परिदृश्यत इत्ययं परमार्थः सूचितो भवति । ते एते महात्मानः परमोत्कृष्टजीवनादर्शप्राया अभूवन्निति तु आस्तिकभक्तिजिज्ञासूनां श्रुति-स्मृतिपुराणैः विदितमेव भवति ।

## भक्त्याचार्याः

अत्रोदाहृतानि नामानि कांस्कान् परामृशन्तीति निर्धारयितुं दुष्करमस्ति । अत्र कुमारशब्दः नारदाय भूमविद्याया उपदेष्टारं स्कन्दा-परनामधेयं सनत्कुमारमाचष्टे इति कल्पयन्ति केचन । ब्रह्मवैवर्त-पुराणेऽपि नारदस्य गुरुः सनत्कुमार इत्युक्त इति, वैष्णवाग्रणीः सः सदा हरिश्शरणमिति जपति स्मेति च वदन्ति । किं तु पुराणोक्तः सनत्कुमारः तथा उपनिषत्सु परामृष्ट एक एवेत्यत्र प्रमाणं तु दुर्लभम् । यत्कारणम् - ऋगादयो मन्त्राः नाममात्रा एव, नामैव ब्रह्मेत्युपासीत इति प्रथममुपदिश्याऽप्यन्ते नामरूपातीतं भूमवस्त्वेव परमार्थसत्यमिति तच्च शुद्धपरमानन्दस्वरूपमेवेति उपदिश्य उपनिषदि तत्रोपसंहारः कृतो दृश्यते ।

व्यासः शुक इत्युभावपि प्रसिद्धौ । व्यासो महाभारते श्रीकृष्णस्य माहात्म्यं भृशमभिवर्णितवान् । शुकोऽपि श्रीमद्भागवतपुरणं राजानं परीक्षितं श्रावयामासेति पौराणिकाख्याननिरूपणेन परमभागवत इत्यत्र न विप्रतिपत्तिः ।

शाण्डिल्यस्य नाम छान्दोग्ये (३-१४-४) तथा बृहदारण्यके (२-६-१) च श्रूयते । शाण्डिल्येन विरचितो भक्तिसूत्रग्रन्थोऽपि प्रसिद्धोऽस्ति । नारदभक्तिसूत्रेषु शाण्डिल्यभक्तिसूत्राणि क्वचित् कानिचित् परामृष्टानि वेति निर्धारयितुं न पार्यते ।

गर्गस्य नाम श्रुतिस्मृतिषु उपलब्धमपि अत्र ग्रन्थे परामृष्टो भक्त्याचार्यः स एवेति निर्णेतुमाधारो नोपलभ्यते ।

विष्णुस्मृतिः परं प्रसिद्धा । किं तु स्मृतिकारः सः भक्त्याचार्यः इति न प्रसिद्धः । महाभारते नारायणीयोपाख्याने विष्णुमाहात्म्यं नारदायोपदिदेश यो नारायणर्षिः, सः यद्यपि विष्ण्वंशोऽवतीर्ण इति प्रोक्तः, तथापि सः विष्णुभक्तेषु न प्रसिद्धः ।

कौण्डिन्यः शेषः इत्युभावपि भक्त्याचार्यावित्यत्र पर्याप्तः आधारो नोपलभ्यते । उद्धवो महाभक्त इति श्रीमद्भागवते प्रसिद्धः । आरुणिरिति नाम प्रसिद्धमपि सः भक्त्याचार्य इति न प्रसिद्धः । छान्दोग्योपनिषदि षष्ठाध्याये श्रुत आरुणिः कश्चन विद्याचार्य इत्येव परिज्ञायते । बलिः हनूमान् विभीषण इत्येते प्रसिद्धा भक्ता इत्यत्र न संशयः ।

तदेवमास्तां तावत् । अत्रोक्ताः सर्वे भगवद्भक्ताः सन्तो भक्तिं स्वाचारेणाऽपि प्रदर्शितवन्त इति, तथा तेषां सदाचारप्रदर्शनेन प्रकृतग्रन्थे वर्णितस्य भक्तिसिद्धान्तस्य समर्थनं तथा पुष्टिश्च भवेदिति सूत्रकारस्य इङ्गितं स्यादिति तु वयं विश्वसिमः ।

***य इदं नारदप्रोक्तं शिवानुशासनं विश्वसिति श्रद्धत्ते***
***स भक्तिमान् भवति, स प्रेष्ठं लभते स प्रेष्ठं लभते इति ॥८४॥***

श्रीनारदप्रोक्तेऽस्मिन्नुपदेशे यो विश्वासं करोति श्रद्धयाऽनुवर्तते च, सः भक्तिमान् भवति । सः भगवन्तं प्रियतमं प्राप्नोति ।

१६१. श्रद्धाभक्तिध्यानयोगैरेव सर्वस्याऽप्याऽऽत्मनो भगवतः आनन्दस्वरूपस्य अनुभवो लभ्यते इति सकलशास्त्रोपदेशसारः खलु । स एवाऽत्र शास्त्रे प्रतिपादितोऽस्ति इति विश्वस्य इमां उपदेशसरणिं ये श्रद्धयाऽनुवर्तन्ते ते सर्वस्मात् प्रियतम इति शास्त्रप्रसिद्धो यः परमात्मा शुद्धपरमानन्दः, तस्य परमात्मनः सायुज्यं लभन्ते । इति । शास्त्रमवसितमिति ज्ञापनाय स प्रेष्ठं लभते इति वाक्यं द्विरभिहितमिति ॥ शम् ॥

## ॥ इति भक्तिसूत्राणां अर्थविवरणं सम्पूर्णम् ॥

# ।। परिशिष्टम् ।।

## भक्तितत्त्वविषये कतिचिदाक्षेपाः तत्समाधानानि च

अनुभवपर्यवसायिनी भक्तिः स्वयम्प्रमाणं भवति । एतत्तत्त्वरहस्यमजानाना अव्युत्पन्नाः केचित्पुरुषाः पूर्वाग्रहेण भक्तिविषये बहुधाऽऽक्षेपान् कुर्वाणा दृश्यन्ते । अतस्तत्परिहारार्थं शास्त्रार्थस्य निर्मलता सिद्ध्यर्थं जिज्ञासुजनसंशयापनोदनाय च एकैकमाक्षेपं प्रसज्य यथाशक्ति समाधानं उदाहरामः ।

१. ज्ञानादेव हि कैवल्यमिति श्रुतिस्मृत्यादिषु उद्घोषयत्सु अत्र भक्त्यैव परमपुरुषार्थसिद्धिरिति प्रतिपादनं कथं सङ्गच्छते ? इति प्रमुख आक्षेपः । अस्याऽऽक्षेपस्य परिहारो ग्रन्थार्थविवरणप्रसङ्गेषु तत्र तत्रैव प्रायः उदाहृत एवाऽस्ति । अथाऽप्यत्र पुनः किञ्चिदुच्यते ।

परमात्मा तावत् ज्ञानानन्दस्वरूप इत्येतत्-सत्यं ज्ञानमनन्तं ब्रह्म (तै. २-१) आनन्दो ब्रह्मेति व्यजानात् (तै ३-६) विज्ञानमानन्दं ब्रह्म (बृ.आ. ३-९-२८) इत्याद्यासु श्रुतिषु उद्घुष्टमस्ति । य एवाऽत्यन्त-प्रेमविषयोऽस्ति, स एवाऽऽनन्दरूपो भवति खलु । आत्मा हि प्रेयान् । सर्वस्याऽऽत्मभूतः परमात्मा प्रेयानितीदं -

तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदय-मात्मा स य आत्मानमेव प्रियमुपास्ते न हाऽस्य प्रियं प्रमायुकं भवति । (बृ.आ. १-४-८)

इति शास्त्रेषूपदिष्टमस्ति । आत्मप्रेमरहितस्य आत्मजिज्ञासैव नोदेति, तर्हि कुतस्तरां ब्रह्मात्मैक्यज्ञानम् ? गीतासु - प्रियो हि ज्ञानिनोऽत्यर्थमहं

स च मम प्रिय इति भगवानाऽऽह । किं च यो मद्भक्तः स मे प्रिय इत्यादिश्लोकेषु स्वप्रियभक्तस्य . ज्ञानिलक्षणस्यैवोक्तत्वात् परज्ञानस्य परभक्तेश्च न कश्चन भेद इति शास्त्रसिद्धम् । अतो ज्ञाननिष्ठारूप-परभक्त्यैव परमपुरुषार्थसिद्धिरिति सिद्धान्तस्य न कोऽपि विरोध इति ।

२. उपनिषत्सु भक्तिवार्ताऽपि नाऽस्तीति केषाञ्चिदाक्षेपः ।

भक्तिर्नाम प्रेम किल । प्रेमवाचिनोऽनेके शब्दाः उपनिषत्सु प्रयुक्ताः सन्ति । "आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति ।" (छां. ७-२५-३) अस्यां श्रुतौ परमात्मप्रेमैव रतिक्रीडानन्दशब्दैः प्रतिबोधितमस्ति । किं च

***यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।***
***तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।। (श्वे.उ. ६-२३)***

इत्यत्र परभक्तिशब्देनैव निर्देशः कृतोऽस्ति । कैवल्योपनिषदि अपि "श्रद्धाभक्तिध्यानयोगादवेहीति" भक्तिशब्द एव निर्दिष्टः । एवं च परमात्मप्रेमवाचिनां शब्दानां तत्र तत्र उपलभ्यमानत्वात् प्रेमरहितस्य ज्ञानस्य तत्त्वज्ञानात्मज्ञानव्यपदेशानर्हत्वाच्च निरवकाशोऽस्याऽऽक्षेपस्य । भगवद्गीतासु तु भक्तिशब्दो भूरिशो दृश्यते । ज्ञानादेव हि कैवल्यमिति वदन्त आचार्या अपि भगवद्गीतां साधन-प्रस्थानत्वेनोरीकृत्य तत्र भाष्यविवरणानि कृतवन्तः सन्ति । अतस्तत्राऽऽक्षेपो न युक्त इति ।

३. भक्तिः ज्ञानस्य साधनम् । न तु भक्तिः स्वयं ज्ञानरूपम् । श्वेताश्वतरोपनिषदि भक्तिमतः पुरुषस्य उपनिषदुक्ततत्त्वावबोधो भविष्यतीति ह्युक्तम् । इत्यपरे आक्षिपन्ति ।

भक्तिः ज्ञानसाधनमिति तु तथ्यम् । किं तु तत्साधनवचनं गौणभक्तिविषयम् । न परभक्तिविषयम् ।

*चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।*
*आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।* (गी. ७-१६)

इत्यस्मिन् श्लोके जिज्ञासुभक्तो गौणभक्त इत्युक्त्वा ततः परं च ज्ञानी भक्तत्वेन पृथगुक्त एवाऽस्ति । एवमेव "मयि चाऽनन्ययोगेन भक्तिरव्यभिचारिणी । (गी. १३-१०) इति श्लोकार्धेन गौणभक्तिर्ज्ञानस्य साधनमिति प्रतिपादितम् । परं तु अद्वेष्टा सर्वभूतानामित्यादिश्लोकैः अक्षरोपासकानां अर्थात् ज्ञानिनां परभक्तानामेव लक्षणमभिहितमित्यत्र न संशयः । यत्कारणम् - स्थितप्रज्ञगुणातीतशब्दैः वर्णितस्य कृत-कृत्यलक्षणस्य परभक्ताद्वैलक्षण्यं नास्त्येव ।

यस्य देवे परा भक्तिरिति श्रुतौ परभक्तिरेव उक्तेति स्पष्टेऽपि अस्य वाक्यस्य गौणभक्तावेव तात्पर्यमिति निर्णेतुं न किमपि गमकमस्ति । परमार्थं यो न जानाति न स परभक्तो नापि च ज्ञानी भवति । अतः परभक्त एव ज्ञानी स एव महत्मा इत्येवार्थं कल्पयितुं युक्तम् । किं चाऽस्याः श्रुतेः परभक्तावेव तात्पर्यमित्यत्र गमकमत्रैव दृश्यते । यथा हि देवे भगवति भक्तिः तथैव गुरावपि यस्य परभक्ति-र्भवति तस्यैव उपनिषदर्थः प्रकाशत इति ह्युक्तम् । गुरुरपि भगवत आत्मा भवतीति गीतासु ज्ञानी त्वात्मैव मे मतमित्युपदिश्य, स एव एकान्तभक्त इत्यप्युक्तोऽस्ति । अस्मिन्नपि ग्रन्थे (सू. ४१) तस्मिन् तज्जने भेदाभावादित्यभिहितम् । अतः परमात्मा अनुभवैकगम्य इत्यत्र यथा, अनुभवस्वरूपः परमात्मा अन्यनिरपेक्षतया स्वतः स्वयमेव प्रकाशते इत्यर्थः कल्प्यते तथैवाऽत्राऽपि कल्पयितुं युक्तम् ।

४. ननु उपास्यः उपासकः उपासनमिति पृथक्करणं यथा द्वैत-पक्षपतितं तथैव भक्तिः भगवान् भक्त इति भेदव्यवहारोऽपि द्वैतभूमिकायामेव अन्तर्भावयितुं युक्तं - इति अन्ये आक्षिपन्ति ।

परं तु नैतत्साधु । यतोऽ द्वैतदर्शने ब्रह्म अद्वितीयमपि व्यवहारदशायां

जिज्ञासुः जिज्ञास्यं जिज्ञासा इति त्रिपुटीकल्पनमस्ति, तथैव इदमपि काचित् कक्ष्या स्यात् । किं च ज्ञानी ज्ञेयं ब्रह्म इत्युपचारेण यथा व्यवहारार्थं कल्प्यते तथाऽत्रापि गौणभक्तिः परभक्तिरिति भेदं परिकल्प्य व्यवहारे न किमपि बाधकमस्ति । प्रियं वस्तु द्वैतसापेक्षमपि सर्वद्वैते बाधिते सति तदुत्तरज्ञानदशायामपि ज्ञानी निर्ज्ञातं ब्रह्म इति व्यवहारो निर्बाध एव । अपि च भगवानपि कल्पितं द्वैतमनुसृत्यैव स्वावतारेषु व्यवहारं कृतवानिति श्रूयते । परशुरामो दशरथरामः इत्युभाभ्यां रूपाभ्यां कृतो यथा व्यवहारः, तथा शिवविष्णुरूपाभ्यां वर्तमानो व्यवहारश्च सुप्रसिद्ध एव । एवमेव पार्थसारथिः परमार्थदृष्ट्या वासुदेवपरब्रह्माऽपि संवादकाले अहं त्वं इमे राजान इति द्वैतव्यवहारं कृतवानित्येतावन्मात्रेण अद्वैतसिद्धान्तस्य न काऽपि हानिः । परज्ञानरूपां अवगतिं जिज्ञास्यत्वेन उपदेशार्थं यथा कल्पयन्ति तथा परभक्तिमपि भगवद्गतिरूपतया उपदेशार्थं परिकल्पने न किमपि बाधकम् ।

***५. एवं हि श्रूयते - यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ (केन. १-६)***

अत्र ब्रह्म मनसा ज्ञातुं न शक्यत इति स्पष्टमुक्त्वा उपासनायां अपि ब्रह्म न विषयो भवतीति व्यक्तमुक्तम् । अन्यस्मिंश्च मन्त्रे - अन्यदेव तद् विदितादथो अविदितादधि (केन. १-४) ज्ञाताज्ञातोभयभिन्नं ब्रह्मेत्यपि ज्ञापितमस्ति । अतो भक्तिरुपासनरूपा वा ज्ञानरूपा वा सर्वथा तु भक्तेः परमात्मा अविषय एवेत्यवसितं खलु । इत्यपर आक्षिपति ।

अस्मिन्नाऽऽक्षेपे अर्धसत्यमस्ति । किं तदिति चेत् - यस्य वस्तुनः अनुभवोऽस्माभिः प्राप्तव्यः, तत्समये तद्वस्त्वाकारा मनोवृत्तिः आवश्यकी । परंतु आत्मा निराकारो यतोऽतस्तस्याऽऽकारो वृत्तिरूपं प्राप्नोति इति तु न शक्यम् । अत उपासनायां वा विचारपूर्वकज्ञाने वा वृत्तिरात्माकारा न भवत्येव । अत आत्मनो अवबोधे आत्माकारा

मनोवृत्तिर्न सम्भवतीत्येतत् सत्यमपि ये विशुद्धसत्त्वा महनीयाः स्वमनःप्रचारं येनात्मानुभवज्योतिषा साक्षात्पश्यन्ति, तथैव ते आत्मा स्वयम्प्रकाशो भवतीतीदं स्वानुभवेन एव विजानन्ति । अयं साङ्ख्यमार्गः इति गीतासु वर्णितोऽस्ति । अथ अध्यात्मयोगापरनाम्ना ध्यानयोगमार्गेण स्वात्मानं ज्ञातुं ये प्रयतन्ते ते प्रथममिन्द्रियाणि विजित्य मनश्चाऽतिसूक्ष्मं कृत्वा तच्च स्वात्मन्येव यदा समादधते तदा तन्मनः शान्तसङ्कल्पं सत् आत्मरूपमेव भवति । तदा नित्यानन्दानुभवरूप आत्मा स्वचैतन्यज्योतिषा स्वयमेव प्रकाशते । यदा अहमस्मीत्यनुभवः तदा मनोवृत्त्यपेक्षया विना यथा ज्ञानं भवति तथैव साक्षादात्मानुभवः अपि सम्भाव्यत एव ।

*प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।*
*उपैति शान्तरजसं ब्रह्मभूमकल्मषम् ।।* (गी. ६-२७)

इत्यस्मिन् गीताश्लोके यस्य मन आत्मनि विलीनं भवति स ब्रह्मरूपो भूत्वा निष्कल्मषः सन् स्वं नित्यानन्दस्वरूपं निगच्छतीति वर्णितमस्ति । अतः परमात्मा मनोवृत्तेरविषयोऽपि साङ्ख्यमार्गेण योगमार्गेण वा द्रष्टुं शक्य इति सिद्धान्तः । एवं च निराकारोऽपि भगवान् परभक्तानां अनुभवस्वरूपेणैव स्वात्मतया साक्षात्क्रियते इत्यत्र न किमप्यसमञ्जसम् । प्रह्लादादीनां भक्ताग्रेसराणां सङ्कष्टनिवारणार्थं स आत्मन ऐश्वर्ययोगेन नरसिंहाद्याकारं धृत्वा प्रत्यक्षोऽभवदिति पुराणेषु प्रसिद्धम् । अत आत्मा भक्तिगम्यः इति सिद्धान्तस्य न कोऽपि बाधः ।

६. श्रीशङ्कराचार्यानुयायिभिः भक्तिः साधनत्वेनैवाङ्गीकर्तव्या न फलत्वेन । यतस्तेषामाचार्याणां ज्ञानं भक्तिः एकमेव इति न संमतम् । ज्ञानं फलं, भक्तिः साधनमिति सम्मतमस्तीति केचन कल्पयन्ति ।

अस्याः कल्पनायाः न कोऽप्याधारोऽस्ति । भक्तिः मुख्यं साधनमिति आचार्याः पुनः पुनरभिदधते । अयमभिप्रायस्तेषां वादिनामपि निर्ज्ञातत्वेन

तत्र विषये पुनराचार्यवाक्योदाहरणं पिष्टपेषणमेव । किं तु साधनवचनं **गौणभक्तिविषयमिति** तु स्मारयितव्यमस्ति । परिपक्वज्ञानं परभक्तिश्च **एकं तत्त्वमित्यत्रैव** आचार्यवाक्यमुदाह्रियते तत्पुष्कलमिति कृत्वा ।

*शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारिकारणं बुद्धिविशुद्ध्यादि अमानित्वादि चाऽपेक्ष्य जनितस्य क्षेत्रज्ञ-परमात्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबन्धनसर्वकर्म-संन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानं सा परा ज्ञाननिष्ठा इत्युच्यते । सेयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता । तया परया भक्त्या भगवन्तं तत्त्वतोऽभि-जानाति । यदनन्तरमेव ईश्वरक्षेत्रज्ञभेदबुद्धिः अशेषतो निवर्तते । अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न विरुद्ध्यते । इति ।* (गी. भा. १८, ५५)

अस्मिन् भाष्यभागे आचार्याणामाशयः सुस्पष्टः । यदुक्तमत्र-**शास्त्राचार्याणामुपदेशेन ज्ञानमुत्पद्यते इति तु तथ्यम् । किं तु तत्परिपाकं प्रति कारणं यत् - बुद्धिविशुद्धिरित्याद्यस्मिन्नध्यायोक्तं तथा त्रयोदशाध्या-योक्तममानित्वादि चापेक्ष्य क्षेत्रज्ञेश्वरैक्यज्ञानं जायते । तत्र च कर्त्रादिकारकभेदबुद्धिमपेक्ष्य करणीयानां कर्मणां तत्संन्याससहितानां आत्मैक्यानुभवे यत्पर्यवसानं तत् सा ज्ञानस्य परा निष्ठा । सेयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया चतुर्थी पराभक्तिरित्युच्यते । तया परया भक्त्या जिज्ञासुः भगवन्तं यथावदभिजानाति । ईदृशाभिज्ञानोत्तरमेव ईश्वरक्षेत्रज्ञौ द्वाविति भेदबुद्धिलक्षणमज्ञानं अशेषतो निवर्तते । अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न विरुद्ध्यत इति ।**

**एतद्वचनपूगस्याऽर्थं** सम्यग्जानतां जिज्ञासूनां **परज्ञानं परभक्तिः इत्येतयोः एक एवार्थ** इत्यस्मिन् विषये न कोऽपि संशयः स्यात् । ज्ञान-

निष्ठा परमप्रेमरूपोऽनुभवश्च एक एवेति नारदभक्तिसूत्रे अस्माभिः निरूपितस्याऽऽशयस्य श्रीगीताचार्यवचनेन तथा श्रीभाष्यकृदाचार्य वचनेन च सङ्गच्छत एव इति, तथा स एवाऽनुभवानुगुणः इति च निस्सन्देहमवगतं भवति ।

७. ज्ञानशास्त्रं भक्तिशास्त्रं च परस्परं विरुद्ध्येते । यत्कारणं- वेदान्तोक्तज्ञाने वैदिककर्माधिकारिणो द्विजस्यैवाऽधिकारो न तु शूद्रा- दीनामिति ब्रह्मसूत्राऽपशूद्राधिकरणे स्थापितम् । भक्तिशास्त्रे तु जात्याद्यनिर्बन्धेन सर्वेषामपि भक्तावधिकार आगूर्यते । अतो ज्ञान भक्त्योरेकतावादिनां वादो न युक्त इति केषाञ्चिदाक्षेपः ।

नैष वादः साधुः । यत्कारणम् - आश्रमधर्मकर्मरहिताः रैक्व- वाचक्नवीप्रभृतयो ब्रह्मज्ञानिनो वेदे श्रूयन्ते । अत आश्रमधर्मरहितानामपि विधुरादीनां जपः उपवासो देवताराधनमित्यादि कर्मानुष्ठानं ज्ञानं प्रति साधनं भवत्येव । मनुस्मृतौ

*जप्येनैव तु संसिद्ध्येद् ब्राह्मणो नाऽत्र संशयः ।*
*कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥* *(म.स्मृ. २-८७)*

इत्यनाश्रमिणामपि जपेऽधिकारो ज्ञाने च योग्यताऽस्तीति प्रोक्तम् । अपि च ज्ञानप्राप्तिं प्रत्यपेक्षिता चित्तशुद्ध्यादियोग्यता तु जन्मान्तर- संस्कारेणाऽपि सम्भवेत् । अत्र च **"अनेकजन्मसंसिद्धस्ततो याति परां गतिम्"** इति गीतोक्तिः प्रमाणम् । विदुरधर्मव्याधादीनां पूर्वजन्मसंस्कारेणैव ज्ञानसिद्धिरभूदिति भारतादिषु स्मर्यते । **"श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः"** (मो.ध ३२७-४९) इति वचनरीत्या इतिहासपुराणश्रवणेनैव द्विजेतरस्याऽपि ज्ञानप्राप्तिरिति भारते संसूचितमस्ति । वेदोक्तकर्मसु उपनिषच्छ्रवणादिषु अधिकारो नास्तीत्येतावन्मात्रेण द्विजेतरेषां भक्तिद्वारा ज्ञानमेव नोत्पद्यत इति, ज्ञानावकाश एव नास्तीति च वक्तुं न कोऽप्याधारोऽस्ति । अतो द्विजव्यतिरिक्तानामपि भक्तौ अधिकारः तत्फलप्राप्तिश्च भवेदेवेति सिद्धम् ।

अत एव यथा ज्ञाने तथा भक्तावपि वर्णाश्रमोक्तधर्मकर्माणि प्रथममनुष्ठाय चित्तशुद्धिः सम्पादनीयेति युक्तम् । तत्र अनधिकारिणोऽपि भगवन्नामस्मरणाद्युपायेन चित्तशुद्धिं सम्पाद्य क्रमेण भक्तिं सम्पादयेयुरेव ।

**"कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति"** इति भगवदाश्वासन-वचनात् यावत्पापतमोऽपि पुरुषः भगवन्तं शरणं गत्वा त्वमेव मे गतिरिति दृढं भजति चेत्, तावन्मात्रेणैव स धर्मात्मा भूत्वा परमपुरुषार्थ फलभाग्भवतीत्यत्र न कोऽपि सन्देहः । इति ।

८. नामजपादिसाधनानि सुकराणि सन्ति । शास्त्रविहितकर्मानुष्ठानं वेदान्तश्रवणं च बहुदुष्करम् । यदि नामजपादिभिरेव परमपुरुषार्थो लभ्यते तर्हि को नु नाम वेदान्तेषु वा कर्मसु वा चित्तं विधास्यति ? "अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्" इति न्यायेन वेदान्तश्रवणादिकं तथा श्रमसाध्यानि कर्माणि वा कर्तुं कः पुमान् प्रवर्तेत ? एवं लोकस्थितौ वर्तमानायां पुराणादिग्रन्थेषु नामजपादिप्रशंसावचनानि श्रुत्वा प्रलोभिताः केचन मन्दधुरीणाः इमं भक्तिमार्गं प्रावर्तयन्निति केचित्प्रवदन्ति ।

एतत्तु सर्वथा नोचितम् । यस्मात् - जपादिकं कर्तुं सुकरमपि श्रद्धयैकाग्रेण भगवति मनः समाधाय जपादिसाधनं कष्टसाध्यमेव । अन्यत्राऽन्यत्र मनः प्रसार्य कर्मानुष्ठानापेक्षया उपासनादिभावप्रधान-साधनानुष्ठानमेव दुष्करं भवति । अत एव वेदे प्रथमं कायप्रधानानि कर्माणि विधाय तदनन्तरमेव मानसकर्मरूपाणि उपासनानि विहितानि भवन्ति । तामस राजसभक्त्यपेक्षया सात्त्विकभक्तिसाधने अधिकश्रम एव भवतीतीदं युक्तियुक्तम् ।

अत एकाग्रेण मनसा परमात्मानं ध्यायतः पुरुषस्य निरन्तरनाम-जपकीर्तनादिकं कुर्वतश्च सतः अचिरेणैव भगवदनुग्रहो भविष्यति । अन्यथा गौणभक्तिसाधकस्य फलसिद्धिं प्रति जन्मान्तराण्यपेक्षितानि स्युः

इति । अतश्च भक्तिमार्गेऽनादरणं कर्तुं न किमपि कारणमस्ति । भगवद्गीतादिषु शास्त्रोक्तकर्माण्यपि भगवदर्चनबुद्ध्या अनुष्ठितान्येव चित्तशुद्धिकराणि स्युरित्युक्तं मनसिक्रियते चेत् साध्ववगम्यते यत् भक्तिद्वारेणैव कर्मभिः चित्तशुद्ध्यादिफलप्राप्तिद्वारा अन्ते परमपुरुषार्थ-सिद्धिरिति ।

९. परमात्मा निर्गुणो निराकारश्च । अतो निर्गुणभक्तावेव शास्त्रास्य तात्पर्यं भवति । ततश्च सगुणभक्तिः शास्त्रोक्ता न भवतीति केचिन्मन्यन्ते ।

नैतदपि साधुमतम् । यत्कारणम् - शास्त्रेषु उपदिश्यमानानि उपासनानि सगुणब्रह्मविषयाण्येव विद्यन्ते । यतः परमात्मा जगत्कारण-मस्ति, अतस्तं नामरूपोपेतमिति उपासितुं शक्यत एव । एष एव शास्त्राभिप्रायो भवितुमर्हति । अन्यथा वेदस्य उपासनाकाण्ड एव व्यर्थ आपद्येत । यद्यपि परमात्मा वस्तुतो निर्गुणो निराकारश्चेति तु सत्यम् अथापि निर्गुणोपासने सर्वे साधकाः नाधिकारिणो भवन्ति । गीतासु -

*ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।*
*सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ।।*
*संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।*
*ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ।।* *(गी. १२-३)*

इत्यत्र अव्यक्तोपासकाः मामेव प्रपद्यन्त इति प्रतिपत्तिमार्गनिष्ठां निरूप्य तदनन्तरं प्रपत्तिमार्गनिष्ठां च बोधयति भगवान् । यथा -

*ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।*
*अनन्येनैव योगेन मां ध्यायन्त उपासते ।*
*तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।*
*भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ।।* *(गी. १२-६, ७)*

इत्यपि प्राह । ये च विश्वरूपोपासकाः सगुणभक्ताः स्वकृत-

सर्वकर्माण्यपि मयि समर्प्य मत्परा भूत्वा उपासते तान् अचिरेणैव अहं मृत्युसंसारात् समुद्धरामीति प्रतिजज्ञे । किं च

*क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।*
*अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ।।* (गी. १२-५)

इन्द्रियातीतमक्षरमुपासितुं देहाभिमानिनां साधकानां विश्वरूपोपासनापेक्षया क्लिष्टतरमिति च प्राह । साधकानामनुभवेनाऽपि एष विषयः स्पष्टः । अत एव "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" । (गी. ४-११) ये ये यथा यथा मां भजन्ते तेषां तत्तथैव फलं ददामीति प्रतिजानीते । अस्मिन्वचने ये कृतविश्वासा उपासकाः सगुणं परमात्मानं सर्वभावेन भजन्ते, तैः भगवदनुग्रहेणैव परगतिः लब्धव्या भवतीत्येतत् सकलश्रुतिस्मृतिसम्मतमिति ।

१०. भगवद्भक्ताः परत्र वैकुण्ठादीन् पुण्यलोकान् प्राप्नुवन्तीति केषुचित्पुराणेषु प्रतिपादयत्सु सत्सु, नारदः कथं अत्रैव भगवान् स्वसाक्षात्कारप्रदानेन भक्ताननुगृण्हातीति कथयामासेति केचन शङ्कन्ते ।

तत्समाधानमिदम् - अत्रैव भगवत्साक्षात्कारं लब्ध्वा भगवति ऐक्यं प्राप्नुवन्तीत्येषः परभक्तेर्विषयः । गौणभक्तानां तु लोकवासना नापगतेत्यतः तेषां परत्र पुण्यलोके भगवदनुग्रहः समन्वेतीत्यपि युक्ततरमेव । यः लोकवासनां समूलमुत्पाटयति स एव मायां तरतीति सप्तचत्वारिंशत्तमे सूत्रे वर्णितत्वेन तादृशः परभक्तोऽत्रैव भगवन्मयो भवतीत्यत्र न कोऽपि संशयः ।

*नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः ।*
*अगत्वा गतयस्तिस्रो यद्गच्छन्त्यव्ययं हरिम् ।।* (मो.ध. ३४८-४)

इति वचनानुरोधेन एकान्तभक्तानां (परभक्तानां) भगवान् श्रीहरिरेव परायणमिति न्याय्यमेवेति ।

११. भगवन्नामसङ्कीर्तनं पापपरिहाराय, तथा कृतकर्मसाद्गुण्याय च इति स्मृतिषु पुराणेषु च वर्णितमस्ति ।

*अवशेनाऽपि यन्नाम्नि कीर्तिते सर्वपातकैः ।*
*पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥*
*यन्नामकीर्तनं भक्त्या विलापनमनुत्तमम् ।*
*मैत्रेयाऽशेषपापानां धातूनामिव पावकः ॥* (वि.पु. ६-८-१९)

यदृच्छयाऽपि भगवन्नामसङ्कीर्तने कृते सिंहत्रस्तेभ्यः क्रूरमृगेभ्य साधुमृग इव मनुष्यः सर्वैः पापैर्विमुच्यते । भक्त्या भगवन्नामसङ्कीर्तने वन्हिः यथा धातुमलं प्रदूय धातुं निर्मलं करोति, तथैव मनुष्यस्य समस्तपापानि परिहत्य तं परिशुद्धं करोति । इति पुराणवचनम् ।

*यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।*
*न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥*

इति च स्मृतिवचनं प्रसिद्धम् । परंत्वत्र शास्त्रे अशीतितमे सूत्रे भगवत्सक्षात्कारस्य नामसङ्कीर्तनं साधनमिति प्रोक्तम् । तत् कथमिति काचन शङ्का ।

इदमत्र समाधानम् । नामसङ्कीर्तनेन पापपरिहारः कर्मसमृद्धिश्च सिद्ध्यतीतीदं सप्रमाणकमेव । किं तु नामसङ्कीर्तनस्य मुख्यं फलं किमिति चेत्, आनन्दं लब्ध्वा आनन्दरूपे भगवति एकीभाव एवेति मन्तव्यम् । अतो भगवदनुग्रहं प्रति नामसङ्कीर्तनं साधनमिति वचने न कोऽपि दोषः । किं चाऽस्मिन् शास्त्रे केवलनामसङ्कीर्तनेन परप्राप्तिरित्येतत्तु नोक्तम् । कीर्तनश्रवणादिभिः मुख्यभक्तिः साध्यते, तया परया भक्त्या भगवान् प्रत्यक्षो भूत्वा भक्ताननुगृण्हातीति ससमर्थनं

सिद्धान्तः कृतोऽस्ति । स्तोत्रादिभिरपि परमपुरुषार्थप्राप्तिरिति वचनानामपि एवमेवाऽभिप्रायं कल्पयेत । निदर्शनार्थं विष्णुसहस्रनामस्तोत्रे- "किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात्" इति युधिष्ठिरकृतप्रश्नस्य भीष्मो विष्णुसहस्रनामावलिं उपदिश्य तदन्ते -

*य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।*
*नाशुभं प्राप्नुयात्किञ्चित् सोऽमुत्रेह च मानवः ।*

**वेदान्तगो ब्राह्मणः स्यात् .....** इति वेदान्ततत्त्वज्ञानमपि अनेन स्तोत्रेण प्राप्यते इति फलश्रुतौ प्राह ।

*वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।*
*सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ।।*
*न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।*
*जन्ममृत्युजराव्याधिभयं नैवोपजायते ।।*

एवं परम्परया मोक्षफलमप्युक्तम् । अतो नाऽत्र कश्चिदपि विरोधः । इति ।।

१२. ईश्वरप्रणिधानेन समाधिर्लभ्यते इति योगशास्त्रे प्रतिपादितम् । अतो योगाभ्यासं विना मुक्तिर्न भवत्येवेति केचिन्मन्यन्ते । तत्प्रतिविधानं कथमिति चेत् -

गौणभक्तिः समाधेः साधनमिति तु युक्तम् । समाधिर्नाम आत्मन्येव मनसो निष्ठा । अतः परमार्थतः समाधिः परभक्तिश्च एकैव, न भिन्ना । यतश्चैवं अतो योगशास्त्रोक्तैः पुरुषप्रयत्नक्लेशैर्विना तथा अणिमादिसिद्धिप्रलोभप्रस्तोभप्रसक्तिं विना निरपायेन विधिना "परमात्मनि साक्षात्परभक्तिं" सम्पादयितुं अत्र शास्त्रे अभिवर्णिताः गौणभक्तिप्रकारा एव सुकराः सुलभतराश्चेत्यत्र न कोऽपि प्रतिवादः स्यात् ।

## उपसंहारः

*श्रद्धावित्तो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येत् । (बृ.आ. ४-२-२८)* इत्थं च भक्तिविषये किमपि चोद्यं नावतिष्ठते ।

*मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।*
*निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ (गी. ११-५५)*

भगवानेव परम इति मत्वा श्रद्धया यस्तु भक्तो भगवत्सेवातत्परो भूत्वा विषयसङ्गं कर्मसङ्गं फलासक्तिं भोगासक्तिं च सन्त्यज्य सर्व-प्राणिषु निर्वैरेण वर्तते स मद्भक्तो मामेव प्रपद्यते इति भगवानेवाऽऽह ।

*धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता ।*
*समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ॥*
*(वि.पु. १-२०-२७)*

इति भगवत्सन्निधौ प्रह्लादस्य वीरविज्ञप्तिः ।

एवं च श्रुतिस्मृतिपुराणेषु परभक्त्यैव परमपुरुषार्थसिद्धिरित्ययं सुप्रसिद्धो विषयः । पञ्चमहायज्ञाः, देवपूजा, मन्त्रजपाध्ययनानि, भगवद्ध्यानं इत्येते सद्व्यापाराः सर्वे गौणभक्तावेवाऽन्तर्भवन्ति । भगवति परमं प्रेम केवलं यथार्था भक्तिः । तत्प्रेम तु भगवत्स्वरूपमेव । तस्मिन् प्रेमरूपे भगवति सायुज्यं प्राप्य तन्मयतावाप्तेः अन्या न परागति-रस्तीति भक्तिशास्त्रस्य परमः सिद्धान्तः ॥

इति सर्वतो भद्रम् ॥

॥ ॐ ॥ श्रीः ॥ ॐ तत्सत् ॥

**॥ सानुरागप्रपत्त्या सत्यपरमार्थप्रतिपत्तिरिति शम् ॥**

**माण्डूक्यरहस्यविवृतिः** : श्री सच्चिदानन्देन्द्रसरस्वतीभिरनुगृहीतायाम् अन्वर्थाभिधानायामस्यां व्याख्यायां माण्डूक्योपनिषदि गर्भीकृतानि नैकानि रहस्यानि श्रीगौडपादसंमतवेदान्तप्रक्रियानुसारेण तथा विवृतानि यथा मोक्षमाणानां जिज्ञासूनामस्याः श्रवणमननाभ्यां छिद्येरन् सर्वसंशयाः भिद्येत च हृदयग्रन्थिरात्मसत्यानुबोधेन । श्रीशङ्करभगवत्पादभाष्यवाक्यार्थश्च प्रतिपदं प्रस्थानत्रयभाष्यान्तरवाक्यान्तरसंगानेन मतान्तरदोषाविष्करणपूर्वकं तथा व्याकृतो यथा विशुद्धसंप्रदायाध्वना गतिर्निर्विघ्ना भवेत् पाठकानाम् । विशिष्य च अलातशान्तिप्रकरणे प्राचीनग्रन्थतत्त्वशोधकोत्थापितमतान्तरसंक्रान्तिशङ्कानिरसनपूर्वकं श्रीगौडपादसंमता वेदान्तप्रक्रिया प्रदर्शिता, पूर्वतनप्रकरणत्रयप्रक्रियया एकवाक्यतां गमिता च । आङ्ग्लभाषामय्या गैर्वाणवाणीमय्या च भूमिकया श्रीगौडपादसंमतप्रक्रियाया असाधारणं स्वरूपं माहायानिकप्रक्रिया-वैलक्षण्यस्फुटीकरणपूर्वकं हृदयंगमं कृतम् ।।

**सुगमा** : श्रीशङ्करभगवत्पादनिर्मितस्य सुप्रख्यातस्य अध्यासभाष्यस्य नवीनेयं व्याख्या श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिर्विरचिता । प्रचलन्तीष्वपि नैकासु प्रथितमाहात्म्यासु व्याख्यासु, तासां भिन्नभिन्नप्रस्थानावलम्बनत्वात् कीदृशं स्यादविवादम् अविरूद्धं च शुद्धं शाङ्करवेदान्तदर्शनम् इति सन्दिहानानां जिज्ञासूनां कृते स्वल्पेनैव ग्रन्थेन प्रस्थानत्रयैककण्ठ्यमादर्शयन्तीयं व्याख्या नूतनतया निर्मिताऽस्ति ।। अत्र च भाष्यकारोक्त्युपजीवनेनैव शाङ्करी प्रक्रिया वाचकहृदयंगमीकृता । शाङ्करसंप्रदायविरुद्धाः परवादाश्च तत्र तत्र श्रुतियुक्त्यनुभवप्रातिकूल्यप्रकटनपूर्वकं निर्विशङ्कं निराकृताः ।।

**सूत्रभाष्यार्थतत्त्वविवेचनी** : श्रीशङ्करभगवत्पादैरनुगृहीतस्य जिज्ञासाधिकरणभाष्यस्य नूतनेयं व्याख्या श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिर्विनिर्मिता । अत्र खलु भगवत्पादसंमतवेदान्तप्रक्रियाया असाधारणधर्माः सुविशदं आविष्कृताः । व्याख्यानप्रस्थानेषु परस्परेण भाष्यकृदभिप्रायेण च विरुध्यमानाः कतिचनाभिप्रायाः परीक्षिताः शुद्धशाङ्करप्रक्रियाया विशेषस्वरूपनिर्धारणार्थम् । परिशिष्टभागे च अधिकरणसारः, निर्विशेषब्रह्मवादे सूत्रस्वारस्यम्, सूत्रस्य विधिविचारपरत्वाभावश्च इत्येते विषया सप्रमाणं निरूपिताः ।।

**शुद्धशाङ्करप्रकियाभास्करः १-२-३** : अत्र वेदान्तसिद्धान्तनिर्णयः, शाङ्करसंप्रदायनिर्णयः इति च लेखनद्वयमस्ति । अद्वैतमेव वेदान्तसिद्धान्त इति सर्वसंप्रतिपन्नमासीत् शङ्करभगवत्पादेभ्यः पूर्वमपि, शङ्करभाष्यप्रणयनकाले ततः प्राग् वा द्वैतविशिष्टाद्वैतादिवादिनस्तु नासन् - इत्येवमादिविषयाः सप्रमाणं निरूपिताः ।।

**वेदान्तप्रक्रियाप्रत्यभिज्ञा** : अत्र खलु सर्वत्र वेदान्तेष्वेकैव प्रकिया अध्यारोपापवादन्यायाभिख्या नानावेषधारिणी प्रयुक्ता अनाद्यविच्छिन्नपरम्परया वेदान्ताभियुक्तैः परिगृहीतास्तीत्येतत् सुस्पष्टमादर्शितम् । यथा चैतन्निर्दुष्टप्रक्रियातः प्रच्युतेरेव हेतोः सर्वेऽपि वावदूकाः परस्परविरोधं परिहर्तुं न प्राभवन् वेदान्तोपदिष्टमात्मैकत्वं चानुभवारूढमापादयितुं नाशक्नुवन् इत्येतद् स्फुटीकृतम् । आधुनिकविचारसरणेरभिलाषुकानां कृते त्रयस्त्रिंशदधिकशतपत्रपार्श्वमितया आंग्लभूमिकयापि संयोजितः ।।

**मूलाविद्यानिरासः अथवा श्रीशङ्करहृदयम्** : श्रीसच्चिदानन्देन्द्रसरस्वतीभिः पूर्वाश्रमे विनिर्मितं प्रकरणमिदं पूज्यपादानां श्रीशङ्करभगवत्पादानां वेदान्तप्रक्रियारहस्यभेदकानां गभीराशयं विवृणोति । सर्वत्र चात्र प्रमाणवाक्यान्युदाहृतानि परःशतम्. श्रीमद्भाष्यकृतां तत्साक्षादन्तेवासिनां श्रीसुरेश्वराचार्याणां सुप्रसिद्धमाण्डूक्यकारिकाकृतां श्रीगौडपादाचार्याणां च । अनुशाङ्करवेदान्तिभिः संप्रदायविरोधेन नूत्नतया अभ्यूहितस्य औपनिषद-प्रक्रियामलिनीकरणमूलस्य मूलाविद्यावादस्य समूलोत्पाटनरूपोऽयं निबन्धः सम्यग्दर्शनलालसजनग्राहिशुष्कतर्कपिशाचोच्चाटने महामन्त्ररूपो विजयते ।।

**वेदान्तबालबोधिनी** : 'प्रातः स्मरणस्तोत्र'स्य भगवत्पादविरचितस्य प्रश्नोत्तररूपं व्याख्यानम् । अस्मिन् प्रकरणे ब्रह्मविद्याया अनुभवावसानत्वं पदे पदे स्मारयन्तीनां भाष्यकारोक्तीनां सरणिमेवानुसृत्य सुविशदीकृतम् । यद्यपि 'बालबोधिनी' - इत्यन्वर्थनाम्नीयं व्याख्या वेदान्तविचारप्रारम्भकाणां कृते रचितास्ति, तथापि, विद्वज्जनमनोरञ्जन्यपि भवेत् - इति ।।

**वेदान्तडिण्डिमः** : श्रीनृसिंहसरस्वतीकृतमिमं ग्रन्थं वेदान्तविचारप्रारिप्सूणां कृते संशोध्य प्रसन्नगम्भीरशैल्या स्वोपज्ञया 'भावबोधिन्या'ख्यया व्याख्यया श्रुतियुक्त्यनुभव-संगानप्रदर्शिन्या समलंकार्षुः पूर्वाश्रमे श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः ।।

**वेदान्तविद्वद्गोष्ठी** : श्रीसच्चिदानन्देन्द्रसरस्वतीभिः कृतायां 'विदुषां सविधे समालोचनार्थं विज्ञप्तिः' इत्यभिधायां पुस्तिकायां शाङ्करवेदान्तप्रक्रियामधिकृत्य प्रत्तानां प्राधानिकप्रश्नानां विषये एकादशानां पण्डितप्रकाण्डानामभिप्रायविनिमयोऽत्र दृश्यते । पुस्तिकाप्रतिमुद्रणपूर्वकम् आंग्लगीर्वाणभाषामयीभ्यां श्रीचरणैरनुगृहीताभ्यां पूर्वपीठिकाभ्यां समलङ्कृतश्च ग्रन्थः । वेदान्तप्रक्रियासतत्त्वं निर्दिधारयिषूणां अत्यन्तोपयोगीदं संकलनम् ।।

**मुण्डकोपनिषद्भाष्यम्** : कठभाष्यवद् सर्वपरिकरोपेतम् । पीठिकायाम् न केवलं भाष्यविषयविवेचनम्, किं तु भाष्यतट्टीकाकारयोः मतभेदविमर्शनं च कृतं जिज्ञासूनामुपकाराय ।।